२०८	१९३	३०	धृष्टद्युम्नवार्तांश्रुतवताद्रुपदेनतत्वविवित्सयापाण्डवान्प्रतिपुरोहितप्रेषणं ।
२०९	१९४	१८	कुन्त्यासहपाण्डवानांद्रुपदगृहगमनं । परीक्षणार्थंद्रुपदेनअनेकविधवस्तूपहरणं । द्रौपद्यासहकुन्त्याअन्तःपुरप्रवेशः। भोजनानन्तरंपाण्डवानांसाङ्ग्रामिकवस्तुपूर्णप्रदेशप्रवेशः ।
२१०	१९५	३३	द्रुपदप्रश्नानन्तरंयुधिष्ठिरेणस्वेषांपाण्डवत्वकथनं। द्रौपदीपञ्चानांपत्नीभवत्वितियुधिष्ठिरेणोक्तेतत्रद्रुपदस्यविवादः। तत्रव्यासागमनं ।
२११	१९६	२४	एकस्याबहुभार्यात्वेशङ्कमानान्द्रुपदादीन्प्रतिव्यासेनस्वस्वाभिप्रायनिवेदनचोदना । तैःस्वस्वमतेकथितेव्यासेनास्यविवाहस्यधर्म्यत्वकथनं ।
२१२	+	२८	इन्द्रसेनानाम्न्यानालायन्याउपाख्यानं। तयास्थविरस्यपत्युर्मौद्गल्यस्यआराधनं। तुष्टेनतेनरूपपञ्चकस्वीकारेणतस्यांरमणं । सैवनालायनीतवदुहिताजातेतिद्रुपदंप्रतिव्यासस्योक्तिः ।
२१३	+	२९	कथंनालायनीमत्पुत्रीजातेतिद्रुपदप्रश्नेपुनर्नालायनीकथाकथनं । कामातृप्तायानालायन्याःपञ्चपतित्वशापः । तयारुद्रंप्रतितपःकरणम् । तयापतिंदेहीतिपञ्चकृत्वःप्रार्थितेनरुद्रेणअन्यजन्मनिपञ्चतेपतयोभविष्यन्तीतिवरदानं । पुनारुद्रान्नित्यकौमारवरप्राप्तिः । त्वयिगङ्गाजलस्थायांतत्रेन्द्रआगमिष्यतितमानयेतिरुद्रस्याज्ञा ।
२१४	१९७	६७	पञ्चेन्द्रोपाख्यानं । बलरामश्रीकृष्णद्रौपद्यादीनामुत्पत्तिकथनं । व्यासदत्तदिव्यदृष्ट्याद्रुपदस्यपाण्डवद्रौपद्यादीनां पूर्वरूपदर्शनं ।
२१५	१९८	२९	युधिष्ठिरादीनांक्रमेणद्रौपद्याःपाणिग्रहणं ।

अध्याय.	झपा.अ.	श्लोक.	
२१६	१९९	१९	द्रौपदींप्रतिकुन्त्याआशीर्वादः । श्रीकृष्णप्रेषितालंकारादीनांपाण्डवैःस्वीकारः ।

समाप्तंवैवाहिकपर्व ॥ १३ ॥

अथविदुरागमनराज्यलाभपर्व ॥ १४ ॥ अध्यायाः ॥ १६ ॥ (२१७–२३२) ॥ श्लोकाः ॥ ६४१ ॥

२१७	२०० १–७	४५	चारद्वारापाण्डववृत्तान्तश्रवणेनअन्यैराजभिर्भीष्मधृतराष्ट्रादीनांधिक्कारः । धार्तराष्ट्रैर्मन्त्रालोचनं । पाण्डवाहन्तव्याइतिशकुनेरुक्तिः । पाण्डवानांहन्तुमशक्यत्वात्तैस्सहसन्धिःकर्तव्यइतिसौमदत्तेरुक्तिः ।
२१८	+	७५	पाण्डवाहन्तव्याएवेतिकर्णस्योक्तिः । पाञ्चालनगरंप्रतियुद्धार्थंदुर्योधनादीनांगमनं । तैःसहयोद्धुंसपाण्डवस्यद्रुपदस्यागमनं । कर्णजयद्रथाभ्यांसुमित्रप्रियदर्शनयोर्वधः । अर्जुनेनकर्णजयद्रथपुत्रयोर्वधः । कर्णदुर्योधनादीनांपराजयः। पराजितानांहास्तिनपुरगमनं । कृष्णबलरामयोःपाञ्चालपुरेवासः।
२१९	२०० ८–३१	३८	विदुराद्विदितवृत्तान्तेनधृतराष्ट्रेणद्रौपद्यानयनार्थमाज्ञापनं । धृतराष्ट्रसमीपे कर्णदुर्योधनयोर्भाषणं ।
२२०	२०१	२२	धृतराष्ट्रदुर्योधनसंवादः ।
२२१	२०२	२५	दुर्योधनंप्रतिकर्णेनोक्तंश्रुतवतोधृतराष्ट्रस्यभीष्मादिभिस्सहमन्त्रणं ।
२२२	२०३	१९	भीष्मेणपाण्डवेभ्योऽर्धराज्यंदातव्यमितिस्वाभिप्रायकथनं ।
२२३	२०४	२८	पाण्डवाःसंविभाज्याइतिद्रोणवचनं। तद्विरोधितयाकर्णेनअम्बुवीचवृत्तान्तकथनं। मद्वचनाकरणेकुरवोविनङ्क्ष्यन्तीतिद्रोणोक्तिः ।
२२४	२०५	३२	भीष्मद्रोणाभ्यामुक्तमेवकर्तव्यंपाण्डवाजेतुंनशक्याःदुर्योधनादीनांवचनंमाकुर्वितिविदुरस्योक्तिः ।
२२५	२०६	२७	धृतराष्ट्राज्ञयाविदुरस्यद्रुपदनगरगमनं । तत्रकृष्णादीनांसमीपेधृतराष्ट्रसंदेशकथनं ।
२२६	२०७ १-२२	४२	पाण्डवानांहास्तिनपुरगमनंप्रतिश्रीकृष्णाद्रुपदयोराज्ञा । पृथाविदुरसंवादः । द्रुपदेनपारिबर्हदानं । पाण्डवानांहास्तिनपुरप्रवेशः ।

अध्याय.	झपा.अ.	श्लोक.	
२२७	२०७ (२३-५२)	१०९	द्रौपद्यानमस्कृतयागान्धार्यातद्रूपदर्शनेनतस्याःस्वपुत्रमृत्युत्ववितर्कः । युधिष्ठिरस्यार्धराज्येऽभिषेकः । पाण्डवानांखाण्डवप्रस्थगमनं । विश्वकर्मणा इन्द्रप्रस्थनामकपुरनिर्माणं ।
२२८	२०८	५२	पाण्डवसमीपेनारदागमनं ।
२२९	२०९	३३	सुन्दोपसुन्दकथारंभः । तयोर्ब्रह्मणोवरलाभः ।
२३०	२१०	२७	तयोर्दिग्विजयःकुरुक्षेत्रेनिवासश्च ।
२३१	२११	३४	सुन्दोपसुन्दकृतोपद्रवंनिवेद्यदेवादिभिःप्रार्थितेनब्रह्मणाआज्ञप्तेनविश्वकर्मणा तिलोत्तमासृष्टिः । तयाब्रह्माज्ञास्वीकारः ।
२३२	२१२	३३	सुन्दोपसुन्दसमीपेतिलोत्तमागमनं । तस्यांसकामयोस्तयोःपरस्परंगदाप्रहारेणमरणं । इमांकथांश्रुतवद्भिःपाण्डवैर्द्रौपदीविषयेसमयकरणं ।

समाप्तंविदुरागमनराज्यलाभपर्व ॥ १४ ॥

अथार्जुनवनवासपर्व ॥ १५ ॥ अध्यायाः ॥ ६ ॥

(२३३-२३८) ॥ श्लोकाः ॥ २०४ ॥

२३३	२१३	३६	तस्करैःकस्यचिद्ब्राह्मणस्यगोहरणं । चोरितानांगवांप्रत्यानयनार्थंद्रौपदीयुधिष्ठिराधिष्ठितेआयुधागारेऽर्जुनस्यप्रवेशः । प्रत्याहृतागाब्राह्मणाय दत्वायथासमयमर्जुनस्यतीर्थयात्रा ।
२३४	२१४	३७	तीर्थान्यटतोऽर्जुनस्यस्नानार्थंगङ्गायामवतरणं । तत्रनागकन्ययोलूप्या गृहीतस्यार्जुनस्यनागलोकगमनं । अर्जुनेनोलूप्यासहविवादः । पश्चात्तस्याः परिग्रहः । इरावतउत्पत्तिः ।
२३५	२१५	२८	अर्जुनस्यमणलूरपुरगमनं । चित्राङ्गदापरिग्रहः ।
२३६	२१६	२३	अर्जुनस्यग्राहेणग्रहणं । अर्जुनेनजलात्तदुद्धरणे ग्राहरूपंपरित्यज्यनिजरूपंप्राप्तयावर्गानाम्न्याऽप्सरसास्वप्रभृतीनांपञ्चानामप्सरसांशापकथनं ।
२३७	२१७	३८	वर्गयाऽर्जुनंप्रतिपञ्चानांविशापकथनं । अवशिष्टानांग्राहरूपाणामप्सरसामर्जुनेनतत्तत्तीर्थेभ्यउद्धरणेतासांस्वस्वरूपप्राप्तिः । पुनर्मणलूरपुरमागत्यचित्राङ्गदायांजातंबभ्रुवाहननामानंस्वपुत्रंश्वशुरेसमर्प्यार्जुनस्यगोकर्णक्षेत्रगमनं ।
२३८	२१८	४२	अर्जुनस्यप्रभासतीर्थगमनं । तत्रस्मृतिपथागतसुभद्रारूपलावण्यादिकंचिन्तयतोर्जुनस्यपरिव्राजकवेषस्वीकारेण तस्याहरणेनिश्चयः । अर्जुनस्यचिन्तितंज्ञातवताश्रीकृष्णेनहसितेसहशायिन्यासत्यभामयाहासकारणप्रश्नेतांप्रत्यर्जुनवृत्तान्तकथनं । चारमुखेनार्जुनस्यतत्रागमनंश्रुत्वाश्रीकृष्णस्य तत्रगमनं । अर्जुनेनसहसंभाष्यश्रीकृष्णस्यपुनर्द्वारकागमनं ।

समाप्तमर्जुनतीर्थयात्रापर्व ॥ १५ ॥

अथ सुभद्राहरणपर्व ॥ १६ ॥ अध्यायाः ॥ ६ ॥

(२३९-२४४) ॥ श्लोकाः ॥ २९८ ॥

२३९	२१९	२८	रैवतकंप्रत्युत्सवार्थंश्रीकृष्णादीनांगमनं । तत्रार्जुनदर्शनं । सुभद्रादर्शनेनसंजातहृच्छयस्यार्जुनस्ययतिरूपेण सुभद्राहरणेश्रीकृष्णानुज्ञा । दूतैर्निवेदितवृत्तान्तेनयुधिष्ठिरेणतदभ्यनुज्ञानं ।
२४०	+	३१	द्वारकायाउपवनेवसतोयतिरूपधरस्यार्जुनस्यरैवतकपर्वतात्प्रतिनिवृत्तैर्यादवैर्दर्शनं । यतिःकुत्रवसत्विति यादवैःपृष्टेनबलरामेणसुभद्रागृहेवसत्वित्युक्तिः ।
२४१	+	९०	यतेःसुभद्रागृहेस्थापनं । सुभद्रयायतिंप्रत्यर्जुनादिकुशलप्रश्नः । अर्जुनेनस्वयाथार्थ्येकथितेमोहितायांसुभद्रायांरुक्मिण्याश्वश्रूसमीपेतद्वृत्तान्तकथनं । देवक्यासुभद्राश्वासनं । गूढंसुभद्रायाविवाहचिकीर्षयाश्रीकृष्णेनमहादेवपूजाव्याजेनसर्वैर्यादवैः सहान्तर्द्वीपगमनं ।
२४२	+	५२	सुभद्राविवाहः ।
२४३	+	३८	श्रीकृष्णरथमारुह्यसुभद्रयासहार्जुनस्येन्द्रप्रस्थंप्रतिगन्तुंयत्नः ।
२४४	२२० (९-३२)	५९	द्वारकायाबहिर्निर्गच्छतोर्जुनस्यविपृथुनासहयुद्धं । विपृथुंजित्वार्जुनस्यखाण्डवप्रस्थंप्रतिगमनं । युद्धोद्युक्तानांयादवानांबलरामवाक्यान्निवृत्तिः । बलरामस्यकोपः ।

समाप्तंसुभद्राहरणपर्व ॥ १६ ॥

अध्याय. छपा.अ. श्लोक.

अथ हरणाहरणपर्व ॥ १७ ॥ अध्यायाः ॥ ३ ॥

(२४५-२४७) ॥ श्लोकाः ॥ १५४ ॥

२४५ { २२१ / १-१२ } ३६ श्रीकृष्णेनबलरामसान्त्वनं । अर्जुनंप्रत्यानेतुंयादवानांगमनं । विपृथुवाक्यादर्जुनंदूरगतंज्ञात्वातेषांप्रतिनिवर्तनं । सुभद्रयासहार्जुनस्येन्द्रप्रस्थगमनं ।

२४६ { २२१ / १३-२५ } ३३ अर्जुनेनसुभद्रायागोपीवेषेणद्रौपदीसमीपेप्रेषणं। कृतनतिंसुभद्रांप्रतिदृष्टाद्रौपदीभ्यामाशीर्वादः । स्वपुरंप्रविष्टेनार्जुनेनभ्रातृभ्यःस्वकृततीर्थयात्रावृत्तान्तकथनं ।

२४७ { २२१ / २६-८९ } ८५ यादवैःसहश्रीकृष्णस्येन्द्रप्रस्थगमनं । वैवाहिकमहोत्सवकरणं । बलरामादीनांद्वारकांप्रतिनिवर्तनं । अभिमन्यूत्पत्तिः । द्रौपद्याःपञ्चपुत्रोत्पत्तिः ।

समाप्तंहरणाहरणपर्व ॥ १७ ॥

अथ खाण्डवदाहपर्व ॥ १८ ॥ अध्यायाः ॥ ६ ॥

(२४८-२५३) ॥ श्लोकाः ॥ २६३ ॥

२४८ २२२ ४५ युधिष्ठिरस्यराज्यपरिपालनप्रकारवर्णनं । श्रीकृष्णेनसहार्जुनस्ययमुनायांजलक्रीडा । ब्राह्मणस्वरूपस्याग्नेस्तत्रागमनं ।

२४९ २२३ ८५ श्रीकृष्णार्जुनौप्रत्यग्नेःप्रार्थना । श्वेतकिराजोपाख्यानं । अग्नेररुचिरोगप्राप्तिः । खाण्डवदाहार्थंयतितवतोऽग्नेस्तत्रत्यैःसत्वैर्निर्वापणं ।

२५० २२४ २१ अग्निनाश्रीकृष्णार्जुनौप्रत्यागमनं । अर्जुनेनाग्निंप्रतिदिव्यानांधनुरादीनां याचनं ।

२५१ २२५ ३८ अग्निनाऽर्जुनायरथादीनांसमर्पणं । खाण्डवदाहारंभः ।

२५२ २२६ २२ खाण्डवदाहंदृष्ट्वात्रस्तैर्देवैःप्रार्थितेनेन्द्रेणजलवर्षणं ।

२५३ २२७ ५२ इन्द्राभिवृष्टस्यजलस्यार्जुनेननिवारणं। पुत्रंनिगीर्याकाशमुत्पतन्त्यास्तक्षकभार्यायाअर्जुनेनशिरश्छेदः । इन्द्रेणतक्षकपुत्रस्याश्वसेनस्यमोचनं । इन्द्रस्यश्रीकृष्णार्जुनाभ्यांयुद्धं ।

समाप्तंखाण्डवदाहपर्व ॥ १८ ॥

अथ मयदर्शनपर्व ॥ १९ ॥ अध्यायाः ॥ ७ ॥

(२५४-२६०) ॥ श्लोकाः ॥ २०५ ॥

२५४ २२८ ४७ देवेषुपराजितेष्वशरीरवाणीश्रवणेनेन्द्रस्यनिवृत्तिः । अर्जुनेनमयायाभयदानं ।

२५५ २२९ ३४ मन्दपालोपाख्यानं । तस्यशार्ङ्ग्यां पुत्रचतुष्टयोत्पत्तिः। मन्दपालस्यस्वसुतात्पावकाद्वरलाभः ।

२५६ २३० २३ प्रज्वलदग्निदर्शनेनजरितायाःस्वपुत्रैस्संवादः ।

२५७ २३१ १८ जरितायाःस्थानान्तरगमनं ।

२५८ २३२ १५ जरितार्यादीनांचतुर्णांशार्ङ्गकाणांपरस्परंसंवादः । स्तुत्याप्रसन्नेनाग्निनातेभ्योऽभयदानं । शार्ङ्गकाणांप्रार्थनयाऽग्निनामार्जाराणांदाहः ।

२५९ २३३ ३७ पुत्रांश्चिन्तयन्तंमन्दपालंप्रतिलपितायाःसासूयवचनं । अग्निशान्त्यनन्तरमात्मदिदृक्षयाऽऽगतंमन्दपालंप्रतिभार्ययापुत्रैश्चोपालंभः ।

२६० २३४ २१ मन्दपालस्यसर्वैःसहान्यत्रगमनं । इन्द्रस्यस्वलोकगमनं । अग्नेःस्वस्थानगमनं । श्रीकृष्णार्जुनमयानांनदीकूले उपवेशनं ।

समाप्तंमयदर्शनपर्व ॥ १९ ॥

आदिपर्वसंपूर्ण ॥ १ ॥ अध्यायाः ॥ २६० ॥ श्लोकाः ॥ १०८८९ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

सभापर्व ॥ २ ॥

अत्रावान्तरपर्वाणि ॥ ८ ॥ अध्यायाः ॥ १०३ ॥ श्लोकाः ४३६७.

अथ मन्त्रपर्व ॥ १ ॥ अध्यायाः ॥ १९ ॥

(१-१९) ॥ श्लोकाः ॥ ८४८ ॥

अध्याय.	छापा.अ.	श्लोक.	
१	१	३२	मयेनार्जुनंप्रतिप्रत्युपकारस्वीकारप्रार्थना । श्रीकृष्णाज्ञयामयेनसभानिर्माणारम्भः ।
२	२	४०	द्वारकांगच्छतःश्रीकृष्णस्ययुधिष्ठिरादिभिःसारथ्यादिकरणं । अर्धयोजनपर्यन्तंगतानांश्रीकृष्णपाण्डवानांपरस्परानुज्ञयास्वस्वपुरगमनं ।
३	३	४०	सभानिर्माणसामग्र्यानयनायबिन्दुसरःप्रतिमयस्यगमनं । गदाशङ्खाभ्यांसहमयस्यप्रत्यागमनं । तेनभीमार्जुनाभ्यांगदाशङ्खदानंसभानिर्माणंच ।
४	४	४७	युधिष्ठिरस्यसभाप्रवेशः ।
५	५	१३२	नारदेनयुधिष्ठिरंप्रतिकुशलप्रश्नव्याजेनराजनीतिकथनं ।
६	६	१९	नारदेनेन्द्रादिसभावर्णनप्रतिज्ञानं ।
७	७	३१	इन्द्रसभावर्णनं ।
८	८	४१	यमसभावर्णनं ।
९	९	३४	वरुणसभावर्णनं ।
१०	१०	४१	कुबेरसभावर्णनं ।
११	११	६२	ब्रह्मसभावर्णनं ।
१२	१२	३९	हरिश्चन्द्रकथा । राजसूयप्रशंसा । युधिष्ठिरंप्रतिपाण्डुसन्देशकथनपूर्वकंनारदस्यगमनं ।
१३	१३	६०	युधिष्ठिरेणश्रीकृष्णंप्रतिराजसूयार्थंदूतप्रेषणं । श्रीकृष्णस्येन्द्रप्रस्थंप्रतिगमनं ।
१४	१४	८०	जरासन्धशौर्यकथनादिरूपंश्रीकृष्णवाक्यं ।
१५	१५	२७	राजसूयविषयेश्रीकृष्णयुधिष्ठिरभीमादीनांसंवादः ।
१६	१६	१७	युधिष्ठिरार्जुनयोर्भाषणं ।
१७	१७	६५	बृहद्रथराजोपाख्यानं । जरासन्धोत्पत्तिः ।
१८	१८	१३	जरायाःस्वस्वरूपमभिधायान्तर्धानं ।
१९	१९	२८	जरासन्धस्यराज्याभिषेकः । बृहद्रथस्यस्वर्गगमनं । श्रीकृष्णेनजरासन्धस्यस्वस्मिन्वैरकारणकथनं ।

समाप्तंमन्त्रपर्व ॥ १ ॥

अथ जरासन्धवधपर्व ॥ २ ॥ अध्यायाः ॥ ६ ॥

(२०-२५) ॥ श्लोकाः ॥ ३०९ ॥

अध्याय.	छापा.अ.	श्लोक.	
२०	२०	३०	भीमार्जुनाभ्यांसहश्रीकृष्णस्यमागधपुरगमनं ।
२१	२१	६१	जरासन्धसमीपगतानांश्रीकृष्णभीमार्जुनानांजरासन्धेनसहविवादः ।
२२	२२	४६	जरासंधस्यभीमेनसहयुद्धोद्यमः ।
२३	+	३७	श्रीकृष्णजरासन्धयोर्वैरकारणकथनं ।
२४	२३	३९	भीमजरासन्धयोःस्वस्त्ययनपूर्वकंयुद्धारंभः । श्रीकृष्णप्रोत्साहितस्यभीमस्यजरासन्धवधोद्यमः ।
२५	२४	९६	जरासन्धवधः । तेनबन्दीकृतानांराज्ञांश्रीकृष्णेनमोचनं । तत्पुत्रेणसहदेवेनश्रीकृष्णाज्ञयापितुरौर्ध्वदेहिककरणं । सहदेवंराज्येभिषिच्यश्रीकृष्णभीमार्जुनानामिन्द्रप्रस्थगमनं । जरासन्धवधश्रवणहृष्टेनयुधिष्ठिरेणपूजितस्यश्रीकृष्णस्यद्वारकागमनं ।

समाप्तंजरासन्धवधपर्व ॥ २ ॥

अथ दिग्विजयपर्व ॥ ३ ॥ अध्यायाः ॥ १० ॥

(२६-३५) ॥ श्लोकाः ॥ ४२४ ॥

अध्याय.	छापा.अ.	श्लोक.	
२६	२५	१३	संक्षेपेणार्जुनादीनांदिग्विजयकथा ।
२७	२६	२५	अर्जुनदिग्विजयेभगदत्तादिविजयः ।

अध्याय.	छापा.अ.	श्लोक.	
२८	२७	२९	अर्जुनेननानादेशविजयः ।
२९	२८	८०	अर्जुनेनकिंपुरुषादिखण्डविजयः ।
३०	२९	१६	भीमेनप्राचीदिग्विजयेपाञ्चालदेशगमनं ।
३१	३०	३१	प्राचींदिशंनिर्जित्यभीमस्यप्रतिनिवर्तनं ।
३२	३१	८२	दक्षिणदिग्विजयेसहदेवस्यशूरसेनादिविजयः । माहिष्मत्यांनीलेनसहयुद्धं । नीलस्याग्निसाहाय्यकरणकारणकथनं । सहदेवस्तुत्यातुष्टस्याग्नेराज्ञयानीलेनसहदेवस्यसत्कारः । विभीषणात्करग्रहणार्थंलङ्कांप्रतिघटोत्कचप्रेषणं ।
३३	+	३२	सहदेवस्यद्राविडपाण्ड्यदेशगमनं ।
३४	+	९६	स्मरणमात्रागतस्यघटोत्कचस्यलङ्काप्रेषणवृत्तान्तस्यविस्तरेणकथनं । श्रीकृष्णेगौरवेणविभीषणेनकरदानं । विभीषणात्करमाहृतवताघटोत्कचेनसह सहदेवस्यप्रतिनिवर्तनं ।
३५	३२	२०	नकुलस्यपश्चिमदिग्विजयः ।

समाप्तंदिग्विजयपर्व ॥ ३ ॥

अथ राजसूयपर्व ॥ ४ ॥ अध्यायाः ॥ ३ ॥

(३६–३८) ॥ श्लोकाः ॥ १०५ ॥

अध्याय.	छापा.अ.	श्लोक.	
३६	३३	५६	द्वारकायाआगतस्यश्रीकृष्णस्याज्ञयायज्ञसामग्रीसंपादनोपक्रमः । द्वैपायनेनऋत्विगानयनं । ब्राह्मणक्षत्रियाणामामन्त्रणायदूतप्रेषणं । धृतराष्ट्राद्यामन्त्रणायनकुलगमनं । यज्ञदीक्षा ।
३७	३४	२८	आमन्त्रितानांसर्वेषामागमनं ।
३८	३५	२१	आगतान्भीष्मादीन्संमान्यतत्तदधिकारेषुतेषांतेषांनियमनं । राजसूययागः ।

समाप्तं राजसूयपर्व ॥ ४ ॥

अथार्घाहरणपर्व ॥ ५ ॥ अध्यायाः ॥ २४ ॥

(३९–६२) ॥ श्लोकाः ॥ ८५० ॥

अध्याय.	छापा.अ.	श्लोक.	
३९	३६	५८	अभिषेचनदिनेब्राह्मणादीनामन्तर्वेदिप्रवेशः । भूभारक्षपणेनारदचिन्तनं । पूर्वंसंक्षिप्योक्तायाःश्रीकृष्णागमनकथायाःकिंचिद्विस्तरेणकथनं । सहदेवेनभीष्माज्ञयाश्रीकृष्णस्याग्रपूजाकरणं । शिशुपालेनश्रीकृष्णस्याग्रपूजाऽसहनं ।
४०	३७	३१	शिशुपालेनानेकधाश्रीकृष्णोपालंभनपूर्वकंसभातोनिर्गमनं ।
४१	३८	३४	शिशुपालंसान्त्वयन्तंयुधिष्ठिरंनिवार्य भीष्मेणश्रीकृष्णमाहात्म्यकथनं ।
४२	+	९	श्रीकृष्णस्याग्रपूजामसहमानानांशिरसिपदमाहितमितिसहदेववचश्श्रवणेनशिशुपालस्यकोपोदयः ।
४३	+	२७	श्रीकृष्णमहिम्नोविस्तरेणकथनायभीष्मंप्रतियुधिष्ठिरप्रार्थना । भीष्मेणविष्णोर्जगत्सृष्टिकथाकथनं ।
४४	+	२९	मधुकैटभवधकथा ।
४५	+	१७	वराहावतारकथा ।
४६	+	६६	हिरण्यकशिपुकथा । श्रीनृसिंहावतारः ।
४७	+	३१	वामनावतारः । त्रिविक्रमावतारः ।
४८	+	२४	दत्तात्रेयावतारः ।
४९	+	३१	परशुरामावतारः ।
५०	+	४७	रामावतारकथा ।
५१	+	५०	युधिष्ठिरेणविस्तरेणश्रीकृष्णकथाकथनप्रार्थना । भूम्यास्वभारावतरणंप्रार्थितस्यविष्णोर्भूमाववतारनिर्धारणं ।
५२	+	३६	विष्णुनाभूमावुत्पत्तयेदेवानामाज्ञापनं । श्रीकृष्णावतारः । शकटासुरवधः । यमलार्जुनभङ्गः ।
५३	+	३३	श्रीकृष्णेनकालियमर्दनं । बलरामेण धेनुकासुरहननं । श्रीकृष्णेनगोवर्धनोद्धरणं । अरिष्टासुरादिहननं । कंसहननं ।
५४	+	३३	श्रीकृष्णेनसान्दीपिन्याचार्याद्विद्याभ्यासः । सान्दीपिनिनागुरुदक्षिणात्वेनमृतपुत्रानयनंचोदितेनश्रीकृष्णेन स्वोज्जीवितस्यपुत्रस्यगुरवेसमर्पणं । जरासन्धपराजयः ।
५५	+	४१	श्रीकृष्णस्यमधुरांत्यक्त्वाद्वारकागमनं । नरकासुरप्रतापवर्णनं । नरकासुरवधः । धरणीदेव्याश्रीकृष्णायकुण्डलसमर्पणं ।
५६	+	४९	श्रीकृष्णस्यनरकंनिहत्यतदीयधनरत्नादिकंशतोत्तरषोडशसहस्रस्त्रीसहितंमणिपर्वतंचगरुडमारोप्यस्वर्गलोकग-

अध्याय.	झपा.अ.	श्लोक.	
			मनं । अदित्यैकुण्डलादिसमर्पणं । शच्यासत्कृतयासत्यभामयासहद्वारकांप्रतिप्रत्यागमनं ।
५७	+	६३	द्वारकावर्णनं । रुक्मिणीसत्यभामादिगृहवर्णनं । श्रीकृष्णेनस्वर्गादानीतस्यपारिजातस्यप्रतिष्ठापनं ।
५८	+	३३	बन्धुभ्योवित्तादिदानं । इन्द्रस्यश्रीकृष्णचरित्रप्रशंसनपूर्वकंद्वारकातःस्वलोकगमनं ।
५९	+	१८	श्रीकृष्णेनाहृतविभूतिविलोकनायदेवकीरुक्मिण्यादिस्त्रीणामागमनं । स्वदर्शनार्थमागतायायशोदासुतायाः श्रीरामकृष्णाभ्यांसत्कारः ।
६०	+	२८	बाणासुरेणस्वतनययोषयासहगूढंरममाणस्यानिरुद्धस्यकारागृहप्रापणं । नारदाद्विदिततद्वृत्तान्तेनश्रीकृष्णेनबाणंनिर्जित्योषयासहानिरुद्धानयनं ।
६१	+	३४	भीष्मेणश्रीकृष्णमाहात्म्योपसंहारः ।
६२	३९	१८	भीष्मवाक्योपरमेसहदेवेनश्रीकृष्णपूजाविरुद्धभाषिणोवधेप्रतिज्ञातेराज्ञांतूष्णींभावः । सहदेवमूर्ध्निपुष्पवृष्टिः । नारदेनश्रीकृष्णानर्चकस्यनिन्दनं । सहदेवेनसभ्यपूजनपूर्वकंकर्मसमापनं । शिशुपालेनयज्ञविघातायराज्ञां प्रोत्साहनं ।

समामर्घाहरणपर्व ॥ ५ ॥

अथ शिशुपालवधपर्व ॥ ६ ॥ अध्यायाः ॥ १० ॥

(६३–७२) ॥ श्लोकाः ॥ ४०२ ॥

अध्याय.	झपा.अ.	श्लोक.	
६३	४०	१५	राज्ञांरणोद्यमाद्बिभ्यतोयुधिष्ठिरस्यभीष्मेणसमाश्वासनं ।
६४	४१	५२	शिशुपालेनभीष्मस्तुतकृष्णचरित्रापहसनपूर्वकंभीष्मोपालंभनं ।
६५	४२	२१	श्रीकृष्णनिन्दाश्रवणेनशिशुपालजिघांसयोत्पततोभीमस्यभीष्मेणनिवर्तनं ।
६६	४३	२५	भीष्मेणशिशुपालस्यबाल्यचरित्रकथनं ।
६७	४४	४२	शिशुपालेनभीष्मगर्हणं । इतरराजानांप्रशंसनंच । भीष्मेणराज्ञामपमानकरणं ।
६८	४५ (१–२०)	३९	भीष्मवाक्यात्कुपितेनशिशुपालेनसर्वान्राज्ञःसंनाह्ययुद्धायकृष्णाह्वानं । श्रीकृष्णेनस्वस्मिञ्शिशुपालेनकृतानामपराधानांकथनं । श्रीकृष्णभीत्यासर्वपार्थिवपलायनं । एकाकिनःशिशुपालस्यश्रीकृष्णंप्रतियुद्धायागमनं ।
६९	+	५३	शिशुपालेयुद्धायसन्नद्धेसत्युत्पातदर्शनेनभीतस्ययुधिष्ठिरस्यप्रश्नेनारदेनतत्फलकथनं ।
७०	४५ (२१–३६)	६६	श्रीकृष्णशिशुपालयोर्युद्धं । शिशुपालवधः ।
७१	+	५०	विस्तरेणराजसूयवर्णनं ।
७२	४५ (३७–६८)	३९	युधिष्ठिरेणव्यासादीनांपूजनं । राज्ञां युधिष्ठिरमामन्त्र्यस्वदेशगमनं । श्रीकृष्णस्यद्वारकांप्रतिगमनं ।

समाप्तं शिशुपालवधपर्व ॥ ६ ॥

अथ द्यूतपर्व ॥ ७ ॥ अध्यायाः ॥ २२ ॥

(७३–९५) ॥ श्लोकाः ॥ ९९२ ॥

अध्याय.	झपा.अ.	श्लोक.	
७३	४६	३६	व्यासंप्रतियुधिष्ठिरेणोत्पातफलप्रश्नेतेनतत्कथनपूर्वकंकैलासगमनं । व्यासोक्तंभ्रातृपुनिर्वेद्यशोचतोयुधिष्ठिरस्यार्जुनेनसमाश्वासनं । युधिष्ठिरेण समयकरणं ।
७४	४७	३९	युधिष्ठिरसभायांदुर्योधनेनिर्जलदेशेजलभ्रमेणपरिधानमुत्कर्षतिसतितथा सजलदेशेस्थलभ्रान्त्याऽनवधानगमनेनजलेपततिचसतिभीमादिभिरुपहासः । चिन्तातान्तंदुर्योधनंप्रतिशकुनिनाचिन्ताहेतुप्रश्नेदुर्योधनेनतत्कथनपूर्वकंधृतराष्ट्रेस्वदुःखनिवेदनाय शकुनिंप्रतिचोदनं ।
७५	४८	२५	शकुनिनापाण्डवानांपौरुषेणाजय्यत्वकथनपूर्वकंद्यूतेनजेष्यामीतिसमाश्वासनं ।
७६	४९	८५	शकुनिनादुर्योधनस्यचिन्तयाकार्श्यादिकंबोधितेनधृतराष्ट्रेणदुर्योधनंप्रतिचिन्ताकारणप्रश्नः । दुर्योधनेनतत्कथनपूर्वकंधृतराष्ट्रंप्रतिद्यूताभ्यनुज्ञानप्रार्थनं । धृतराष्ट्रेणद्यूतसभानिर्माणाज्ञापनपूर्वकंपाण्डवानयनायविदुरचोदनं ।
७७	५०	३८	विस्तरेणद्यूतवृत्तान्तकथनं । विस्तरेणद्यूतनिषेधनं । दुर्योधनेनधृतराष्ट्रंप्रतिभीमादिकृतस्वापहासादिकथनं ।

अध्याय.	ज्ञपा.अ.	श्लोक.	
७८	५१, ५२	१२८	दुर्योधनेनधृतराष्ट्रसमीपेयुधिष्ठिराय नानादेशीयराजोपाहृतोपायनवर्णनं ।
७९	५३	२६	दुर्योधनेनधृतराष्ट्रसमीपेराजसूयवर्णनं ।
८०	५४	१४	धृतराष्ट्रेणदुर्योधनंप्रतिपाण्डवेषुद्रेषनिषेधनं ।
८१	५५	२१	दुर्योधनेनधृतराष्ट्रोक्तिप्रतिकूलभाषणं।
८२	५६, ५७	२९	शकुनिनाद्यूतायदुर्योधनप्रोत्साहनं । धृतराष्ट्राज्ञयासभानिर्माणं । पाण्डवानयनायविदुरप्रेषणं ।
८३	५८	६३	विदुरस्येन्द्रप्रस्थगमनं । पाण्डवानां हास्तिनपुरगमनं ।
८४	५९	२१	शकुनियुधिष्ठिरयोःसंवादः । द्यूतनिर्धारणं ।
८५	६१	४०	भीष्मद्रोणादीनांद्यूतसभाप्रवेशः । द्यूतोपक्रमः । युधिष्ठिरेणपणीकृतानां सर्ववस्तूनांशकुनिनाऽपहारः ।
८६	६२, ६३	२७	विदुरेणधृतराष्ट्रंप्रतिदुर्योधननिन्दापूर्वकंद्यूतोपरमचोदनं ।
८७	६४	२०	दुर्योधनेनविदुरोपालंभः । विदुरेण धृतराष्ट्रस्यहितोपदेशः ।
८८	६५	४६	सपत्नीभ्रातृकस्ययुधिष्ठिरस्यशकुनिना पराजयः ।
८९	६६, ६७	६७	दुश्शासनेनद्रौपद्याःसभांप्रत्यानयनं । सभ्यान्प्रतिद्रौपदीप्रश्नाः ।
९०	६८	९२	भीमसेनवचनं । विकर्णवचनं । दुश्शासनेनद्रौपदीवस्त्रापहारः । श्रीकृष्णप्रसादाद्द्रौपद्याःवस्त्रराशिप्रादुर्भावः । विदुरवचनं ।
९१	६९	२१	द्रौपदीवचनं । युधिष्ठिरेणैवद्रौपदीप्रश्नस्योत्तरंवक्तव्यमितिभीष्मवचनं ।
९२	७०, ७१, १-२१	८४	दुर्योधनवचनं । दुर्योधनेनद्रौपदींप्रतिनिजोरौप्रदर्शितेभीमेनतद्भेदनप्रतिज्ञा । अर्जुनादिभिःकर्णादिहननप्रतिज्ञा । द्रौपद्यांदुर्योधनादीनांशापदानसमयेऽन्तरिक्षात्पुष्पवृष्टिः ।
९३	७१, २२-३६	३५	कुप्यतोर्जुनस्ययुधिष्ठिरेणपरिसान्त्वनं। धृतराष्ट्रेणवरंवरयेतिद्रौपदींप्रतिचोदनं। तत्प्रार्थनयाधृतराष्ट्रेणयुधिष्ठिरादीनामदासत्वकथनं ।
९४	७२	१७	कर्णप्रलपितं । क्रुद्धंभीमंनिवार्ययुधिष्ठिरस्यधृतराष्ट्रसमीपगमनं ।
९५	७३	१८	धृतराष्ट्रानुज्ञयासभ्रातृकस्ययुधिष्ठिरस्येन्द्रप्रस्थगमनं ।

समाप्तं द्यूतपर्व ॥ ७ ॥

अथानुद्यूतपर्व ॥ ८ ॥ अध्यायाः ॥ ८ ॥

(९६–१०३) ॥ श्लोकाः ॥ ४३७ ॥

अध्याय.	ज्ञपा.अ.	श्लोक.	
९६	७४, १-१६	७१	दुर्योधनेनपाण्डवानांशौर्यकथनं । दुर्योधनेनधृतराष्ट्रंप्रतिकार्तवीर्यार्जुनकथाकथनं ।
९७	७४, १७-२७, ७५	१०२	कार्तवीर्यार्जुनकथासमापनं । दुर्योधनबोधनेनधृतराष्ट्रस्यपुनर्द्यूतायपाण्डवानयनाभ्यनुज्ञा ।
९८	७६	२९	निजनगरंगच्छतोयुधिष्ठिरस्यमध्येमार्गेदूताह्वानेनपुनःप्रतिनिवृत्यद्यूतसभाप्रवेशः । अनुद्यूतेपियुधिष्ठिरस्यशकुनिनापराजयः ।
९९	७७	४८	वनायप्रस्थितान्पाण्डवान्प्रतिदुश्शासनकृतापहासः । पाण्डवानांबहुप्रतिज्ञाकरणपूर्वकंधृतराष्ट्रसमीपगमनं ।
१००	७८	२५	युधिष्ठिरेणवनगमनायभीष्माद्यामन्त्रणं । पाण्डवान्प्रतिविदुरवचनं ।
१०१	७९	६७	पाण्डवानांवनप्रस्थानेनखिद्यतांपौराणांवचनानि । द्रौपदींप्रतिकुन्तीवचनानि ।
१०२	८०	५६	विदुरेणधृतराष्ट्रंप्रतिपाण्डवानांवनप्रस्थानसमयेचेष्टाविशेषकथनपूर्वकंतत्तदभिप्रायाविष्करणं । द्रोणेनदुर्योधनायहितोपदेशः ।
१०३	८१	३९	धृतराष्ट्रसंजयसंवादः ।

समाप्तमनुद्यूतपर्व ॥ ८ ॥

सभापर्वचसंपूर्णं ॥ २ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

वनपर्व ॥ ३ ॥

अत्रावान्तरपर्वाणि ॥ २१ ॥ अध्यायाः ॥ ३१५ ॥ श्लोकाः ॥ १२४७६ ॥

अध्याय.	छापा.अ.	श्लोक.	
			अथ किर्मीरवधपर्व ॥ १ ॥ अध्यायाः ॥ ११ ॥ (१-११) ॥ श्लोकाः ॥ ४६६ ॥
१	१	४७	द्यूतजितानांपाण्डवानांवनंप्रतिप्रस्थानं । पौरैःपाण्डवानुगमनं । युधिष्ठिरेणतेषांप्रतिनिवर्तनं । पाण्डवानांसायंगङ्गातीरगमनं ।
२	२	८४	युधिष्ठिरेणस्वानुयायिनोब्राह्मणान्प्रतितद्भरणस्यदुष्करत्वकथनपूर्वकंप्रतिनिवर्तनप्रार्थना । ब्राह्मणैःस्वयमेवात्मभरणपूर्वकंसहवासनिश्चयेकथितेयुधिष्ठिरेणस्वस्यतद्भरणाशक्तिचिन्तनेनविषादाधिगमः । शौनकेनतंप्रतितपसाब्राह्मणभरणशक्तिसंपादनचोदना ।
३	३	८९	युधिष्ठिरेणसूर्यस्तुतिः । स्तोत्रप्रसन्नेनसूर्येणयुधिष्ठिरायाक्षयपात्रदानं ।
४	४	२६	हितंब्रूहीतिधृतराष्ट्रेणपृष्टेसतिविदुरेणपाण्डवानांपुनाराज्येस्थापनविधानं । ततोधृतराष्ट्रधि तेनविदुरेणपाण्डवान्प्रतिप्रस्थानं ।
५	५	२२	विदुरस्यकाम्यकवनेपाण्डवसमागमः । तत्रस्वागमनकारणनिवेदनं ।
६	६	२५	विदुरवियोगखिन्नेनधृतराष्ट्रेणतदाह्वानायसञ्जयप्रेषणं । विदुरेणपुनर्धृतराष्ट्रंप्रत्यागमनं ।
७	७	२४	विदुरस्यपुनरागमनेनखिद्यतादुर्योधनेनकर्णादिभिस्सहालोचनं । कर्णादिषुपाण्डवजिघांसयाप्रस्थितेषुतदासमागतेनव्यासेनतेषांप्रतिषेधनं ।
८	८	१२	व्यासेनधृतराष्ट्रंप्रतिपाण्डवैस्सहशमविधानं ।
९	९	२३	व्यासेनसुरभ्युपाख्यानकथनं ।
१०	१०	३९	धृतराष्ट्रेणदुर्योधनानुशासनंप्रार्थितेनव्यासेनतत्रागमिष्यन्तंमैत्रेयंप्रतितत्प्रार्थनाविधानपूर्वकंस्वावासगमनं । तत्रमैत्रेयागमनं । तद्वाक्यश्रवणेनदुर्योधनेनोर्वास्फालनपूर्वकंहासेमैत्रेयेणभीमगदयातवोरुभेदोभूयादितिशापदानं ।
११	११	७५	मैत्रेयचोदितेनविदुरेणधृतराष्ट्रायभीमसेनकृतकिर्मीरवधप्रकारकथनं ।
			समाप्तं किर्मीरवधपर्व ॥ १ ॥
			अथार्जुनाभिगमनपर्व ॥ २ ॥ अध्यायाः ॥ २६ ॥ (१२-३७) ॥ श्लोकाः ॥ १०९५ ॥
१२	१२	१३१	श्रीकृष्णेनस्वीयैःसहपाण्डवसमीपगमनं । अर्जुनेनश्रीकृष्णस्तवनं । स्वदुःखनिवेदनपूर्वकंरुदन्त्याद्रौपद्याःश्रीकृष्णेनसमाश्वासनं ।
१३	१३	१७	श्रीकृष्णेनयुधिष्ठिरंप्रतितद्व्यसनस्यद्वारकायांस्वस्यासांनिध्यहेतुकत्वकथनेनसमाश्वासनं ।
१४	१४	२२	श्रीकृष्णेनसाल्वेनसहयुद्धस्यस्वानागमनेहेतुत्वकथनं ।
१५	१५	२२	श्रीकृष्णेनयुधिष्ठिरंप्रतिसाल्वसमागमसमयेउग्रसेनकृतद्वारकारक्षणप्रकारकथनं ।
१६	१६	३३	साल्वयादवयुद्धवर्णनं ।
१७	१७	२५	साल्वप्रद्युम्नयुद्धवर्णनं ।
१८	१८	३३	साल्वबाणाभिहत्याप्रद्युम्नेमूर्छितेसारथिनारणाङ्गणादन्यतोरथयापनं । ततः प्रतिबुद्धेनप्रद्युम्नेनसारथिंप्रतिसविषादोक्तिः ।

अध्याय.	छपा.अ.	श्लोक.	
१९	१९	२७	प्रद्युम्नपराजितस्यसाल्वस्यरणादपयानं ।
२०	२०	४२	श्रीकृष्णेनयुधिष्ठिरंप्रतिस्वस्यसाल्वेनसहयुद्धप्रकारकथनं ।
२१	२१	३०	श्रीकृष्णसाल्वयोर्युद्धं । साल्वेनस्वमायासृष्टस्यवसुदेवस्यशिरश्छेदनप्रदर्शनेनश्रीकृष्णस्यव्यामोहनं । ततोमुहूर्तात्प्रतिबुद्धस्यश्रीकृष्णस्यस्वानुभूतस्य मायिकत्वाध्यवसायः ।
२२	२२	५४	श्रीकृष्णेनस्वेनसाल्वसंहारकथनं । ततःश्रीकृष्णस्यसुभद्राभिमन्युभ्यांसह द्वारकागमनं । धृष्टद्युम्नेनद्रौपदेयानादायस्वपुरगमनं ।
२३	२३	१६	पाण्डवैःसमाश्वासनपूर्वकंपौराणांप्रतिनिवर्तनं ।
२४	२४	२६	पाण्डवानांद्वैतवनप्रवेशः ।
२५	२५	१९	मार्कण्डेयेनपाण्डवानुपेत्यधर्मोपदेशपूर्वकमुत्तरदिग्गमनं ।
२६	२६	२५	दाल्भ्येनयुधिष्ठिरंप्रतिब्राह्मणस्यक्षत्रवृद्धिकारणत्वकथनं । महर्षीणांयुधिष्ठिराभिगमनं ।
२७	२७	३९	द्रौपद्याःसविषादवचनं ।
२८	२८	३८	द्रौपद्यायुधिष्ठिरंप्रतिकालभेदेनक्षमाकोपयोरवश्याश्रयणीयत्वकथनं । तदुदाहरणतयाबलिप्रह्लादसंवादानुवादः । प्रकृतेकोपस्यावश्याश्रयणीयत्वोक्तिः ।
२९	२९	५५	युधिष्ठिरेणक्रोधेबहुदोषोद्भावनपूर्वकं क्रोधगर्हणं ।
३०	३०	४३	द्रौपद्यायुधिष्ठिरंप्रतिधर्मादितोपिविधेरेवप्राबल्योपपादनं ।
३१	३१	४२	युधिष्ठिरेणद्रौपदींप्रतिधर्मस्यसाफल्योपपादनं ।
३२	३२	६२	द्रौपद्यायुधिष्ठिरंप्रतिब्राह्मणोक्तबृहस्पतिनीतिकथनं ।
३३	३३	९०	भीमेनयुधिष्ठिरंप्रतिनीतिव्युत्पादनपूर्वकंयुद्धेनराज्यहरणस्यकर्तव्यत्वोक्तिः।
३४*	३३	२२	युधिष्ठिरेणभीमंप्रतिस्वेनप्रतिज्ञायादुस्त्यजत्वोक्तिपूर्वकंप्रतिज्ञातकालावसा'नप्रतिपालनविधानं ।
३५	३५	३५	भीमेनयुधिष्ठिरंप्रतिसोपपत्तिकंवनवासापूरणेनैवदुर्योधननिग्रहचोदना ।
३६	३६	४५	तत्कालागतेनव्यासेनयुधिष्ठिरायप्रतिस्मृतिविद्योपदेशः । युधिष्ठिरेणव्यासवचनात्परिजनैःसहद्वैतवनात्काम्यकवनगमनं ।
३७	३७	९४	युधिष्ठिरेणार्जुनायव्यासोपदिष्टमन्त्रोपदेशपूर्वकमस्त्रग्रहणायस्वर्गंप्रतितस्यप्रस्थापनं । प्रस्थितेनार्जुनेनेन्द्रकीलपर्वतेतपश्चरणं । तत्रमुनिरूपस्येन्द्रस्यदर्शनं । दिव्यास्त्रदानंयाचितेनेन्द्रेणार्जुनंप्रतितपसारुद्रप्रसादनानन्तरमस्त्रलाभायस्वर्गागमनचोदना ।

समाप्तमर्जुनाभिगमनपर्व ॥ २ ॥

अथ कैरातपर्व ॥ ३ ॥ अध्यायाः ॥ ४ ॥

(३८-४१) ॥ श्लोकाः ॥ १९८ ॥

अध्याय.	छपा.अ.	श्लोक.	
३८	३८	३५	अर्जुनेनहिमवच्छिखरेतपश्चरणं । पार्थतपोभीरुभिर्महर्षिभिःप्रार्थितेनमहादेवेनाश्वासनपूर्वकमृषीणांप्रतिनिवर्तनं ।
३९	३९	८५	किरातरूपिणारुद्रेणसहार्जुनस्ययुद्धं । तद्युद्धतोषितेनतेनार्जुनाश्वासनं ।
४०	४०	२८	महादेवेनपार्थायस्वग्रस्तगाण्डीवादिदानंपाशुपतास्त्रप्रदानंच ।
४१	४१	५०	यमवरुणकुबेरैरर्जुनायास्त्रप्रदानं । अर्जुनंप्रतिशक्रेणस्वर्गागमनचोदना।

समाप्तं कैरातपर्व ॥ ३ ॥

अथेन्द्रलोकाभिगमनपर्व ॥ ४ ॥ अध्यायाः ॥ ७ ॥

(४२-४८) ॥ श्लोकाः ॥ ३०६ ॥

अध्याय.	छपा.अ.	श्लोक.	
४२	४२	४२	पार्थेनमातलिसमानीतरथारोहणेन स्वर्गगमनं ।
४३	४३, ४४	४३	इन्द्रेणार्जुनस्यसबहुमानंस्वार्धासनारोपणं ।
४४	४५, ४६	७९	उर्वश्यामर्जुनस्यानुरागोत्प्रेक्षिणाशक्रेणचित्रसेनद्वारातस्यास्तंप्रतियापनं । तयास्वप्रार्थनांव्यर्थीकृतवतेपार्थायक्लीबोभवेतिशापः । शक्रेणतच्छापस्याज्ञातवासमात्रोपयोगितयापर्यवसानं।
४५	४७	४३	इन्द्रेणस्वर्गमागतंलोमशंप्रतिपार्थमहिमानुवर्णनपूर्वकंयुधिष्ठिरायतद्वृत्तान्तकथनप्रार्थना ।
४६	४८, ४९	४१	अर्जुनस्यपाशुपतास्त्रलाभस्वर्लोकगमनादिश्रवणेनपरिखिद्यताधृतराष्ट्रेण संजयाग्रेस्वपुत्रान्प्रतिपरिशोचनं ।

अध्याय.	छपा.अ.	श्लोक.	
४७	५०	१२	पाण्डवानांवनेभोज्यवस्तुकथनं ।
४८	५१	४६	धृतराष्ट्रेणपुत्रान्प्रतिपरिशोचनं । सञ्जयेनधृतराष्ट्रंप्रतिस्वस्यचारमुखात्पाण्डवदिदृक्षयावनंगतानांश्रीकृष्णादीनांदुर्योधनादिवधप्रतिज्ञाश्रवणकथनं ।

समाप्तमिन्द्रलोकाभिगमनपर्व ॥ ४ ॥

अथ नलोपाख्यानपर्व ॥ ५ ॥ अध्यायाः ॥ २९ ॥

(४९–७७) ॥ श्लोकाः ॥ ११२१ ॥

अध्याय.	छपा.अ.	श्लोक.	
४९	५२	६४	भीमयुधिष्ठिरसंवादसमयेबृहदश्वागमनं । युधिष्ठिरंप्रतिबृहदश्वेननलोपाख्यानकथनारंभः ।
५०	५३	३३	नलेनउपवनेहंसग्रहणं । हंसेनदमयन्तीसमीपेनलगुणानुवर्णनं ।
५१	५४	३१	नारदेनेन्द्रादीन्प्रतिदमयन्तीस्वयंवरकथनं । तत्स्वयंवरार्थमागच्छद्भिरिन्द्रादिभिःपथिदृष्टस्यनलस्यदमयन्तीघटनायांदूत्येनप्रेषणं ।
५२	५५	२६	नलेनदमयन्त्यामिन्द्रादिनिदेशकथनं।
५३	५६	३१	नलदमयन्तीसंवादः । नलेनेन्द्रादीन्प्रतिदमयन्तीवचननिवेदनं ।
५४	५७	५०	स्वयंवरमण्टपेइन्द्राग्नियमवरुणैर्नलरूपधारणेनतत्पार्श्वेसमुपवेशनं । दमयन्त्यास्वगुणसंतुष्टेन्द्रादिप्रसादेननलस्यैववरणं ।
५५	५८	१५	दमयन्तीविवाहानन्तरंदिवंगच्छद्भिरिन्द्रादिभिर्मध्येमार्गेकलिद्वापरयोर्दर्शनं । तैःस्वयंवरेदमयन्त्यानलवरणंनिवेदितेनद्वापरद्वितीयेनकलिनानलपराभवप्रतिज्ञानं ।
५६	५९	२०	कलिचोदनयापुष्करेणनलाह्वानं । नलपुष्करयोरक्षदेवनं ।
५७	६०	२६	द्यूतेनलस्यपराजयः । दमयन्तीचोदितेनसारथिनातत्पुत्रमिथुनस्यभीमनगरप्रापणं ।
५८	६१	३७	नलदमयन्त्योर्वनप्रवेशः । हिरण्मयशकुनिभिर्नलवस्त्रापहरणं ।
५९	६२	३०	नलेनस्वपन्त्यादमयन्त्यावस्त्रार्धच्छेदनपूर्वकंतांपरित्यज्यापयानं ।
६०	६३	३९	दमयन्त्याअजगरेणग्रहणं । व्याधेनाजगरवधः । तांकामयमानस्यव्याधस्यदमयन्तीपातिव्रत्यमहिम्नामरणं ।
६१	६४	१३२	नलमन्वेषयन्त्यादमयन्त्यावनमध्येहस्त्यश्वरथसंकुलजनसार्थदर्शनं । तथा सार्थेनसंभाषणं ।
६२	६५	७६	दमयन्त्यासार्थेनसहचेदिराजपुरंप्रतिप्रस्थानं । वनमध्येसरस्तीरशायिनःसार्थस्यवनगजयूथेनोपमर्दः । कोलाहलश्रवणेनदमयन्त्याजागरणं । हृतावशिष्टेनसार्थेनसहदमयन्त्याचेदिराजपुरगमनं । राजमात्रादमयन्त्याः स्वान्तःपुराधिवासनं ।
६३	६६	२६	दमयन्तींपरित्यज्याटव्यामटन्तंनलंप्रतिवनवह्निवेष्टितेनकार्कोटकेनात्मपरिरक्षणप्रार्थना । दावाग्नितोमोचितेनकार्कोटकेननलगात्रेदंशनेनवैरूप्यकरणं । निजरूपप्राप्त्यावुपायोपदेशश्च ।
६४	६७	२०	कार्कोटकवचनान्नलेनायोध्यायांबाहुकइतिस्वनामनिर्देशपूर्वकमृतुपर्णनृपसमीपोपसर्पणं । ऋतुपर्णेनतस्यसारथ्येनियोजनं ।
६५	६८	४४	भीमराजेननलदमयन्त्यन्वेषणायनानादेशेषुब्राह्मणानांप्रस्थापनं । सुदेवनाम्नाविप्रेणचेदिराजगृहेदमयन्तीदर्शनं । विप्रेणसहबाष्पंभाषमाणांदमयन्तींदृष्ट्वाराजमात्राविप्रंप्रतिदमयन्त्याःकुलशीलादिप्रश्नः ।
६६	६९ (१–२८)	२८	सुदेवेनदमयन्त्यास्तत्वंनिवेदितयाराजमात्रापितृरूपलाञ्छनेनतत्त्वनिर्धारणपूर्वकंतस्याःपितृपुरंप्रतिप्रापणं ।
६७	६९ (२९-५०)	२२	दमयन्तीप्रेषितैर्विप्रैस्तत्रतत्रनलान्वेषणम् ।
६८	७०	२८	नलान्वेषिणापर्णादनाम्नाद्विजेनऋतुपर्णगृहेबाहुकसकाशेदमयन्तीवचनानुवादः । तेनदमयन्तीवचनस्योत्तरदानं । पर्णादेनविदर्भान्पुनरागत्यदमयन्तीसकाशेबाहुकवचननिवेदनं । दमयन्तीचोदनयासुदेवेनायोध्यामेत्यऋतुपर्णसकाशेदमयन्त्याःपुनःस्वयंवरोभवितेतिकीर्तनं ।
६९	७१	३९	ऋतुपर्णेनदमयन्तीस्वयंवरायबाहुकंसारथ्येनियोज्यवार्ष्णेयेनसहविदर्भा-

अध्याय.	झपा.अ.	श्लोक.	
			न्प्रतिप्रस्थानं । वार्ष्णेयेनबाहुकेसारथ्यर्कौशल्यदर्शनेननलत्वसंभावना ।
७०	७२	४४	बाहुकस्यसारथ्यसामर्थ्यविस्मितेनऋतुपर्णेनतंप्रतिपुञ्जीभूतवस्तुपरिसङ्ख्यानेस्वीयसामर्थ्यनिवेदनं । वृक्षशाखास्थपर्णपुनःपरीक्षणेनविस्मितेननलेनाश्वहृदयविद्यादानप्रतिज्ञानेनतदीयाक्षहृदयादिविद्यास्वीकरणम् । ततोनलदेहाद्बहिर्निःसृतेनकलिनातस्मैवरदानपूर्वकंविभीतकवृक्षप्रवेशः ।
७१	७३	३६	ऋतुपर्णेकुण्डिनपुरंप्रविष्टेतद्रथघोषश्रवणेनदमयन्त्यातत्सारथौनलत्वसंभावना । ततस्तत्वजिज्ञासयानलंप्रतिदूत्याःकेशिन्याःप्रस्थापनम् ।
७२	७४	३१	दमयन्तीप्रेषितयाकेशिन्याबाहुकेनसंभाष्यदमयन्त्यैभाषणकालिकबाहुकविकारादिकथनम् ।
७३	७५	२८	केशिन्याबाहुकस्यजलाग्न्युत्पादनाद्यद्भुतकर्मनिवेदितयादमयन्त्यापुनःपरीक्षणायतंप्रतिपुत्रयोःप्रेषणं । बाहुकेनसबाष्पंपुत्रयोःपरिरंभणं । केशिनींप्रतिस्वकर्मणःकारणान्तरकथनेनापह्नवश्च ।
७४	७६	५८	दमयन्त्याबाहुकस्य केशिनीद्वारास्वगृहानयनं । बाहुकदमयन्त्योःसंवादः । बाहुकेनस्वस्यनलत्वकीर्तनपूर्वकंकार्कोटकानुस्मरणेनतद्दत्तवस्त्रपरिधानेतस्यनिजरूपप्रादुर्भावः । ततोनलंप्रत्यभिजानन्त्यादमयन्त्यातत्परिरंभणं ।
७५	७७	२०	परेद्युःप्रभातेभीमराजेनस्नातालंकृतयोर्नलदमयन्त्योर्दर्शनं । ऋतुपर्णेननलंक्षमापयित्वातस्मादश्वविद्यापरिग्रहणपूर्वकंस्वपुरंप्रतिगमनं ।
७६	७८	३४	नलेनपुनःस्वपुरंप्रत्यागमनं । तथापुनर्द्यूतेनपुष्करंपराजित्यतस्मात्स्वपुरंप्रतियापनं ।
७७	७९	५३	पुष्करंनिष्कासितवतानलेनकुण्डिनपुरात्सपुत्रायादमयन्त्या आनयनपूर्वकंप्रजापालनेनसुखवासः । बृहदश्वेनयुधिष्ठिरायाक्षविद्योपदेशः । संक्षेपेणहरिश्चन्द्रोपाख्यानकथनं ।

समाप्तं नलोपाख्यानपर्व ॥ ५ ॥

अथ तीर्थयात्रापर्व ॥ ६ ॥ अध्यायाः ॥ ८० ॥

(७८–१५७) ॥ श्लोकाः ॥ २९१२ ॥

अध्याय.	झपा.अ.	श्लोक.	
७८	८०	३१	अर्जुनविनाभावेनकाम्यकवनेनिवासमरोचयानैःपाण्डवैस्तस्मान्निर्गमननिर्धारणं ।
७९	८१	२६	युधिष्ठिरेणतत्रागतंनारदंप्रतिभूप्रादक्षिण्येनतीर्थयात्राफलप्रश्नः । नारदेनतत्कथनायपुलस्त्यभीष्मसंवादानुवादारंभः ।
८०	८२	१२८	पुलस्त्येनभीष्मंप्रतिपुष्करादितीर्थमहिमानुवर्णनं ।
८१	८३	२०७	नानातीर्थमहिमानुवर्णनं ।
८२	८४	१६३	नानातीर्थमहिमानुवर्णनं ।
८३	८५	१३१	नारदेनयुधिष्ठिरंप्रतिभीष्मायपुलस्त्योदिततीर्थमहिमानुवादपूर्वकमिष्टदेशागमनं ।
८४	८६	२१	युधिष्ठिरेणधौम्यंप्रत्यर्जुनेनविनास्वस्यकाम्यकवनवासानभिरुचिकथनपूर्वकंनिवासायस्थानान्तरकथनप्रार्थना ।
८५	८७	२८	धौम्येनयुधिष्ठिरायप्राचीस्थनानातीर्थकथनं ।
८६	८८	२८	दक्षिणदिक्स्थनानातीर्थकथनं ।
८७	८९	१७	प्रतीचीस्थनानातीर्थकथनं ।
८८	९०	३३	उदीचीस्थतीर्थकथनम् ।
८९	९१	२६	लोमशेनेन्द्रवचनाद्युधिष्ठिरंप्रतिपार्थस्यपाशुपतादिप्राप्तिकथनपूर्वकमिन्द्रसंदेशनिवेदनं ।
९०	९२	२६	लोमशेनयुधिष्ठिरंप्रतिस्वसाहित्येनतीर्थयात्राविधायकपार्थवचननिवेदनं । युधिष्ठिरेणलोमशाज्ञयाऽधिकपरिजनविसर्जनं ।
९१	९३	३०	युधिष्ठिरेणलोमशादिभिःसहतीर्थसेवनायगमनं ।
९२	९४	२४	लोमशेनयुधिष्ठिरंप्रतिधर्माधर्मयोःसमृद्ध्यसमृद्धिलक्षणोदर्ककारणत्वाभिधानं ।
९३	९५	३१	युधिष्ठिरादिभिःक्रमेणब्रह्मसरस्तीर्थगमनं । तत्रशमठेनगययज्ञवर्णनं ।
९४	९६	३०	अगस्त्यचरितकथनारंभः । वातापील्वलवृत्तान्तकथनं । लोपामुद्रोत्पत्तिः ।

अध्याय.	झपा.अ.	श्लोक.	
९५	९७	२५	अगस्त्यलोपामुद्राविवाहः । अगस्त्येनधनार्जनायप्रस्थानं ।
९६	९८	२०	अगस्त्यस्येल्वलंप्रतिगमनं ।
९७	९९ (१–३३)	३९	इल्वलेनागस्त्यायमेषीकृतवातापिमांसपरिवेषणं । अगस्त्येनवातापेर्जीर्णीकरणं । भीतेनेल्वलेनतस्मैधनदानं । स्वहननायान्वागतस्येल्वलस्यभस्मीकरणं । लोपामुद्रायामपत्योत्पादनं ।
९८	९९ (३४–७१)	३६	युधिष्ठिरेणभृगुतीर्थगमनम् । लोमशेनयुधिरंप्रतिपरशुरामस्यदाशरथिरामेणतेजोहरणप्रकारकथनं । परशुरामस्य भृगुतीर्थनिमज्जनेनपुनस्तेजोलाभः ।
९९	१००	२५	वृत्रहननायदधीचशरीरास्थियाचनं । त्वष्ट्रादधीचास्थिभिर्वज्रायुधनिर्माणं ।
१००	१०१	२३	इन्द्रेणवृत्रासुरहननं । ततःसमुद्रंप्रविष्टैर्दैत्यैर्जगद्विनाशाययत्नः ।
१०१	१०२	२७	समुद्रान्तर्गतैर्दैत्यैरात्रौरात्रौबहिर्निर्गत्यनिहतेषुऋषिगणेषुदेवैर्नारायणंप्रतिशरणगमनं ।
१०२	१०३	२५	विष्णुनासमुद्रान्तर्हितदैत्यनिधनेसमुद्रशोषणस्योपायत्वंज्ञापितैर्देवैर्ब्रह्मलोकगमनं । ब्रह्मचोदनयादेवैरगस्त्यंप्रतिसागरशोषणप्रार्थनं ।
१०३	१०४	२५	लोमशेनयुधिष्ठिरंप्रतिविन्ध्यगिरेरभिवृद्धेरगस्त्येनतन्निरोधस्यचकारणकथनं । देवैःसमुद्रशोषणार्थमगस्त्यप्रार्थनं ।
१०४	१०५	२१	अगस्त्येनसमुद्रसलिलेपीतेदेवैर्दैत्यहननं।
१०५	१०६	२५	ब्रह्मणादेवान्प्रतिभगीरथेनसमुद्रपूरणकथनं । युधिष्ठिरेणतत्प्रकारेपृष्टेलोमशेनतदुपोद्घातार्थंसगरराजकथाकथनं ।
१०६	१०७ (१–२९)	३१	सगरस्याश्वमेधेहयस्यादर्शनं । तदन्वेषणायभूमिंखनद्भिःसागरैःपातालेभगवतःकपिलस्यसमीपेहयदर्शनं ।
१०७	१०७ (३०–७०)	४५	कपिलेनस्वजिघांसूनांसागराणांभस्मीकरणं । अंशुमताकपिलंप्रसाद्यहयानयनं । दिलीपेनगङ्गावतरणाययत्नः ।
१०८	१०८	२८	भगीरथेनगङ्गांप्रतितपश्चरणं । गङ्गायावेगधारणायतदाज्ञयाशंकरतोषणं ।
१०९	१०९	२२	शङ्करेणगङ्गाधारणं । भगीरथेनस्वपथानुगतयागङ्गयापितृभ्यउदकदानपूर्वकंसागरपूरणं ।
११०	११० (१–२१)	२२	युधिष्ठिरेणऋषभकूटगिरौनन्दापरनन्दानदीगमनं । लोमशेनऋषभमुनेर्नन्दायाश्रमहिमकथनं ।
१११	११० (२२–५८)	३७	युधिष्ठिरेणऋश्यशृङ्गाश्रमगमनं । लोमशेनऋष्यशृङ्गोत्पत्तिकथनं । लोमपादेनानावृष्टिनिवृत्तयेऋश्यशृङ्गानयनं ।
११२	१११	२४	विभाण्डकासंनिधानेतदाश्रमंप्रविष्टयावेश्यायुवत्याऋश्यशृङ्गस्यप्रलोभनं । वेश्याविलासमुग्धचेतसंसुतंप्रतिविभाण्डकेनमोहकारणप्रश्नः ।
११३	११२	१९	ऋश्यशृङ्गेणवेश्यायुवत्यांमुनिकुमारत्वबुद्ध्याविभाण्डकंप्रतिस्वस्यमुनिकुमारे आसक्तिरित्युक्तिः ।
११४	११३	२५	पुनर्विभाण्डकासंनिधानेतदाश्रमंगतयागणिकयाऋश्यशृङ्गेऽङ्गदेशमानीतेमहावृष्टेःप्रादुर्भावः । शान्तायाविवाहः । लोमपादेनक्रुद्धस्यविभाण्डकस्यप्रसादनं । ऋश्यशृङ्गेणतनयोत्पत्तिपर्यन्तंतत्रस्थित्वाततोभार्ययासहनिजाश्रमाभिगमनं ।
११५	११४	३१	युधिष्ठिरेणनानाविधतीर्थगमनं । लोमशेनतत्तत्तीर्थाश्रममहिमवर्णनं ।
११६	११५	४६	अकृतव्रणेनपरशुरामचरित्रकीर्तनारंभः । ऋचीकेनगाधिकन्यापरिणयनं । जमदग्न्युत्पत्तिः ।
११७	११६	३०	जमदग्नेरेणुकायांपरशुरामादीनामुत्पत्तिः । पितुर्नियोगाद्रामेणस्वमातृहननं । रामप्रार्थनयाजमदग्निनारेणुकायाउज्जीवनं । कार्तवीर्यार्जुनेनजमदग्निहोमधेनुवत्सस्यापहारः । रामेणकार्तवीर्यवधः । तत्पुत्रैर्जमदग्नेर्वधः ।
११८	११७	१८	परशुरामेणत्रिस्सप्तकृत्वोनिःक्षत्रियीकरणं । युधिष्ठिरेणरामपूजनं ।
११९	११८	२३	युधिष्ठिरेणप्रभासतीर्थगमनं । तत्रकृष्णादीनामागमनं ।
१२०	११९	२२	बलभद्रेणभीष्मधृतराष्ट्रादिगर्हणं ।
१२१	१२०	३३	सात्यकिनापाण्डवानपेक्षणेनस्वैरेवधार्तराष्ट्रादिहननपूर्वकंपाण्डवानांवनवा-

अध्याय.	झपा.अ.	श्लोक.	
			सायवसानपर्यन्तमभिमन्योराज्येऽभिषेककरणोक्तिः । कृष्णेनतन्निषेधनं ।
१२२	१२१	२६	गयराजयागवर्णनं । च्यवनेनशर्यातियाजनादिकथनं । युधिष्ठिरेणसविस्तरंच्यवनचरित्रकीर्तनप्रार्थना ।
१२३	१२२	२७	सुकन्योपाख्यानप्रारंभः । शर्यातिनाच्यवनाश्रमगमनं । शर्यातिकन्ययासुकन्ययावल्मीकाग्रस्थच्यवननयनयुगलस्यकण्टकेनविभेदनं । च्यवनकोपशमनायशर्यातिनातस्मैभार्यात्वेनसुकन्यायाःप्रदानं ।
१२४	१२३	२६	अश्विभ्यांच्यवनाययौवनदानं ।
१२५	१२४	२५	च्यवनेनशर्यातेर्याजनं । च्यवनेनाश्विभ्यांसोमदानोद्यमेइन्द्रेणच्यवनहननायवज्रोद्यमनं । च्यवनेनतद्बाहुस्तंभनपूर्वकंतंप्रतिकृत्योत्सर्जनं ।
१२६	१२५	२६	इन्द्राभिष्टुतेनच्यवनेनकृत्यायास्तस्मान्निवर्तनपूर्वकंह्यादिषुविभजनं । सुकन्योपाख्यानसमापनं ।
१२७	१२६	४८	मान्धातृचरित्रं ।
१२८	१२७	२१	जन्तूपाख्यानं । सोमकनामकस्यराज्ञोजन्तुनामकपुत्रोत्पत्तिः । पिपीलिकादष्टस्यजन्तोर्मरणसमयदुःखसमदुःखदर्शननिर्विण्णेनराज्ञाऋत्विजंप्रतिबहुपुत्रोत्पादनोपायप्रश्नः ।
१२९	१२८	२२	जन्तुनामकपुत्रवपायाहोमेनसोमकराजस्यभार्याशतेपुत्रशतोत्पत्तिः । तेनकर्मणाऋत्विग्यजमानयोर्नरकेदुःखप्राप्तिः ।
१३०	+	३४	युधिष्ठिरेणमार्कण्डेयाश्रमगमनं । लोमशेनसंग्रहेणमार्कण्डेयचरित्रकथनं ।
१३१	१२९	२३	लोमशेनयुधिष्ठिरंप्रतिनानातीर्थमहिमानुवर्णनं ।
१३२	१३०	२४	सरस्वत्यादितीर्थमहिमा । श्येनकपोतोपाख्यानप्रारंभः ।
१३३	१३१	३६	श्येनीभूतादिन्द्राद्भीतस्यकपोतरूपधारिणोऽग्नेःशिबिंप्रतिशरणागतिः । कपोतरिरक्षिषयाराज्ञातत्प्रतिनिधित्वेनस्वमांसस्यस्वगात्रादुत्कृत्यतुलारोपणं । तावताप्यपर्याप्तौस्वयमेवतुलारोहणं । तेनेंद्राग्न्योस्तोषः ।
१३४	१३२	२३	अष्टावक्रोपाख्यानं । कहोलस्यवन्दिनाजलेनिमज्जनं । अष्टावक्रेणजनकनगरंप्रतिगमनं ।
१३५	१३३	३२	अष्टावक्रद्वारपालकयोस्संवादः ।
१३६	१३४	४१	अष्टावक्रेणवादेपराजितस्यवन्दिनोजलेनिमज्जनं । अष्टावक्रेणवरुणलोकात्परावृत्तेनस्वपित्रामातुलेनचसहस्वाश्रमगमनं । समङ्गास्नानादष्टावक्रस्यऋजुताप्राप्तिः ।
१३७	१३५	६१	यवक्रीतोपाख्यानं । तेनाध्ययनंविनावेदाधिगमायइन्द्रंप्रतितपश्चरणं । तेनतस्मात्कथंचिद्वरग्रहणं । बालध्युपाख्यानं ।
१३८	१३६	२०	यवक्रीतेनपरावसुभार्यायाबलात्कारेणोपभोगः । रैभ्येणतद्धननायकृत्याrक्षसोःसर्जनं । कृत्ययातत्कमण्डलुहरणं । राक्षसेनयवक्रीतहननं ।
१३९	१३७	१९	भरद्वाजेनरैभ्यस्यापिज्येष्ठसुतेनहननरूपशापदानं । पुत्रमरणदुःखितेनभरद्वाजेनतद्देहदहनपूर्वकमग्नौप्रवेशः
१४०	१३८	३०	परावसुनारात्रौकृष्णाजिनसंवीतस्यरैभ्यस्यमृगभ्रमेणहननं । अर्वावसोस्तपःप्रसादितेभ्यःसूर्यादिदेवेभ्यःरैभ्यभरद्वाजयवक्रीतोज्जीवनादिवरलाभः । देवैरैभ्यादीनामुज्जीवनं ।
१४१	१३९	२०	युधिष्ठिरस्यकैलासादिगिरिप्रवेशः ।
१४२	१४०	२९	भीमेनद्रौपद्यादीनांवहनाङ्गीकारः । युधिष्ठिरस्यगन्धमादनंप्रतिप्रस्थानं ।
१४३	१४१	२९	युधिष्ठिरेणधनञ्जयप्रशंसनपूर्वकंगंधमादनप्रवेशनिश्चयः ।
१४४*	१४२	६३	पाण्डवानांमन्दरगिरिगमनं । नरकासुरास्थिदर्शनं । नरकासुरवधकथा । वराहावतारकथा ।
१४५	१४३	२३	पाण्डवानांगन्धमादनगमनेमध्येमार्गे महावृष्टेःप्रादुर्भावः । वृष्ट्युपरमानन्तरंपुनःप्रस्थानं ।
१४६	१४४	२४	गन्धमादनमार्गेगमनाक्षमतयाऽधःपतनेनमूर्च्छितायाद्रौपद्याःसलिलसेच-

* १४४ तमोऽध्यायोदाक्षिणात्यकोशेपुनदृश्यते । दृश्यतेच औत्तराहादिकोशेष्वेव ।

अध्याय. झपा.अ. श्लोक.

नादिनाश्रमापनोदनं । भीमेनस्वेनघटोत्कचेनवातस्यावहनोक्तिः ।

१४७ १४५ ५० भीमसेनस्मरणमात्रसंनिहितेनघटोत्कचेनद्रौपद्यावहनं । सर्वैर्नरनारायणाश्रममेत्यतत्रसुखेननिवासः ।

१४८ १४६ १०१ कदाचनद्रौपद्यावाय्वानीताद्भुतसौगन्धिकपुष्पदर्शनं । तयातादृशबहुपुष्पानयनंप्रार्थितेनभीमेनतदर्थंनिर्गमनं । भीमेनमध्येमार्गंस्वमार्गनिरोधकेनहनुमतासहसंवादः ।

१४९ १४७ ३४ भीमेनस्वमार्गादपसरणंचोदितेनहनुमतातंप्रत्यपसरणेस्वस्याशक्तिकथनपूर्वकंस्वयमेवान्यतोवालापसारणेनगमनोक्तिः । प्रयत्नेकृतेपिपुच्छस्यचालनेप्यशक्नुवताभीमेनतंप्रतितत्प्रभावादिप्रश्नः । हनुमतास्वप्रभावादिनिवेदनपूर्वकंश्रीरामकथाकथनारंभः ।

१५० १४८ २२ हनुमताभीमंप्रतिसंक्षेपेणरामकथाकथनम् ।

१५१ १४९ ४१ भीमेनसागरलङ्घनकालिकपृथुतररूपप्रदर्शनंप्रार्थितेनहनुमतातंप्रतिऐतत्कालिकैस्तात्कालिकरूपस्यदुर्निरीक्षताकथनपूर्वकंकृतयुगादिधर्मप्रतिपादनं ।

१५२ १५० ५४ हनुमताभीमंप्रतिपृथुतरनिजरूपप्रदर्शनपूर्वकंचातुर्वर्ण्यधर्मनिरूपणम् ।

१५३ { १५१ १५२ } ३३ उपसंहृतपृथुरूपेणहनुमतासपरिष्वङ्गवरदानंविसृष्टेनभीमेनगन्धमादनेसौगन्धिकसरोदर्शनं ।

१५४ १५३ १६ सौगन्धिकसरोविविक्षुंभीमंप्रतितद्रक्षिभिःक्रोधवशनामकैराक्षसैस्तच्चिकीर्षितप्रश्नः ।

१५५ १५४ २८ भीमेनस्वचिकीर्षितकथनपूर्वकंसौगन्धिकाहरणेप्रवर्तनम् । स्वजिघांसूनांतेषांताडनं । भीमवृत्तान्तंश्रुतवताकुबेरेणतदनुमोदनं ।

१५६ १५५ ३३ दुर्निमित्तदर्शिनायुधिष्ठिरेणघटोत्कचेनसहभीमसमीपगमनं । कुबेरेणबहुमानितानांतेषांतत्रैववासः ।

१५७ १५६ २१ युधिष्ठिरेणपुनर्नरनारायणाश्रमंप्रत्यागमनं ।

समाप्तंतीर्थयात्रापर्व ॥ ६ ॥

अध्याय. झपा.अ. श्लोक.

अथजटासुरवधपर्व ॥ ७ ॥ अध्यायः ॥ १ ॥

(१५८) ॥ श्लोकाः ॥ ७२ ॥

१५८ १५७ ७२ विप्रवेषेणपाण्डवनिकटेचिरवासिनाजटासुरेणकदाचनभीमासंनिधानेद्रौपदीसहितान्युधिष्ठिरादीन्स्वस्कन्धमारोप्यपलायनं । मध्येमार्गंयदृच्छासमागतेनभीमेनतस्यमारणं ।

समाप्तंजटासुरवधपर्व ॥ ७ ॥

अथयक्षयुद्धपर्व ॥ ८ ॥ अध्यायाः ॥ ७ ॥

(१५९–१६५) ॥ श्लोकाः ॥ ३८७ ॥

१५९ १५८ १०२ जटासुरवधानन्तरंसपरिवारेणयुधिष्ठिरेणनरनारायणाश्रमेनिवासः । वृषपर्वाश्रमादिसंचरणं । आर्ष्टिषेणाश्रमगमनं ।

१६० १५९ ३३ आर्ष्टिषेणेनराजर्षिणाकैलासवर्णनपूर्वकमर्जुनागमनपर्यन्तंयुधिष्ठिरस्यस्वाश्रमएवनिवासचोदना ।

१६१ १६० ८५ कदाचनगरुडपक्षवातानीताद्भुताम्बुजदर्शिन्याद्रौपद्यातादृशबहुपुष्पानयनंप्रार्थितेनभीमेनतदर्थंगन्धमादनशिखरारोहणं । तत्रमणिमदादीनांयुद्धेहननं ।

१६२ १६१ ६६ युधिष्ठिरादिभिर्भीमसमीपगमनं । श्रुतमणिमदादिवधेनकुबेरेणयुयुत्सयातत्रागमनं । तत्रतद्दर्शनेनशान्तमन्युनाकुबेरेणतान्प्रतिस्वस्यागस्त्यशापावाप्तिकथनपूर्वकंभीमकार्यानुमोदनं ।

१६३ १६२ ४० कुबेरेणयुधिष्ठिरानुशासनपूर्वकंस्वभवनगमनं । युधिष्ठिरादीनांरात्रौकुबेरगृहेवासः ।

१६४ १६३ ४१ धौम्येनयुधिष्ठिरंप्रतिमेरुमन्दरवर्णनपूर्वकंचन्द्रसूर्यादिगतिप्रकारनिरूपणं ।

१६५ १६४ २० इन्द्रादधिगतास्त्रेणार्जुनेनस्वर्गाद्गन्धमादनेयुधिष्ठिरादीन्प्रत्यागमनं ।

समाप्तंयक्षयुद्धपर्व ॥ ८ ॥

अथनिवातकवचयुद्धपर्व ॥ ९ ॥ अध्यायाः ॥ १२ ॥

(१६६–१७७) ॥ श्लोकाः ॥ ४१९ ॥

१६६ १६५ १४ अर्जुनेनयुधिष्ठिरादीन्प्रतिसंक्षेपेणस्वकीयस्वर्गनिवासप्रकारकथनं ।

१६७ १६६ १८ इन्द्रेणसभ्रातृकंयुधिष्ठिरमेत्यजयाशीर्दशंसनपूर्वकंपुनःस्वर्गंप्रतिगमनं ।

अध्याय.	छपा.अ.	श्लोक.	
१६८	१६७	५६	अर्जुनेनस्वस्यकिरातरूपिणारुद्रेणसहयुद्धस्यपाशुपतास्त्रलाभस्यचकथनं ।
१६९	१६८ (१–६१)	६१	अर्जुनेनस्वस्येन्द्रलोकनिवासप्रकारकथनं ।
१७०	१६८ (६२–८६)	२६	अस्त्रशिक्षासमाप्तौसहस्राक्षेणगुरुदक्षिणात्वेननिवातकवचानांक्षपणंभिक्षितेनार्जुनेनतदर्थंप्रस्थानं ।
१७१	१६९	२४	पार्थस्यनिवातकवचैःसहयुद्धारंभः ।
१७२	१७०	२९	अर्जुनस्यनिवातकवचैःसहयुद्धं ।
१७३	१७१	३०	अर्जुनेनदैत्यहननं ।
१७४	१७२	३५	अर्जुनस्यपुनस्स्वर्गंप्रतिप्रस्थानं ।
१७५	१७३	८४	मध्येमार्गमर्जुनेनहिरण्यपुरावलोकनं । तद्वासिनांपौलोमानांकालकेयानांचवधानन्तरंपुनःस्वर्गप्रत्यागमनं ।
१७६	१७४	१७	अर्जुनेनयुधिष्ठिरंप्रतीन्द्रेणस्वस्मैसानुग्रहंकवचकिरीटादिदानकथनं ।
१७७	१७५	२५	अर्जुनेनयुधिष्ठिरायदिव्यास्त्रप्रदर्शनं । अस्त्रतेजसाजगत्क्षोभेसतीन्द्रचोदनयानारदेनार्जुनंप्रत्यस्त्रप्रदर्शनप्रतिषेधनं ।

समाप्तंनिवातकवचयुद्धपर्व ॥ ९ ॥

अथाजगरपर्व ॥ १० ॥ अध्यायाः ॥ ६ ॥

(१७८–१८३) ॥ श्लोकाः ॥ २२३ ॥

अध्याय.	छपा.अ.	श्लोक.	
१७८	१७६	२३	युधिष्ठिरेणगन्धमादनादवतरणाध्यवसायः । लोमशेनस्वर्गप्रतिगमनं ।
१७९	१७७	२४	पाण्डवैर्गन्धमादनादवतीर्यक्रमेणकैलासादिगमनपूर्वकंद्वैतवनगमनं ।
१८०	१७८	३२	वनेमृगयार्थमटतोभीमस्यमहताऽजगरेणग्रहणं ।
१८१	१७९	५४	अजगरेणभीमंप्रतिस्वस्याजगरत्वप्रापककारणाभिधानं । दुर्निमित्तदर्शनाद्दुर्मनायमानेनयुधिष्ठिरेणभीममार्गानुसरणेनाजगरगृहीतभीमस्यदर्शनं।
१८२	१८०	३८	युधिष्ठिराजगरयोःसंवादः ।
१८३	१८१	५२	स्वप्रश्नस्योत्तरदानतुष्टेनाजगररूपिणानहुषेणभीमंविमुच्यस्वर्गप्रतिगमनं ।

समाप्तमाजगरपर्व ॥ १० ॥

अथमार्कण्डेयसमास्यापर्व ॥ ११ ॥ अध्यायाः ॥ ५० ॥

(१८४–२३३) ॥ श्लोकाः ॥ २१०४ ॥

अध्याय.	छपा.अ.	श्लोक.	
१८४	१८२	१८	वर्षाशरदृतुवर्णनं । युधिष्ठिरादिभिःपुनर्द्वैतवनात्काम्यकवनप्रवेशः ।
१८५	१८३ (१–५२)	५२	कृष्णेनसत्यभामयासहकाम्यकवनागमनं । तत्रनारदमार्कण्डेययोरागमनं । मार्कण्डेयेनपुराणकथाकथनारंभः ।
१८६	१८३ (५३–९५)	४३	प्राणिनांसुकृतदुष्कृतफलभोगादिप्रकारनिरूपणं ।
१८७	१८४	२५	मृतस्यपुनरुज्जीवनशक्त्यादिरूपब्राह्मणमाहात्म्यकथनं ।
१८८	१८५	३८	वैन्यस्याश्वमेधेऽत्रिगौतमविवादानुवादमुखेनब्राह्मणमाहात्म्यकथनं ।
१८९	१८६	३०	तार्क्ष्यसरस्वतीसंवादः ।
१९०	१८७	५६	मत्स्यरूपिणोहरेर्वैवस्वतमनोश्चचरितं ।
१९१	१८८	४४	युगचतुष्टयधर्मकथनं । प्रलयवर्णनं । प्रलयजलेपरिभ्रमतामार्कण्डेयेनवटशाखाशायिनिशिशुरूपस्यहरेरुदरान्तःप्रविश्यब्रह्माण्डदर्शनपूर्वकंपुनर्बहिर्निर्गमनं ।
१९२	१८९	५८	हरिणास्वमाहात्म्यकथनपूर्वकमन्तर्धानं । कृष्णस्यसर्वोत्तमत्वप्रतिपादनं ।
१९३	१९०	९८	कलियुगवृत्तान्तकथनं । कल्क्यवतारः।
१९४	१९१	३५	कृतयुगवृत्तान्तकथनं ।
१९५	१९२*	७२	मण्डूकोपाख्यानं । इक्ष्वाकुवंश्येनपरीक्षिन्नाम्नाराज्ञामृगयार्थंवनंप्रविष्टेनमण्डूककन्यापरिणयः । तस्याजलेनिमज्जनं । राज्ञासर्वमण्डूकहननचोदना । तेनकर्मणाभीतेनमण्डूकराजेनपुनस्तस्मैस्वपुत्रीप्रदानं । तत्पुत्रयोःशलदलयोर्वृत्तान्तकथनपूर्वकंवामदेवमुनिमाहात्म्यकथनं ।
१९६	१९३	३५	सुखदुःखनिरूपकबकशक्रसंवादानुवादः ।
१९७	१९४	८	शिबिचरित्रकथनं ।
१९८†	१९५	६	गोदानविषयेययातिचरित्रं ।
१९९	१९६	१३	सेदुकवृषदर्भचरित्रं ।
२००	१९७	२८	श्येनकपोतीयरूपंशिबिचरित्रं ।
२०१	१९८	२७	दानमहिमविषयेअष्टकादिराजकथा ।
२०२	१९९	१८	कीर्त्यकीर्त्योःस्वर्गनरकनिवासहेतुताप्रतिपादकेन्द्रद्युम्नोपाख्यानं ।

* गद्यपद्यात्मकोऽयमध्यायः ।

† १९८, १९९, २०० एतदध्यायत्रयं झ. पुस्तक एव दृश्यते नेतरकोशेषु ।

अध्याय.	छापा.अ.	श्लोक.	
२०३	२००	१२९	स्वर्गनरककारणीभूतसाधारणधर्माः ।
२०४	२०१	३४	धुन्धुमारोपाख्यानं । उदङ्कमुनितपस्तुष्टेनविष्णुनातस्मैवरदानं । कुवलाश्वेनधुन्धुनामकासुरघातनविधानं ।
२०५	२०२	३३	उदङ्केनबृहदश्वंप्रतिधुन्धुनामकासुरहननचोदना ।
२०६	२०३	३७	बृहदश्वेनोदङ्कंप्रतिस्वपुत्रेणकुवलाश्वेनधुन्धुवधस्यभावित्वकथनपूर्वकंवनंप्रतिगमनं । धुन्धूत्पत्तिकथनायमधुकैटभवृत्तान्तकथनं ।
२०७	२०४	४३	मधुकैटभपुत्रेणधुन्धुनादेवानांपीडनं । उदङ्कचोदितेनकुवलाश्वेनधुन्धुहननं । देवैःकुवलाश्वस्यधुन्धुमार इतिनामकरणं ।
२०८	२०५	२४	पतिव्रतामाहात्म्यारंभः ।
२०९	२०६	५१	कौशिकबलाकयोःकथा ।
२१०	२०७ (१–५९)	६३	कौशिकेनद्विजेनपतिव्रतावचनाद्धर्मव्याधसमीपगमनं । व्याधेनतस्मैनानाधर्मोपदेशः ।
२११	२०७ (६०–९९)	४०	धर्मव्याधेनशिष्टलक्षणादिकथनं ।
२१२	२०८	३९	धर्मव्याधेनस्वस्वधर्मानुष्ठानस्यश्रेयस्साधनत्वादिकथनं ।
२१३	२०९	५७	पौरुषनिन्दनपूर्वकंदैवप्रशंसनं ।
२१४	२१०	२१	ब्राह्मणमाहात्म्यकथनं ।
२१५	२११	२७	धर्मव्याधेनभूतपञ्चकगुणनिरूपणं ।
२१६	२१२, २१३	५६	सत्वादिगुणत्रयनिरूपणं ।
२१७	२१४	२९	धर्मव्याधेनकौशिकायस्वगृहप्रवेशनपूर्वकंवृद्धतरस्वमातापितृप्रदर्शनं । मातापितृविषयेस्वानुसन्धानप्रकारनिवेदनं ।
२१८	२१५	३१	धर्मव्याधेनकौशिकंप्रतिमातापितृशुश्रूषणचोदनपूर्वकंस्वस्यशूद्रयोनौजननकारणकथनं ।
२१९	२१६	३८	कौशिकेनस्वगृहमेत्यस्वपित्रोःशुश्रूषणं। पतिव्रतामाहात्म्योपसंहारः ।
२२०	२१७	२१	आङ्गिरसोपाख्यानारंभः । देवैर्बृहस्पतेर्गुरुत्वेनस्वीकारः ।
२२१	२१८, २१९	३३	अग्नीनामुत्पत्तिकथनं ।
२२२	२२०	२०	अग्नीनामुत्पत्तिकथनं ।
२२३	२२१	३१	अग्निवंशकथनं ।
२२४	२२२	३२	अग्निवंशकथनं ।
२२५	२२३	१६९	कुमारोत्पत्तिकथारंभः ।
२२६	२२४	४१	स्कन्दोत्पत्तिः ।
२२७	२२५	४०	स्वाहयासप्तर्षिपत्नीष्वरुन्धतीसारूप्यवर्जमितरासांसारूप्यस्वीकारेणाग्निनासहरमणं । षण्मुखोत्पत्तिः । तेनक्रौञ्चगिरिविदारणं । श्वेतपर्वतभेदनं ।
२२८	२२६, २२७, २२८-१-९	५८	षड्भिर्ऋषिभिर्लोकापवादभयात्स्वपत्नीनांपरित्यागः । इन्द्रेणस्कन्देनसहसंधिकरणं ।
२२९	२२८ (१०-१६), २२९	६०	स्कन्दचरित्रप्रतिपादनं । स्कन्दस्य दैवसेनापत्येऽभिषेकः । देवसेनाया विवाहः ।
२३०	२३०	५९	स्कन्दचरित्रकथनं ।
२३१	२३१ (१–२७)	२८	स्कन्देनस्वाहादेव्या अभीष्टप्रदानं । स्कन्दस्यरुद्रपुत्रत्वादिकथनं ।
२३२	२३१ (२८-११३)	८९	महादेवस्यभद्रवटंप्रतिगमनं । देवासुरयुद्धं । महिषासुरसंवादः ।
२३३	२३२	२१	स्कन्दनाम्नांकीर्तनं ।

समाप्तंमार्कण्डेयसमास्यापर्व ॥ ११ ॥

अथद्रौपदीसत्यभामासंवादपर्व ॥ १२ ॥अध्यायाः ॥३॥

(२३४–२३६) ॥ श्लोकाः ॥ ९३ ॥

२३४	२३३	६३	सत्यभामयापतिवशीकरणोपायंपृष्टया द्रौपद्यातदुत्तरदानव्याजेनपतिव्रताधर्मकथनं ।
२३५	२३४	१२	पतिव्रताधर्मकथनं ।
२३६	२३५	१८	श्रीकृष्णेनसत्यभामयासहस्वपुरंप्रतिगमनं ।

समाप्तंद्रौपदीसत्यभामासंवादपर्व ॥ १२ ॥

अथघोषयात्रापर्व ॥ १३ ॥ अध्यायाः ॥ २२ ॥

(२३७–२५८) ॥ श्लोकाः ॥ ६३९ ॥

२३७	२३६	३१	कस्माचिद्ब्राह्मणात्पाण्डववृत्तान्तंश्रुतवताधृतराष्ट्रेणपाण्डवान्प्रतिशोचनं । पाण्डवपराक्रमानुस्मरणेनस्वपुत्राणांतेभ्योवधनिर्धारणपूर्वकंतान्प्रतिपरिशोचनं ।
२३८	२३७	२५	कर्णशकुनिभ्यांदुर्योधनंप्रतिस्ववैभवप्रदर्शनेनपाण्डवानांदुःखजननायद्वैतवनगमनचोदना ।
२३९	२३८	२४	द्वैतवनगमनेघोषयात्राया उपायत्वनिर्धारणं ।

अध्याय.	झपा.अ.	श्लोक.	
२४०	२३९	२९	दुर्योधनेनघोषयात्राव्याजेनानुजादिभिःसहद्वैतवनंप्रतिगमनं ।
२४१	२४०	३१	द्वैतवनेसरस्समीपेक्रीडास्थाननिर्मातॄणां दुर्योधनभृत्यानांपूर्वमेवतत्रागतैर्गन्धर्वैःप्रतिवारणं । दुर्योधनेनगन्धर्वोत्सारणायसेनाप्रेषणं । गन्धर्वैर्दुर्योधनभटानांभर्त्सनं ।
२४२	२४१	३६	गन्धर्वैस्सहकौरवाणामायोधनं । चित्रसेनादिभिर्विरथीकृतेनकर्णेनरणाङ्कणात्पलायनं ।
२४३	२४२	२४	चित्ररथेनदुर्योधनस्यबन्धनपूर्वकंस्वरथारोपणं । इतरैर्गन्धर्वैर्दुर्योधनभ्रातॄणांतद्दाराणांचबन्धनं । दुर्योधनामात्यादिभिर्युधिष्ठिरायतन्निवेदनेभीमेनतदनुमोदनं ।
२४४	२४३	३८	भीमेनदुर्योधनविमोचनस्यानौचित्यप्रतिपादनेयुधिष्ठिराज्ञयाऽर्जुनेनतद्विमोचनप्रतिज्ञानं ।
२४५	२४४	२१	भीमादीनांचित्रसेनादिभिर्युद्धं ।
२४६	२४५	३१	अर्जुनेनपराजितचित्रसेनेनस्वस्यसखित्वकथनं । युद्धोपरमः ।
२४७	२४३	३१	सचित्रसेनानांभीमादीनांबद्धंदुर्योधनमादाययुधिष्ठिरसमीपगमनं । युधिष्ठिराज्ञयागन्धर्वैर्दुर्योधनादीनांबन्धाद्विमोचनं । ततोदुर्योधनेनस्वपुरंप्रतिप्रस्थानं ।
२४८	२४७	१४	दुर्योधनेनमध्येमार्गमवस्थानं । तत्रसमागतेनकर्णेनभ्रमात्तस्यगन्धर्वजेतृत्वरूपेणप्रशंसनं ।
२४९	२४८	१७	दुर्योधनेनकर्णंप्रतियुद्धेसानुजस्यस्वस्यगन्धर्वैर्बन्धनस्यभीमादिभिर्गन्धर्वपराजयस्यचकथनं ।
२५०	२४९	४२	युधिष्ठिरात्स्वस्यबन्धमोचनकथनं । प्रायोपवेशनेनिजाध्यवसायकथनपूर्वकंदुश्शासनंप्रतिराज्यपरिपालनविधानं । प्रायोपवेशनिवेशनायसान्त्वोक्तिः ।
२५१	२५०	१४	कर्णेनबहुधाप्रार्थनेपिदुर्योधनेनप्रायोपवेशाध्यवसायादनिवर्तनं ।
२५२	२५१	३१	पातालवासिभिर्दैत्यैर्विसृष्टयाकृत्यया प्रायोपविष्टस्यदुर्योधनस्यपातालंप्रतिनयनं ।
२५३	२५२	५३	तत्रत्यैर्दैत्यैर्हेतूपन्यासपूर्वकंप्रायोपवेशान्निवर्तनं । पुनःकृत्ययादुर्योधनस्यपूर्वस्थानंप्रत्यानयनं । दुर्योधनेनस्वपुरंप्रत्यागमनं ।
२५४*	२५३	२९	भीष्मेणदुर्योधनंप्रतिपाण्डवप्रशंसनपूर्वकंतैःसहसंधिविधानं । [तथाकर्णस्यगर्हणं । दुर्योधनानुमत्याकर्णेनदिग्विजयायनिर्गमनं ।]
२५५	२५४	३६	दिग्विजयार्थंगतेनकर्णेनसकलराजवशीकरणपूर्वकंपुनर्हास्तिनपुरंप्रत्यागमनं ।
२५६	२५५	२६	दुर्योधनेनराजसूययाजनंप्रार्थितैर्ब्राह्मणैर्हेतूक्त्यातन्निषेधनपूर्वकंतंप्रतियज्ञान्तरकरणनियोजनं ।
२५७	२५६	२५	दुर्योधनेनयज्ञसमापनानन्तरंनिजनगरप्रवेशः ।
२५८	२५७	३१	दुर्योधनसभायांकर्णेनार्जुनवधप्रतिज्ञानं । चारमुखात्पाण्डवैस्तच्छ्रवणं ।

समाप्तंघोषयात्रापर्व ॥ १३ ॥

अथमृगस्वप्नोद्भवपर्व ॥ १४ ॥ अध्यायाः ॥ १ ॥

(२५९) ॥ श्लोकाः ॥ १७ ॥

अध्याय.	झपा.अ.	श्लोक.	
२५९	२५८	१७	पाण्डवनिहतभूयिष्ठैर्मृगैर्युधिष्ठिरंप्रतिस्वप्नेस्थानान्तरमेत्यस्वकुलशेषीकरणप्रार्थना । युधिष्ठिरेणपुनःकाम्यकवनगमनं ।

समाप्तंमृगस्वप्नोद्भवपर्व ॥ १४ ॥.

अथव्रीहिद्रौणिकपर्व ॥ १५ ॥ अध्यायाः ॥ ३ ॥

(२६०–२६२) ॥ श्लोकाः ॥ १२९ ॥

अध्याय.	झपा.अ.	श्लोक.	
२६०	२५९	३८	कदाचनकाम्यकवनवासिनःपाण्डवानुपागतेनव्यासेनयुधिष्ठिरंप्रतिदानप्रशंसनं ।
२६१	२६०	३८	मुद्गलचित्तपरीक्षणायदुर्वाससाषट्कृत्वोयाचनेप्यविकृतमनसातेनतदातदाऽन्नदानेनतत्तोषणं । तन्महिम्नासविमानेनदेवदूतेनसशरीरस्यैवमुद्गलस्यस्वर्गप्रत्याह्वानं । मुद्गलेनतंप्रतिस्वर्गस्वरूपनिरूपणप्रार्थना ॥
२६२	२६१	५३	देवदूतात्स्वर्गसुखस्यास्थिरतांपरिज्ञात-

* २५४ तमाध्याये १६ तमश्लोकमारभ्यसमग्रोऽध्यायः २५५ तमोऽध्यायःसमग्रश्चदाक्षिणात्यकोशेपुनस्तः ।

अध्याय.	झपा.अ.	श्लोक.	
			वतामुद्गलेनस्वर्गानभिरोचनपूर्वकंदेवदूतस्वस्वर्गप्रतिप्रस्थापनं । व्यासेन युधिष्ठिरंप्रतिमुद्गलोपाख्यानकथनपूर्वकंस्वाश्रमंप्रतिगमनं ।

समाप्तंव्रीहिद्रौणिकपर्व ॥ १५ ॥

अथ द्रौपदीहरणपर्व ॥ १६ ॥ अध्यायाः ॥ १० ॥

(२६३–२७२) ॥ श्लोकाः ॥ २९५ ॥

२६३*	२६२	२७	कदाचनशिष्यायुतसहितेनदुर्वाससा दुर्योधनगृहंप्रतिगमनं । दुर्योधनेन स्वपरिचर्यासंतुष्टंतंप्रतिद्रौपद्याभोजनावसानेभोजनायपाण्डवान्प्रतिगमनप्रार्थना । दुर्वाससातस्मैतद्वरदानपूर्वकंपाण्डवान्प्रतिप्रस्थानं ।
२६४	२६३	४७	दुर्वाससाऽकालेपाण्डवान्प्रत्यन्नयाचनं । तथायुधिष्ठिरानुमत्याशिष्यायुतेनसहस्नानायनदींप्रतिगमनं । अत्रान्तरेद्रौपदीप्रार्थनयाश्रीकृष्णस्यतत्समीपगमनं । तेनस्वीयक्षुन्निवृत्तयेद्रौपदींप्रत्यन्नयाचनं । तथाऽन्नस्यशेषाभावेनिवेदितेऽन्नस्थालीमानाय्यतत्कण्ठलग्नशाकपुलाकभक्षणेनसशिष्यस्य दुर्वासस आकण्ठभुक्तवत्तृप्तिजननं । ततोभोजनायभीमेनाह्वानेभयाच्छिष्यैःसहदुर्वाससःपलायनं ।
२६५	२६४	१७	पञ्चस्वपिपाण्डवेषुमृगयार्थंगतेषुसपरिजनेनजयद्रथेनमार्गवशात्तदाश्रमाभिगमनं । तत्रद्रौपदीदर्शनक्षुभितहृदा तेनतन्निकटंप्रतिकोटिकाश्यस्यप्रेषणं ।
२६६	२६५	१४	कोटिकाश्येनतत्पितृभर्तृकुलादिप्रश्नः ।
२६७	२६६	९	कोटिकाश्यंप्रतिद्रौपद्यास्वीयवृत्तान्तकथनं ।
२६८	२६७	२८	कोटिकाश्याद्द्रौपदीतत्वंविदितवताजयद्रथेनद्रौपदीमेत्यस्वभार्याभवेतियाचना ।
२६९	२६८	२९	द्रौपद्यास्वाभिलाषिणोजयद्रथस्यगर्हणं । तथाबलात्स्ववस्त्रान्तकर्षिणस्तस्याक्षेपादधःपातनपूर्वकंस्वयमेवतद्रथारोहणं ।
२७०	२६९	३३	मृगयागतैःपाण्डवैर्दुर्निमित्तदर्शनाद्द्रौपदाशङ्कयासत्वरंस्वाश्रमाभिगमनं । तदाद्रौपदीवृत्तान्तावगमेनजयद्रथपथानुगतैस्तद्वलोकनेनकोपात्समुत्क्रोशनं ।
२७१	२७०	२२	द्रौपद्याजयद्रथंप्रतितत्तल्लक्षणप्रदर्शनपूर्वकंयुधिष्ठिरादिनिर्देशः ।
२७२	२७१	६९	युधिष्ठिरादीनांजयद्रथादिभिरायोधनं। जयद्रथसहायेषु भीमादिभिर्निहतेषु तेनद्रौपदीविमोचनपूर्वकंपलायनं । भीमार्जुनाभ्यांपरुषोक्तिपूर्वकंतदनुधावनं ।

समाप्तंद्रौपदीहरणपर्व ॥ १६ ॥

अथ जयद्रथविमोक्षणपर्व ॥ १७ ॥ अध्यायः ॥ १ ॥

(२७३) ॥ श्लोकाः ॥ ८३ ॥

२७३	२७२	८३	भीमेनजयद्रथस्यमूर्ध्निपादप्रहारपूर्वकं क्षुरप्रेणपञ्चचूडीकरणं । भीमेनबन्धनपूर्वकमानीतस्यतस्ययुधिष्ठिरेणमोचनं । जयद्रथेनतपःप्रसादितान्महादेवादर्जुनवर्जं एकस्मिन्दिनेपाण्डवजयरूपवरादानं ।

समाप्तंजयद्रथविमोक्षणपर्व ॥ १७ ॥

अथ रामोपाख्यानपर्व ॥ १८ ॥ अध्यायाः ॥ २० ॥

(२७४–२९३) ॥ श्लोकाः ॥ ७६९ ॥

२७४	२७३	१३	युधिष्ठिरेणमार्कण्डेयंप्रतिस्वसमानदुःखिसत्ताप्रश्नः ।
२७५	२७४	१७	रामोपाख्यानारंभः । रामादीनामुत्पत्तिः । कुबेरोत्पत्तिः ।
२७६	२७५	४०	मुनिवरेणविश्रवसा भार्यात्रयेरावणादीनामुत्पादनं । सानुजेनरावणेन ब्रह्मणोवरप्राप्तिः । कुबेरनिष्कासनपूर्वकंतस्यलङ्कायांनिवासः ।
२७७	२७६	१९	रावणोपद्रुतदेवगणप्रार्थितेनब्रह्मणा श्रीहरेरामत्वेनप्रादुर्भावनिवेदनपूर्वकं तान्प्रतितत्साहाय्यार्थंवानरादिभावेन जननचोदना ।
२७८	२७७	६३	रामस्ययौवराज्याभिषेकारंभः । तस्य वनगमनं । शूर्पणखावैरूप्यकरणं । खरादिहननं । रावणस्यमारीचसमीपगमनं ।
२७९	२७८	४५	रामेणमृगरूपिमारीचहननं । रावणेन सीताहरणं ।

* एतदादिदुर्वास उपाख्यानात्मकमध्यायद्वयं औत्तराहपाठ एव दृश्यते ॥

अध्याय.	छपा.अ.	श्लोक.	
२८०	२७९	४८	जटायुर्दहनं । कबन्धवधः ।
२८१	२८०	७५	रामसुग्रीवसख्यं । रावणेनाशोकवने सीतानिवेशनं । तत्रत्रिजटयासीतायाःपरिसान्त्वनं ।
२८२	२८१	३०	रावणेनसीतासमीपमेत्यबहुधाप्रलोभनेऽप्यविकृतमानसतयाप्रत्याख्यानेस्वावासंप्रतिगमनं ।
२८३	२८२	७१	सुग्रीवेणसीतान्वेषणायवानरप्रेषणं । लङ्कापुरात्प्रतिनिवृत्तेनहनुमतारामाय सीतावृत्तान्तनिवेदनं ।
२८४	२८३	५४	रामेणसमुद्रतीरेदर्भसंस्तरेशयनं । विभीषणशरणागतिः । सेतुबन्धनं ।
२८५	२८४	४१	अङ्गदेनरावणायरामनिदेशकथनं । वानरराक्षसयुद्धारंभः ।
२८६	२८५	१५	रामलक्ष्मणादीनांरावणेन्द्रजिदादिभिःसहयुद्धं ।
२८७	२८६	२९	प्रहस्तधूम्राक्षादिवधः । कुंभकर्णेन युद्धायागमनं ।
२८८	२८७	३०	कुंभकर्णवधः ।
२८९	२८८	२७	लक्ष्मणेन्द्रजितोर्युद्धं ।
२९०	२८९	३४	इन्द्रजिच्छरजालेनमुग्धयोरामलक्ष्मणयोर्विज्ञानास्त्रेणमोहापनोदनं । सुग्रीवेणमहौषध्यातयोर्विशल्यीकरणं । रामादीनांनेत्रेषुकुबेरदूतानीतजलमार्जनेनातीन्द्रियवस्तुदर्शनशक्त्युदयः । ततोयुद्धायपुनरागतस्येन्द्रजितोलक्ष्मणेनवधः । सीतावधोद्यतस्यरावणस्य वृद्धामात्येनसाम्नाततोविनिवर्तनं ।
२९१	२९०	३३	रावणेनस्वयंयुद्धायागमनं । इन्द्रेण रामायनिजरथप्रेषणं । रावणवधः ।
२९२	२९१	७१	रामसमीपेसीताया आगमनं । सीतायाःसौशील्येशङ्कमानंरामंप्रतिब्रह्मणातत्सौशील्यकथनपूर्वकंतत्परिग्रहचोदना । सर्वैःसहरामस्यायोध्यागमनं । रामपट्टाभिषेकः । सुग्रीवविभीषणादीनांस्वस्वपुरंप्रतिप्रेषणं । रामेण राज्यपरिपालनं ।
२९३	२९२	१४	मार्कण्डेयेनरामोपाख्यानकथनपूर्वकं युधिष्ठिरस्यशोकापनोदनं ।

समाप्तंरामोपाख्यानपर्व ॥ १८ ॥

अथपतिव्रतामाहात्म्यपर्व ॥ १९ ॥ अध्यायाः ॥ ७ ॥ (२९४-३००) ॥ श्लोकाः ॥ ६०१ ॥

अध्याय.	छपा.अ.	श्लोक.	
२९४	२९३	४२	सावित्र्युपाख्यानारंभः । सावित्र्युत्पत्तिः । सावित्र्यावरान्वेषणं ।
२९५	२९४	३३	सावित्र्यासत्यवतोभर्तृत्वेनवरणं । नारदेनसत्यवत अल्पायुष्ट्वकथनेपितयातादृशाध्यवसायादनिवर्तनं ।
२९६	२९५	२३	सावित्रीसत्यवतोर्विवाहः ।
२९७	२९६	३४	कदाचननारदनिर्दिष्टेसत्यवतोमृतिदिनेसावित्र्यावनंगच्छतोभर्तुरनुगमनं ।
२९८	२९७	११३	वनंप्रविष्टेनसत्यवताफलाहरणपूर्वकं काष्ठविपाटनं । शिरोवेदनादूनेनतेन भार्योत्सङ्गेशिरोनिधायशयनं । तत्र सत्यवन्मारणाययमागमनं । सत्यवन्तंतच्छरीरात्पाशबन्धनेनाकृष्यगच्छतोयमस्यसावित्र्याऽनुगमनं । तत्स्तुतिवचनेनतुष्टेनयमेनतस्यैवरदानपूर्वकंसत्यवतोविसर्जनं । ततःपुनरुज्जीवितेनसत्यवतासावित्र्यासहस्वाश्रमगमनायप्रस्थानं ।
२९९	२९८	४५	अकस्माच्चक्षुर्लाभतुष्टेनद्युमत्सेनेनतत्र तत्रपुत्रान्वेषणं । सत्यवतापितुराश्रमाभिगमनं ।
३००	२९९	१७	द्युमत्सेनस्यराज्यप्राप्तिः । सत्यवतो यौवराज्याभिषेकः । कथोपसंहारः ।

समाप्तंपतिव्रतामाहात्म्यपर्व ॥ १९ ॥

अथ कुण्डलाहरणपर्व ॥ २० ॥ अध्यायाः ॥ ११ ॥ (३०१-३११) ॥ श्लोकाः ॥ ३१० ॥

अध्याय.	छपा.अ.	श्लोक.	
३०१	३००	३९	सूर्येणस्वप्नेकर्णंप्रति अर्जुनप्रियचिकीर्षयाभाविकवचकुण्डलयाचनानिवेदनपूर्वकंतद्दानप्रतिषेधोपदेशः । कर्णेनसूर्यंप्रतिसहेतुकमिन्द्रायतद्दानप्रतिज्ञानं ।
३०२	३०१	१८	सूर्येणहेतुकथनपूर्वकंपुनरिन्द्रायकवचकुण्डलदानप्रतिषेधोपदेशः ।
३०३	३०२	२५	कर्णेनसानुनयंशक्रायकवचकुण्डलदानेऽभ्यनुज्ञाप्रार्थना । सूर्येणकर्णंप्रति शक्राच्छक्तिगृहीत्वातद्दानाभ्यनुज्ञानं ।

अध्याय.	छापा.अ.	श्लोक.	
३०४	३०३	२९	दुर्वाससःपरिचर्यार्थंकुन्तिभोजेनकुन्त्यानियोजनं ।
३०५	३०४	२०	कुन्त्यापरिचर्ययादुर्वाससःपरितोषणं ।
३०६	३०५	२३	दुर्वाससाकुन्त्यैसकलदेववशीकरणदक्षस्यमन्त्रस्योपदेशः ।
३०७	३०६	२८	कदाचनऋतुस्नातयासूर्यमवलोक्यन्त्याकुन्त्यादुर्वासोदत्तमन्त्रपरीक्षणायतदाह्वानं । तत्रसूर्यागमनं ।
३०८	३०७	२८	मैथुनमन्तरादुश्शकानुनयेभास्करेकुन्त्याकृच्छ्रात्तदङ्गीकरणं । सूर्येणपुनःकन्यात्वरूपवरदानपूर्वकंतस्यांगर्भाधानं ।
३०९	३०८	२९	कुन्त्यांसहजकवचकुण्डलस्यकर्णस्योत्पत्तिः । शिशुंमञ्जूषायांनिक्षिप्याश्वनद्यांविसर्जनं । मञ्जूषायाःक्रमेणचम्पापुरीप्रवेशः ।
३१०	३०९	२७	सूतेनाधिरथेनमञ्जूषायाग्रहणं । तत्स्थशिशोःस्वपुत्रत्वेनकरणं । कर्णेनपरशुरामादिभ्योऽस्त्रग्रहणं । दुर्योधनेनसहसख्यकरणं ।
३११	३१०	४४	ब्राह्मणवेषधारिणेन्द्रेणकवचकुण्डलयाचनं । कर्णेनतस्माच्छक्तिग्रहणपूर्वकंतद्दानं ।

समाप्तंकुण्डलाहरणपर्व ॥ २० ॥

अथारणेयपर्व ॥ २१ ॥ अध्यायाः ॥ ४ ॥

(३१२–३१५) ॥ श्लोकाः ॥ २३७ ॥

अध्याय.	छापा.अ.	श्लोक.	
३१२	३११	२१	युधिष्ठिरादिभिःकाम्यकवनात्पुनर्द्वैतवनंप्रत्यागमनं । तत्रकेनचिन्मृगेणतरुसंघर्षणात्स्वविषाणलग्नेनब्राह्मणस्यारणिनासहपलायनं । तदानयनायपाण्डवैस्तदनुधावनं । ततस्तैःसुदूरंस्वापकर्षणपूर्वकमन्तर्हितेमृगेश्रान्त्यावटमूलेसमुपवेशनं ।
३१३	३१२	५१	पानीयानयनायसरोगतेषुनकुलादिषुयक्षवचनावमत्यापानीयपानेनदीर्घनिद्राश्रयणादनागतेषुयुधिष्ठिरेणापितत्सरोगमनं ।
३१४	३१३	१३६	युधिष्ठिरेणसरस्तीरशायिनांभ्रातॄणामवलोकनेनसकरुणंपरिदेवनपूर्वकंजलपानायप्रयतनं । यक्षेणस्वप्रश्नानामुत्तरदानमन्तराजलपानस्यदुश्शकत्वकथनेयुधिष्ठिरेणतेषांसमुचितोत्तरदानं । ततस्तुष्टेनयक्षेणभीमादीनांचतुर्णामुज्जीवनं ।
३१५	३१४	२९	यक्षेणयुधिष्ठिरंप्रतिस्वस्वरूपप्रकाशनपूर्वकंअरणिहरणादेःशीलशोधनायस्वकृतत्वकथनेनतदभिमतवरप्रदानं ।

समाप्तमारणेयपर्व ॥ २१ ॥

वनपर्वसंपूर्णं ॥ ३ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

विराटपर्व ॥ ४ ॥

अवान्तरपर्वाणि ॥ ५ ॥ अध्यायाः ॥ ७८ ॥ श्लोकाः ॥ ३४९४ ॥

अथ पाण्डवप्रवेशपर्व ॥ १ ॥ अध्यायाः ॥ १४ ॥

(१–१४) ॥ श्लोकाः ॥ ६१६ ॥

अध्याय.	झपा.अ.	श्लोक.	
१	*	५०	युधिष्ठिरेणब्राह्मणायमृगापहृतारणिभाण्डप्रत्यर्पणं । धौम्येनयुधिष्ठिरस्य परिसान्त्वनं । पाण्डवैर्धौम्येनसह मन्त्रायकचिदुपवेशनं ।
२	१	३१	युधिष्ठिरेणभ्रातृभिःसंमन्त्र्यविराटनगरेनिवासनिर्धारणं । तथास्वस्ययतिवेषपरिग्रहेणविराटसभास्तारीभवनकथनं ।
३	२	५२	भीमेनयुधिष्ठिरंप्रतिस्वस्यसूदवेषपरिग्रहेणविराटभवनेनिवासकथनं । अर्जुनेननपुंसकवेषपरिग्रहेणराजकन्यानाटनादिकथनं ।
४	३	३८	नकुलेनविराटनगरेऽश्वपालकतयास्वस्यनिवासकथनं । सहदेवेनगोपालकतयास्वस्यनिवासकथनं ।
५	४	८६	पाण्डवैरिन्द्रसेनादीन्प्रतिद्वारकादिगमनचोदना । पाण्डवान्प्रतिधौम्येन राजगृहवासप्रकारानुशासनं ।
६	५ (१–९)	२७	पाण्डवैर्धौम्यविसर्जनपूर्वकंविराटनगरसमीपगमनं ।
७	५ (१०–३७)	६७	श्मशानसंनिहितेशमीवृक्षेस्वायुधनिक्षेपः।तथास्वेषांसांकेतिकनामकल्पनं ।
८	६†	३६	युधिष्ठिरकृतादुर्गास्तुतिः ।
९	७	५४	युधिष्ठिरेणयतिवेषपरिग्रहेणविराटसभाप्रवेशः । प्रत्युत्थानादिनासत्कृतेन युधिष्ठिरेणविराटभवनेनिवासः ।
१०	८	२४	भीमेनसूदवेषपरिग्रहेणविराटसभाप्रवेशः । विराटेनतस्यपाकाधिकारे नियोजनं ।
११	११	२४	अर्जुनेनषण्डवेषेणविराटसभाप्रवेशः । विराटेनतस्यकन्यानाटनेनियोजनं ।
१२	१२	१६	नकुलेनसादिवेषेणविराटसभाप्रवेशः। विराटेनतस्याश्वपालनेनियोजनं ।
१३	१०	२७	सहदेवेनगोपवेषधारिणाविराटसभागमनं । विराटेनतस्यगवांपालनेनियोजनं ।
१४	९	८४	द्रौपद्यासैरन्ध्रीवेषधारणेनसुदेष्णागृहे निवासः ।

समाप्तं पाण्डवप्रवेशपर्व ॥ १ ॥

अथ समयपालनपर्व ॥ २ ॥ अध्यायः ॥ १ ॥

(१५) ॥ श्लोकाः ॥ ६३ ॥

अध्याय.	झपा.अ.	श्लोक.	
१५	१३	६३	पाण्डवैःस्वस्वव्यापारैर्विराटपरितोषणं। भीमेनशङ्करोत्सवेमहामल्लमारणं ।

समाप्तंसमयपालनपर्व ॥ २ ॥

अथ कीचकवधपर्व ॥ ३ ॥ अध्यायाः ॥ १३ ॥

(१६–२८) ॥ श्लोकाः ॥ ७२२ ॥

अध्याय.	झपा.अ.	श्लोक.	
१६, १७	१४	३३, २१	द्रौपद्यास्वात्मानंकामयमानस्यकीचकस्य प्रत्याख्यानं ।
१८	१५	५६	कीचकेनसुदेष्णांप्रतिद्रौपद्याःस्ववशीकरणप्रार्थना । सुदेष्णयाकीचकेसुराहरणव्याजेनतद्गृहंप्रतिद्रौपदीप्रेषणप्रतिज्ञानं । तथासुरानयनायकीचकगृहंप्रतिद्रौपद्यागमनचोदना ।
१९	१६ (१–३३)	६४	कीचकगृहंप्रतिप्रस्थितयाद्रौपद्यास्वस्यादूषणायसूर्यादिदेवप्रार्थना । सूर्येणतद्रक्षणायनिगूढस्य रक्षसःप्रेषणं । कीचकेनद्रौपदींप्रतिस्ववशीभवनया-

* एतदध्यायस्थाकथा औत्तराहपाठेवनपर्वणः ३१५ तमाध्यायस्थतयावर्तते ।

† अयमध्यायोदाक्षिणात्यकोशेषुनास्ति ।

अध्याय.	छापा.अ.	श्लोक.	
			चनं । तथातदनङ्गीकारेरोषात्पादेन ताडनं । सूर्यदूतेनरक्षसाकीचकस्य भूमौनिपातनं । युधिष्ठिरेणकीचकजिघांसोर्भीमस्यसंकेतेनप्रतिषेधनं ।
२०	१६ / ३४-५१	७८	विराटेनकीचकस्यदण्डाप्रयोगाद्दुष्टया॰ द्रौपद्यातंप्रत्युपालंभनं । युधिष्ठिरेणद्रौपद्याःसान्त्वनं । अज्ञानादिवशोकहेतुंपृच्छन्तींसुदेष्णांप्रतिद्रौपद्यातद्धेतोःकथनं ।
२१	+	३८	कीचकोत्पत्तिप्रकारादिकथनं ।
२२	१७ / १८ / १९	१२५	कीचकंजिघांसन्त्याद्रौपद्यारात्रौमहानसमेत्यस्वपतोभीमस्यप्रबोधनं । कीचककृतापमानकथनं । तथायुधिष्ठिरादीन्प्रतिनामनिर्देशपूर्वकमनुशोचनं ।
२३	२०	३३	द्रौपद्याभीमंप्रतिकीचकहननचोदना । भीमेनद्रौपदींदृष्ट्वाशोचनं ।
२४	२१	५५	द्रौपदीभीमसेनसंवादः । द्रौपद्याभीमंप्रतिकीचकहननचोदना ।
२५	२२ / १-३५	५३	भीमवचनाद्द्रौपद्याकीचकंप्रतिरात्रौनर्तनागारागमनचोदना ।
२६	२२ / ३६-९४	५४	पूर्वमेवनर्तनागारमागतेनभीमेनपश्चादागतस्यकीचकस्यमारणं । उपकीचकानांतत्रागमनं ।
२७	२३	६५	उपकीचकैःपाञ्चाल्याःकीचकेनसहचरमविमानारोपणेनश्मशानप्रापणं । भीमेनोपकीचकानांहननं ।
२८	२४	४७	सुदेष्णयाविराटनियोगाद्द्रौपदींप्रतिस्वपुरान्निर्गमनचोदना । द्रौपद्यामासावधिस्ववासाभ्यनुज्ञाप्रार्थनायांसुदेष्णयातदङ्गीकरणं ।

समाप्तंकीचकवधपर्व ॥ ३ ॥

अथ गोग्रहणपर्व ॥ ४ ॥ अध्यायाः ॥ ४५ ॥

(२९-७३) ॥ श्लोकाः ॥ १९१६ ॥

अध्याय.	छापा.अ.	श्लोक.	
२९	२५	३७	पाण्डवान्वेषणायक्रमेणविराटपुरमागतैश्चारैर्हास्तिनपुरमेत्यदुर्योधनसमीपेपाण्डवानवगतिनिवेदनपूर्वकंकीचकवधनिवेदनं ।
३०	२६	२३	दुर्योधनादिभिःपाण्डवान्वेषणायसमालोचनं ।
३१	२७ / २८	५३	द्रोणेनदुर्योधनंप्रतिपाण्डवानांधार्मिकत्वादिगुणकथनं । भीष्मेणतैःसहसंधिविधानं ।
३२	२९ / ३०	६४	दुर्योधनेनकीचकवधस्यभीमसेनकृतत्वसंभावना । तथाभीष्माद्यनुमत्यासुशर्मणोविराटनगरंप्रतिप्रेषणं । सुशर्मणाविराटनगरमेत्यदक्षिणभागेगोग्रहणं ।
३३	३१	४९	गोपैर्विराटंप्रतिसुशर्मणागोग्रहणनिवेदनं । विराटादिभिर्युद्धायनिर्गमोद्यमः । युधिष्ठिरेणविराटंप्रतिस्वेषांयुद्धकौशलनिवेदनेनभ्रातृभिःसहसमरायाभियानं ।
३४	३२	३३	विराटसुशर्मसैन्ययोर्युद्धं । युधिष्ठिरादिनिहतानांपरिसंख्यानं । विराटसुशर्मणोर्युद्धं ।
३५	३३	७१	सुशर्मणाविराटस्ययुद्धं । भीमेनयुधिष्ठिरचोदनयाविराटस्यमोचनपूर्वकंसुशर्मणोबन्धनं । युधिष्ठिरेणकरुणयासुशर्मणोविमोचनं ।
३६	३४	२७	युधिष्ठिरचोदनयाविराटप्रेषितैर्दूतैर्नगरमेत्यजयोद्घोषणं ।
३७	३५	२२	दुर्योधनेनभीष्मद्रोणादिभिःसहविराटनगरमेत्योत्तरभागेगवांग्रहणं । गोपालेनोत्तरकुमारंप्रतिगोग्रहणनिवेदनं ।
३८	३६ / ३७	७३	उत्तरेसमुचितसारथेरभावेनखिद्यमानेऽर्जुनेनद्रौपदींप्रत्युत्तरायबृहन्नलायाःसारथ्यकौशल्यनिवेदनचोदना । उत्तरयाबृहन्नलांप्रतिसारथ्यकरणप्रार्थना । अर्जुनसारथिकेनोत्तरेणरणाभियानं ।
३९	३८	८०	उत्तरेणरथादवस्कन्द्यभयात्पलायनं । तमनुधाविनाऽर्जुनेनतस्यकेशपाशेग्रहणेनपरिसान्त्वनपूर्वकंपुनारथारोपणं । गाण्डीवानयनायशमींप्रतिगमनं ।
४०	३९ / ४० / ४१	६०	बृहन्नलांदृष्ट्वाऽयमर्जुनएवेतिकुरूणांनिश्चयः । शमीसमीपमेत्यार्जुनेनोत्तरंप्रतिपाण्डवैरायुधान्यत्रनिहितानीतिकथनं । उत्तरेणार्जुनचोदनयाशमीमारुह्यधनुरादानं ।
४१	४२	२१	उत्तरेणार्जुनंप्रतितत्तत्कार्मुकस्वामिनांप्रश्नः ।
४२	४३	२५	अर्जुनेनोत्तरंप्रतियुधिष्ठिराद्यायुधानांपृथक्पृथङ्नामनिर्देशेनतत्तत्स्वामिकत्वकथनं ।
४३	४४	५२	अर्जुनेनोत्तरंप्रतिस्वस्यार्जुनत्वकथनपू-

अध्याय.	झपा.अ.	श्लोक.	
			वैकंकङ्कादीनांयुधिष्ठिरादित्वकथनं । अर्जुनस्यदशनाम्नांनिर्वचनं ।
४४	४५	६०	उत्तरेणस्वापराधक्षमापनं । अर्जुनेन स्वस्यक्लैब्यप्राप्तिहेतुकथनं । उत्तरंसारथिंकृत्वाऽर्जुनेनरणायाभियानं ।
४५	४६ १-२३	२८	अर्जुनेनहनुमद्ध्वजस्यरथेस्थापनं । तथास्वशङ्खादिशब्दश्रवणवित्रस्तस्योत्तरस्यसमाश्वसनपूर्वकंरणाभियानं ।
४६	४६ २४-३३	१८	द्रोणेनदुर्योधनंप्रतिबृहन्नलाया अर्जुनत्वकथनपूर्वकंदुर्निमित्तकथनं ।
४७	४७	३५	द्रोणवचनाद्बृहन्नलाया अर्जुनत्वनिर्धारणेनविषादात्तूष्णींभूतेषुस्वीयेषुदुर्योधनेनतेषांसमरप्रोत्साहनं ।
४८	४८	२८	कर्णेनात्मश्लाघनपूर्वकमर्जुनपराभवनप्रतिज्ञानं ।
४९	४९	२६	कृपाचार्येणार्जुनप्रशंसनपूर्वकंकर्णगर्हणं । तथास्वेष्वेकैकेनार्जुनस्यदुर्जयत्वकथनपूर्वकंसंभूयाभियाननिर्धारणं ।
५०	५०	४१	कर्णेनकृपाचार्यगर्हणं । तदसहिष्णुनाऽश्वत्थाम्नासमर्मोद्घाटनंकर्णदुर्योधनोपालंभः ।
५१	५१	२४	संक्रुद्धमश्वत्थामानंप्रतिभीष्मेणद्रोणादिप्रशंसनपूर्वकंपरिसान्त्वनं। दुर्योधनेनभीष्मकर्णाभ्यांसहकृपद्रोणक्षमापनं ।
५२	५२	३३	भीष्मेणदुर्योधनंप्रतिहेतूपन्यासपूर्वकं युधिष्ठिरप्रतिश्रुतवनवासादिकालस्यपरिसमाप्तिकथनं । भीष्मेणद्रोणवचनाद्रोभिःसहदुर्योधनस्यप्रस्थापनपूर्वकंसेनायाव्यूहीकरणेनसमरायाभियानं ।
५३	५६	२१	इन्द्रेणसुदर्शननामनिकामगामिनिप्रासादेदेवगणसमारोपणपूर्वकंरणावलोकनायगगनाङ्गणावतरणं ।
५४	५३	२२	सैन्यमध्येदुर्योधनमनवलोकयताऽर्जुनेनोत्तरंप्रतितत्पदवीमनुरथयापनचोदना । तथाद्वाभ्यांद्वाभ्यांबाणाभ्यां द्रोणाद्यभिवादनपूर्वकंताभ्यामेवतत्तत्कर्णमूलेकुशलप्रश्नः । द्रोणेनतत्कौशलश्लाघनं ।
५५	५४	४६	अर्जुनेनसेनामध्येसुयोधनानवलोकनेनतस्यगवामादानेनगमनसंभावनया रथेनगवाम्प्रंप्रत्यभियानं । भीष्मेण पार्थभावविज्ञानेनसेनयासहतमनुधावनं । गवान्तिकमुपगतवताऽर्जुनेन तद्रक्षिणांबाणगणैरभिहननेनगवांनिवर्तनं ।
५६	५५	२८	अर्जुनेनोत्तरंप्रतिद्रोणकर्णादिरथानामसाधारणध्वजचिह्नप्रदर्शनपूर्वकंतत्तन्नामनिर्देशेनतत्तत्पराक्रमवर्णनं ।
५७	५४	६८	अर्जुनस्यभीष्मद्रोणादिभिःसहयुद्धं । अर्जुनेनकर्णस्यपराजयः ।
५८	५४ ६०	७७	अर्जुनेनकर्णपराजयः । अर्जुनपराजितेनकर्णेनरणाङ्गणादपयानं ।
५९	५८	९८	द्रोणार्जुनयोर्युद्धवर्णनं । अर्जुनबाणाभिहतिविषण्णेद्रोणेऽश्वत्थाम्नातद्रक्षणायार्जुनंप्रत्यभियानं । अत्रान्तरे द्रोणेनापयानं ।
६०	५९	१७	अर्जुनेनाश्वत्थामपराजयः ।
६१	५७	६२	अर्जुनस्यकृपाचार्येणसहयुद्धं । समराङ्गणवर्णनं ।
६२	६४	३४	भीष्मार्जुनयोर्युद्धं ।
६३	६४	५३	अर्जुनेनभीष्मपराजयः ।
६४	६२ ६३	२७	अश्वत्थाम्नाकर्णगर्हणं । कर्णादिपञ्चमहारथैरर्जुनंप्रत्यभियानं ।
६५	६१	५४	अर्जुनेनदुश्शासनादिपराभवनपूर्वकं भीष्मादिभिःसहायोधनं ।
६६	६५	५१	अर्जुनेनभीतमुत्तरंसमाश्वास्यदुर्योधनरथंप्रतिस्वरथयापनचोदना । तथायुद्धेपलायमानदुर्योधनंप्रतिसोपहासमाह्वानं ।
६७	६६	४६	दुर्योधनेनपुनःपरावृत्याभियानं । भीष्मादिभिस्तद्रक्षणायपरितोऽवस्थानं । अर्जुनेनतैःसहचिरंप्रयुध्यपश्चात्संमोहनास्त्रप्रयोगः । उत्तरकुमारेणार्जुनचोदनयाऽस्त्रमोहितानांवस्त्रापहरणं । अर्जुनेनबाणैर्भीष्माद्यभिवादनं ।
६८	६७	२४	अर्जुनेनोत्तरंप्रतियुधिष्ठिरादितत्वप्रकाशनप्रतिषेधः । तथाशमीतरावायुधनिधानपूर्वकंबृहन्नलावेषपरिग्रहेण सारथ्यकरणं । उत्तरेणार्जुनचोदनयास्वजयोद्घोषणायनगरंप्रतिदूतप्रेषणं।
६९	६८ १-२८	३५	विराटेनयुधिष्ठिरादिभिःसहसुशर्मादिजयानन्तरंपुरंप्रत्यागमनं । तथोत्तरस्यकुरुविजयायबृहन्नलयासहगमनश्रवणेनतद्रक्षणायसेनाप्रेषणचोदना ।

अध्याय.	झपा.अ.	श्लोक.	
७०	६८ २९-४९	५१	अत्रान्तरेविराटायदूतैरुत्तरजयनिवेदनं ।कुमारानयनायवादित्रादिप्रेषणं। उत्तरजयश्रवणहृष्टेनविराटेनयुधिष्ठिरेणसहद्यूतदेवनं । विराटेनोत्तरप्रशंसनेकङ्केनबृहन्नलयाकुरुपराजयकथनं। ततोरुष्टेनविराटेनतस्यमुखेऽक्षेणताडनं । क्षतात्प्रस्रवतोरक्तस्यसैरन्ध्र्यानिजोत्तरीयेणग्रहणं ।
७१	+	३१	अर्जुनकौरवयुद्धदिदृक्षयासमागतानां देवानांपुनःस्वर्गंप्रतिगमनं ।
७२	६८ ५० ७६ ६९	६९	उत्तरेणराजाभ्यनुज्ञयाऽन्तःपुरमेत्य तदभिवादनं । युधिष्ठिरव्रणावलोकनभीतस्योत्तरस्यचोदनयाविराटेनयुधिष्ठिरक्षमापनं । ततोर्जुनस्यान्तःप्रवेशः । विराटेनोत्तरप्रशंसनेतेनतंप्रति कस्यचिद्देवपुत्रस्यजेतृत्वकथनं । ततोऽर्जुनेनोत्तराप्रभृतिभ्यःकुरुवस्त्रदानं ।
७३	+	१९	भीमार्जुनादिभीरात्रौयुधिष्ठिरसमीपगमनं । युधिष्ठिरेणसहर्षस्वानभिभाषणे अर्जुनेनभीमंप्रतितत्कारणप्रश्नः । युधिष्ठिरेणतंप्रतिविराटेनाक्षताडनस्य तत्कारणत्वकथनं । भीमादिभिःक्रोधाद्विराटवधाध्यवसायेयुधिष्ठिरेणसहेतुकंतत्प्रतिषेधनं ।

समाप्तं गोग्रहणपर्व ॥ ४ ॥

अथ वैवाहिकपर्व ॥ ५ ॥ अध्यायाः ॥ ५ ॥

(७४–७८) ॥ श्लोकाः ॥ १७७ ॥

अध्याय.	झपा.अ.	श्लोक.	
७४	७०	३०	परेद्युःप्रभातेयुधिष्ठिरादिभीराजलक्षणधारणेनसिंहासनादिषूपवेशनं । तत्रागतवताविराटेनयुधिष्ठिरस्यसिंहासनोपवेशनाक्षेपः । अर्जुनेनतस्य याथातथ्यकथनं ।
७५	७१	३६	अर्जुनेनविराटप्रश्नाद्बृहन्नलादीनांभीमसेनादित्वकथनं । उत्तरेणयुधिष्ठिरादीनांपराक्रमवर्णनं । ततोविराटेन युधिष्ठिरादीनांप्रसादनं ।
७६	+	२०	उत्तरेणविराटंप्रतियुधिष्ठिरादिकृतोपकारस्मारणपूर्वकमुत्तरायाःप्रदानेनतत्प्रसादनचोदना । उत्तरायाःपुरस्कारेणसप्रणामंप्रसादयतेविराटायाभयप्रदानं ।
७७	७२ १-१३	३७	विराटेनार्जुनंप्रतिस्वकुमार्याउत्तरायाभार्यात्वेनप्रतिग्रहणप्रार्थनेतंप्रत्यर्जुनेनसहेतुकथनंस्नुषात्वेनपरिग्रहाङ्गीकरणं । दुर्योधनेनयुधिष्ठिरंप्रतिदूतमुखेनत्रयोदशवत्सरस्यासंपूर्तावेवार्जुनेनात्मप्रकाशनात्पुनर्वनवासविधेयतानिवेदनं । युधिष्ठिरेणतंप्रतितेनैवदूतेनभीष्ममुखात्संदेहस्यपरिहरणीयताप्रतिवेदनं । भीष्मेणविचार्यनिर्धारणपूर्वकंसंकेतकालस्यपूर्णत्वोक्तिः ।
७८	७२ १४-४०	५४	उपप्लाव्यंप्रतिकृष्णागमनं । तत्रद्रुपदाद्यागमनं । उत्तराभिमन्योर्विवाहः।

संपूर्णवैवाहिकपर्व ॥ ५ ॥

विराटपर्व संपूर्ण ॥ ४ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

उद्योगपर्व ॥ ५ ॥

अवान्तरपर्वाणि ॥ १० ॥ अध्यायाः ॥ १०६ ॥ श्लोकाः ॥ ६७५३ ॥

अथ सेनोद्योगपर्व ॥ १ ॥ अध्यायाः ॥ १९ ॥

(१–१९) ॥ श्लोकाः ॥ ६०६ ॥

अध्याय.	झपा.अ.	श्लोक.	
१	१	२५	विराटसभांप्रविष्टेषुराजसुश्रीकृष्णेनधृतराष्ट्रंप्रतिदूतप्रेषणनिर्धारणं ।
२	२	१५	बलरामेणस्वस्यदुर्योधनेपक्षपाताविष्करणं ।
३	३	२३	सात्यकिनाबलरामवचनप्रतिक्षेपपूर्वकंदुर्योधननिग्रहनिर्धारणं ।
४	४	२६	द्रुपदेनसात्यकिमतानुमोदनेनराज्ञामाह्वानायदूतप्रस्थापनकथनपूर्वकंस्वपुरोहितस्यधृतराष्ट्रंप्रतिप्रेषणकथनं ।
५	५	१९	श्रीकृष्णेनराज्ञांधृतराष्ट्रस्यचदूतपुरोहितप्रेषणंसंदिश्यद्वारकागमनं । आहूतानांराज्ञामागमनं । दुर्योधनाहूतानांराज्ञांचतंप्रत्यागमनं ।
६	६	१९	द्रुपदेनधृतराष्ट्रंप्रतिस्वपुरोहितप्रेषणं ।
७	७	४१	दुर्योधनार्जुनयोःकृष्णदर्शनाययदृच्छयायुगपद्द्वारकागमनं । अर्जुनेनश्रीकृष्णंसारथ्येनवरयित्वातेनसहहास्तिनपुरगमनं । दुर्योधनेनश्रीकृष्णकुमारानादायकृतवर्मणासहस्वपुरगमनं ।
८	८	६०	शल्यागमनं । गूढेनदुर्योधनेनशल्यसाहाय्यवरणं । युधिष्ठिराभ्यर्थनयाकर्णस्यसारथ्यकरणेतत्तेजोवधकरणप्रतिज्ञानं ।
९	९	६८	त्वष्टृपुत्रस्यविश्वरूपस्यकथा । इन्द्रेणविश्वरूपहननं । तद्वधकुपितेनत्वष्ट्रेन्द्रवधायवृत्रस्योत्पादनं ।
१०	१०	५३	इन्द्रेणवृत्रासुरवधः । इन्द्रस्यब्रह्महत्याप्राप्तिः ।
११	११	२६	नहुषस्यदेवराज्येऽभिषेकः । नहुषेणशचीकामना ।
१२	१२	३२	नहुषवञ्चनायशच्यातेनसहसमयकरणायतत्समीपगमनं ।
१३	१३	२७	शच्यासमयकरणं । देवैर्विष्ण्वाज्ञयेन्द्रस्यब्रह्महत्यापनोदनायाश्वमेधयाजनं । शच्योपश्रुतिदेवीपूजनं ।
१४	१४	१८	उपश्रुतिदेव्याशच्यै इन्द्रप्रदर्शनं ।
१५	१५	३७	शचीवचनान्नहुषेणागस्त्यादिसप्तर्षीणांस्वशिबिकावाहनचोदना । अग्निनेन्द्रान्वेषणं ।
१६	१६	३६	अग्निनापद्मनालस्थमिन्द्रंदृष्ट्वाबृहस्पतयेतन्निवेदनं । बृहस्पतिनातत्रगत्वेन्द्रेस्तूयमानेकुबेरादीनांतत्रागमनं । इन्द्रेणनहुषजयेसाहाय्यायाग्नेर्भागदानपूर्वकंकुबेरादीनांतत्तद्दिगाधिपत्येऽभिषेचनं ।
१७	१७	२३	लोकपालैस्सहनहुषनिषूदनोपायंमन्त्रयन्तमिन्द्रमेत्यागस्त्येन नहुषस्यदेवराज्यात्परिभ्रंशनिवेदनम् ।
१८	१८	२५	इन्द्रेणपुनर्देवलोकमेत्यत्रैलोक्यराज्यपालनं । शल्येनेन्द्रवृत्तान्तकथनपूर्वकंयुधिष्ठिरादीनाश्वास्यपुनर्दुर्योधनसमीपगमनं ।
१९	१९	३३	सात्यकिप्रमुखानांराज्ञांस्वस्वसेनानयनपूर्वकंयुधिष्ठिरंप्रत्यागमनं । भगदत्तादीनांदुर्योधनंप्रत्यागमनं ।

समाप्तं सेनोद्योगपर्व ॥ १ ॥

अथ सञ्जययानपर्व ॥ २ ॥ अध्यायाः ॥ १३ ॥

(२०–३२) ॥ श्लोकाः ॥ ३८१ ॥

अध्याय.	झपा.अ.	श्लोक.	
२०	२०	२१	हास्तिनपुरंगतेनद्रुपदपुरोहितेनसभामध्येद्रुपदवचनकथनं ।
२१	२१	२२	भीष्मेणद्रुपदपुरोहितवाक्येऽनुमोदितेकर्णेनतदाक्षेपपूर्वकंसङ्केतकालस्यसशे-

अध्याय.	छपा.अ.	श्लोक.	
			षतयापुनर्वनवासादिनातत्समापने राज्यदानोक्तिः । भीष्मेणकर्णाधिक्षेपः । धृतराष्ट्रेणपाण्डवान्प्रतिस्वेन सञ्जयप्रेषणकथनपूर्वकंपुरोहितस्यप्रतियापनं ।
२२	२२	४०	धृतराष्ट्रेणपाण्डवान्प्रतिसञ्जयप्रेषणं ।
२३	२३	२८	सञ्जयेनोपप्लव्यंगत्वापाण्डवान्प्रतिधृतराष्ट्रकृतकुशलप्रश्नकथनं । युधिष्ठिरेणसञ्जयंप्रतिधृतराष्ट्रादीनांकुशलप्रश्नः।
२४	२४	१०	सञ्जयेनयुधिष्ठिरप्रश्नानामुत्तरदानपूर्वकंधृतराष्ट्रसंदेशश्रवणविधानं ।
२५	२५	१५	सञ्जयेनयुद्धनिन्दनपूर्वकंपाण्डवैःशमस्वीकारस्यभीष्मधृतराष्ट्राद्यभिमतत्वकथनं ।
२६	२६	२९	युधिष्ठिरेणस्वेषामजय्यत्वमभिधाय स्वस्येन्द्रप्रस्थराज्यदानेशान्तिकथनं ।
२७	२७	२७	सञ्जयेनयुधिष्ठिरंप्रतियुद्धेदोषोद्भावनपूर्वकंपरैर्भागाप्रदानेपिशमाश्रयणस्यैवज्यायस्त्वकथनं ।
२८	२८	१४	युधिष्ठिरेणधर्माधर्मनिर्णयस्येतरासाधारणतयास्वस्यधर्मरहस्यज्ञश्रीकृष्णवचनानुयायित्वकथनं ।
२९	२९	६०	श्रीकृष्णेनसञ्जयंप्रतिस्वस्यसन्ध्यर्थंधृतराष्ट्रसमीपेआगमनकथनं ।
३०	३०	५२	युधिष्ठिरेणसञ्जयंप्रतिभीष्मादिभ्यः स्वेषांकुशलनिवेदनचोदनं । तथादुर्योधनंप्रतिसन्धिविग्रहान्यतरपक्षस्वीकरणाभ्यनुज्ञानकथनचोदनं ।
३१	३१	२३	युधिष्ठिरेणसञ्जयंप्रतिधृतराष्ट्रभीष्मयोरभिवादनपूर्वकंसन्धिकरणविज्ञापननिवेदनचोदनं । तथादुर्योधनंप्रति तत्कृतानयोपेक्षणकथनपूर्वकंग्रामपञ्चकदानेनसन्धिकरणसंदेशः ।
३२	३२	४०	सञ्जयेनरात्रौधृतराष्ट्रमुपागम्ययुधिष्ठिरकृतकुशलप्रश्नादिकथनं । तथा धृतराष्ट्रंविगर्ह्ययुधिष्ठिरवचनस्यश्वःकथनपूर्वकंस्वभवनगमनं ।

समाप्तं सञ्जययानपर्व ॥ २ ॥

अथ प्रजागरपर्व ॥ ३ ॥ अध्यायाः ॥ ८ ॥

(३३-४०) ॥ श्लोकाः ॥ ६०९ ॥

अध्याय.	छपा.अ.	श्लोक.	
३३	३३	१३०	धृतराष्ट्रेणरात्रौविदुरानयनं । चिन्तयाप्रजागरंगतेनधृतराष्ट्रेणदुर्योधनादिसुखोपायप्रश्नेविदुरेणनीतिकथनपूर्वकंपाण्डवेभ्योराज्यदानस्यतदुपायत्वकथनं ।
३४	३४	८७	विदुरेणधृतराष्ट्रंप्रतिपुनर्नीतिकथनं ।
३५	३५	८९	विदुरेणधृतराष्ट्रंप्रतिकेशिन्यर्थेसुधन्वविरोचनसंवादकथनपूर्वकंपाण्डवेषुपुत्रतौल्येनवृत्तिविधानं ।
३६	३६	७४	विदुरेणधृतराष्ट्रंप्रति आत्रेयेणसाध्यान्प्रत्युपदिष्टनीतिकथनं । महाकुललक्षणाभिधानं ।
३७	३७	६४	धृतराष्ट्रेण अल्पायुष्ट्वकारणप्रश्नेविदुरेणतदभिधानं ।
३८	३८	४७	विदुरेणधृतराष्ट्रंप्रतिपुनर्नीतिकथनपूर्वकंपाण्डवेभ्योराज्याप्रदानेदुर्योधनस्यराज्यभ्रंशकथनं ।
३९	३९	८६	ज्ञातिसंग्रहेगुणवर्णनं ।
४०	४०	३२	विदुरेणधृतराष्ट्रंप्रतितत्तद्वर्णधर्माणांतैस्तैरवश्यानुष्ठेयत्वकथनपूर्वकंयुधिष्ठिरस्यराज्यंदत्वाक्षात्रधर्मेनियोजनचोदनं ।

समाप्तं प्रजागरपर्व ॥ ३ ॥

अथ सनत्सुजातपर्व ॥ ४ ॥ अध्यायाः ॥ ६ ॥

(४१-४६) ॥ श्लोकाः ॥ २०४ ॥

अध्याय.	छपा.अ.	श्लोक.	
४१	४१	१२	धृतराष्ट्रेणपुनर्धर्मरहस्यकथनंचोदितेन विदुरेणस्वस्यशूद्रयोनिजातत्वेनतत्कथनानौचित्यकथनं । तथास्मरणमात्रसंनिहितंसनत्सुजातंप्रतिधृतराष्ट्राय तत्वोपदेशप्रार्थना ।
४२	४२	४४	सनत्सुजातीयं (सनत्सुजातेनधृतराष्ट्रंप्रतितत्वोपदेशः) ।
४३	४३	६४	
४४	४४	३२	
४५	४५	२१	
४६	४६	३१	

समाप्तं सनत्सुजातपर्व ॥ ४ ॥

अथ यानसन्धिपर्व ॥ ५ ॥ अध्यायाः ॥ २४ ॥

(४७-७०) ॥ श्लोकाः ॥ ७७० ॥

अध्याय.	छपा.अ.	श्लोक.	
४७	४७ . ५९	४२	पाण्डववचनशुश्रूषयाधृतराष्ट्रादीनांसभाप्रवेशः । सञ्जयेनपाण्डवान्प्रतिधृतराष्ट्रसंदेशकथनकथनं । श्रीकृष्णवाक्यकथनंचोदितेनसञ्जयेनस्वस्यकृ-

अध्याय.	झपा.अ.	श्लोक.	
			ष्णार्जुनान्तःपुरप्रवेशकथनपूर्वकंतत्कथनं ।
४८	४८	१०९	सञ्जयेनधृतराष्ट्रंप्रतिश्रीकृष्णमहिमप्रतिपादकानामर्जुनवचसांविस्तरेणकथनं ।
४९	४९	४९	भीष्मेणदुर्योधनंप्रतिकृष्णार्जुनयोर्नरनारायणतादात्म्यकथनपूर्वकंतद्विरोधेकुरूणांविनाशकथनं । तथामर्मोद्घाटनपूर्वकंकर्णगर्हणं । धृतराष्ट्रेणभीष्मद्रोणवचनानादरणेनसर्वेकुरुभिस्स्वजीवितनैराश्याधिगमः ।
५०	५०	५०	धृतराष्ट्रेणपाण्डवानांकिमुपजीवनेनरणोद्योग इतिपृष्टस्यसञ्जयस्यपाण्डवप्रभावानुस्मरणेनमूर्च्छा।लब्धसंज्ञेनसञ्जयेनपाण्डवानांश्रीकृष्णानुगृहीतस्वसामर्थ्येनराज्ञांसाहाय्येन च समरोद्योग इतिकथनं ।
५१	५१	६१	धृतराष्ट्रेणसञ्जयसमीपेभीमसेनप्रतापानुस्मरणेनपरिशोचनम् ।
५२	५२	२०	धृतराष्ट्रेणार्जुनप्रतापानुवर्णनपूर्वकं परिशोचनं ।
५३	५३	१६	धृतराष्ट्रेणकुरून्प्रतिपाण्डवानांबलवत्सहायसम्पन्नत्वादिगुणसमृद्धिकथनपूर्वकंशान्त्यर्थंस्वेनप्रयतनाभिधानं ।
५४	५४	२२	सञ्जयेनपाण्डवेषुजयसाधनसामग्रीमभिधायतेषुधार्तराष्ट्रकृतापकारानुस्मारणपूर्वकंधृतराष्ट्रगर्हणं ।
५५	५५	७०	दुर्योधनेनस्वपरपक्षयोर्बलाबलनिरूपणपूर्वकंधृतराष्ट्रंप्रतिसमाश्वासनं ।
५६	५६	१७	सञ्जयेनपाण्डवभावंबुभुत्सुंदुर्योधनंप्रतितेषांयुद्धोत्कण्ठाकथनपूर्वकंतद्रथाश्ववर्णनं ।
५७	५७	६२	सञ्जयेनपाण्डवसहायानांराज्ञांनामकथनं । दुर्योधनेनस्वपक्षीयाणांप्रताप वर्णनं ।
५८	५८	२९	धृतराष्ट्रेणयुद्धस्यभीष्माद्यनभिमतत्वाभिधानेदुर्योधनेनभीष्माद्यनपेक्षणेन कर्णदुश्शासनसहायेनस्वेनैवपाण्डवहननप्रतिज्ञा ।धृतराष्ट्रेणदुर्योधनगर्हणं।
५९	६६	१४	पुनःपृष्टेनसञ्जयेनधृतराष्ट्रंप्रत्यर्जुनवाक्यकथनं ।
६०	६०	२४	धृतराष्ट्रेणदुर्योधनंप्रतिस्वपरपक्षयोर्बलाबल विमर्शनेनपाण्डवेषुपुत्रप्रेम्णा धर्मादिदेवानांसाहाय्यकरणाभिधानपूर्वकंस्वस्यशमाभिरोचनकथनं ।
६१	६१	२९	दुर्योधनेनसहेतुकंपाण्डवानांदेवैस्साहाय्यकरणाभावकथनं । तथास्वस्य जलस्तम्भनाद्यनेकसामर्थ्यवत्तयाऽजय्यत्वकथनं ।
६२	६२	१८	कर्णेनधृतराष्ट्रमनादृत्यपाण्डवहननप्रतिज्ञानं । तथाभीष्माधिक्षिप्तेनतेन युद्धेभीष्मशमनावधिशस्त्रन्यासंप्रतिज्ञायस्वभवनगमनं । भीष्मेणप्रत्यहमयुतयोधवधप्रतिज्ञा ।
६३	६३	२७	दुर्योधनेनभीष्माभिमतपाण्डवजयपक्षप्रतिक्षेपः । तथाभीष्मादिनैरपेक्ष्येणकर्णदुश्शासनसङ्गतेनात्मनैवपाण्डवहननप्रतिज्ञा । विदुरेणदमप्रशंसनं।
६४	६४	२७	पाशबद्धशकुनिदृष्टान्तकथनेनज्ञातिभिर्विरोधस्यानर्थहेतुत्वकथनं । तथा किरातदृष्टान्तप्रदर्शनेनात्याशायाअनर्थहेतुत्वकथनं । तथायुद्धेजयपराजययोरव्यवस्थितत्वकथनं ।
६५	६५	१६	धृतराष्ट्रेणदुर्योधनंप्रत्यर्जुनस्यश्रीकृष्णपरमप्रेमास्पदतयादुर्जयत्वाभिधानपूर्वकंपाण्डवैस्सहसन्धिविधानं ।
६६	६७	१०	दुर्योधनेनधृतराष्ट्रवचनानभिनन्दनेसभातोराज्ञांनिर्गमनं । धृतराष्ट्रेणस्वपरसेनयोस्सारासारकथनंचोदितेनसञ्जयेनव्यासगान्धारीसंनिधौतत्कथनकथनं । श्रीव्यासेनसञ्जयंप्रतिधृतराष्ट्रप्रश्नस्योत्तरदानाभ्यनुज्ञानं ।
६७	६८	१५	सञ्जयेनधृतराष्ट्रंप्रतिश्रीकृष्णस्यसारतरत्वकथनं ।
६८	६९	२१	सञ्जयेनधृतराष्ट्रंप्रतिभगवद्वेदनसाधनकथनं ।
६९	७०	१५	सञ्जयेनधृतराष्ट्रंप्रतिवासुदेवादिभगवन्नामनिर्वचनं । तथासन्ध्यर्थंश्रीकृष्णागमनकथनं ।
७०	७१	७	श्रीकृष्णागमनश्रवणहृष्टेनधृतराष्ट्रेण चक्षुष्मत्प्रशंसनपूर्वकंश्रीकृष्णगुणानुवर्णनं ।

समाप्तं यानसन्धिपर्व ॥ ५ ॥

अथ भगवद्यानपर्व ॥ ६ ॥ अध्यायाः ॥ ८० ॥

(७१–१५०) ॥ श्लोकाः ॥ २५५२ ॥

अध्याय.	ज्ञपा.अ.	श्लोक.	
७१	७२	१०२	युधिष्ठिरेणश्रीकृष्णंप्रतिसन्ध्यर्थंहास्तिनपुरगमनप्रार्थना । श्रीकृष्णेनतदङ्गीकरणं ।
७२	७३	४२	श्रीकृष्णेनयुधिष्ठिरंप्रतियुद्धपक्षस्थिरीकरणपूर्वकंलोकप्रवादनिरासायसन्धिप्रयतनकथनं ।
७३	७४	२३	भीमसेनेनयथाकथंचिच्छमस्यावश्यकर्तव्यत्वकथनं ।
७४	७५	२३	श्रीकृष्णेनभीमंप्रतितत्प्रतिज्ञानुस्मारणपूर्वकंयुद्धप्रोत्साहनं ।
७५	७६	१८	भीमेनकृष्णंप्रतिस्वसामर्थ्यकथनपूर्वकंस्वस्यशमकामनायाःकृपामूलकत्वकथनं ।
७६	७७	२०	श्रीकृष्णेनभीमंप्रतिस्वस्यतन्महिमाभिज्ञत्वमभिधायतत्प्रशंसनपूर्वकंस्वोक्तेस्तेजस्सन्दीपनार्थकत्वकथनं ।
७७	७८	२०	अर्जुनेनश्रीकृष्णंप्रतिसन्धिविग्रहान्यतरपक्षनिर्धारणकरणप्रार्थना ।
७८	७९	२१	श्रीकृष्णेनदण्डार्हेसुयोधनेशमकरणस्यदुश्शकत्वाभिधानपूर्वकंयुधिष्ठिरगौरवेणस्वस्यतदर्थंप्रयतनकथनं ।
७९	८०	१८	नकुलेनस्वस्यशमेऽभिसन्धिप्रदर्शनं ।
८०	८१	१०	सहदेवेनश्रीकृष्णंप्रतिकुरूणांशमाभिसन्धावपियुद्धपक्षस्यैवस्थापनकथनं । सात्यकिनातत्पक्षानुमोदनेयोधानांसिंहनादः ।
८१	८२	५०	श्रीकृष्णेनद्यूतसभायांस्वानुभूतदुस्सहदुःखमभिनिवेद्यरुदन्तींद्रौपदींप्रति सुयोधनादिहननप्रतिज्ञानपूर्वकंसमाश्वासनं ।
८२	८३ (१–३६)	३७	श्रीकृष्णेनरथमारुह्यसात्यकिनासहहास्तिनपुरंप्रतिप्रस्थानं ।
८३	८३ (३७–७२)	४४	युधिष्ठिरेणश्रीकृष्णेपृथांप्रतिस्वाभिवादननिवेदनेनसमाश्वासनप्रार्थना । श्रीकृष्णस्यमध्येमार्गंजामदग्न्यादिमहर्षिसमागमः। तैःश्रीकृष्णेधृतराष्ट्रादिभिः सहतत्संवादशुश्रूषयातत्रस्वागमननिवेदनं ।
८४	८४	२७	श्रीकृष्णप्रयाणेशुभशकुनप्रादुर्भावः । सायान्हेश्रीकृष्णस्यवृकस्थलगमनं । तद्रजन्यांतत्रैवसुखसंवासः ।
८५	८५	१८	श्रीकृष्णागमनंज्ञातवतोधृतराष्ट्रस्याज्ञयादुर्योधनेनपथितत्रतत्रतदाराधनायसभानिर्माणं । श्रीकृष्णेनतदनवलोकनेनैवगमनं ।
८६	८६	२१	श्रीकृष्णागमनश्रवणहृष्टेनधृतराष्ट्रेणविदुरपुरतःसमेष्यतेतस्मैरथगजादिवितरणप्रतिज्ञा ।
८७	८७	१७	विदुरेणधृतराष्ट्रंप्रतिकृष्णायदानप्रतिज्ञायामृषात्वकथनं । तथासामाद्युपायैःश्रीकृष्णस्यदुर्वशत्वकथनपूर्वकंतदुक्तिसत्कारविधानं ।
८८	८८	२३	दुर्योधनेनश्रीकृष्णस्योपायनदाननिषेधनं । भीष्मेणकृष्णोक्तस्यकर्तव्यत्वकथनं । दुर्योधनेनस्वस्यकृष्णबन्धनाध्यवसायकथनेधृतराष्ट्रेणतद्गर्हणं । भीष्मेणदुर्योधनोपालंभपूर्वकंसभातो निर्गमनं ।
८९	८९	२७	श्रीकृष्णस्यवृकस्थलात्कुरुपुरमेत्यधृतराष्ट्रभवनप्रवेशः । तथाधृतराष्ट्रपूजां स्वीकृत्यविदुरसदनगमनं ।
९०	९०	१०६	श्रीकृष्णस्यकुन्तीसमीपगमनं । तेन प्रत्येकंनामनिर्देशपूर्वकंयुधिष्ठिरादिकुशलमापृच्छयस्वानुभूतदुःखानुस्मरणेनशोचन्त्याःकुन्त्यास्समाश्वासनं । तथातामामन्त्र्यदुर्योधनगृहगमनं ।
९१	९१	४६	दुर्योधनेनस्वगृहमागतस्यश्रीकृष्णस्य पूजापूर्वकंभोजनायामन्त्रणं । दुर्योधनेनश्रीकृष्णंप्रतिस्वीयान्नपानाद्यनादरणकारणप्रश्नेतेनतत्कथनपूर्वकंविदुरगृहगमनं । विदुरेणसादरमन्नपानादिनाश्रीकृष्णाराधनं ।
९२	९२	३०	रात्रौविदुरेणश्रीकृष्णंप्रतिदुर्योधनेसामवचनस्यनैष्फल्यकथनं । तथादुष्टभूयिष्ठसभाप्रवेशस्यस्वानभिमतत्वकथनं ।
९३	९३	२३	श्रीकृष्णेनविदुरवचनानुमोदनपूर्वकं स्वागमनस्यलोकपरिवादपरिहारार्थत्वकथनं ।
९४	९४	६६	प्रभातेश्रीकृष्णमभ्येत्यशकुनिदुर्योधनाभ्यांसभागमनायप्रार्थनं । श्रीकृ-

अध्याय.	झपा.अ.	श्लोक.	
			ष्णस्यविदुरेणसहसभाप्रवेशः । अन्तरिक्षगतेषुनारदादिषुश्रीकृष्णाज्ञयाभीष्मेणासनादिनासत्कृतेषुकृष्णादीनांयथोचितमासनेषूपवेशनं ।
९५	९५	६३	श्रीकृष्णेनधृतराष्ट्रंप्रतिसन्ध्यर्थंस्वस्यागमनकथनं । सन्धिविग्रहपक्षयोर्गुणदोषवर्णनपूर्वकंपाण्डवविज्ञापननिवेदनं । तथाहितमुपदिश्यान्तेयथारुचिकरणाभिधानं ।
९६	९६	५२	जामदग्न्येनदम्भोद्भवोपाख्यानकथनपूर्वकंश्रीकृष्णार्जुनयोर्नरनारायणस्वरूपताभिधानं ।
९७	९७	२१	कण्वेनदुर्योधनबलावलेपविलोपनाय मातलिवरान्वेषणकथाकथनारंभः । मातलिनागुणकेशीनामकस्वकन्याया अनुगुणवरान्वेषणायनागलोकगमनं ।
९८	९८	२५	मातलेर्वरुणलोकगमनं । नारदेनवरुणलोकवर्णनं ।
९९	९९	२०	मातलेःपाताललोकगमनं । नारदेन पाताललोकवर्णनं ।
१००	१००	१९	मातलेर्हिरण्यपुरगमनं ।
१०१	१०१	१६	मातलेस्सुपर्णलोकगमनं ।
१०२	१०२	१५	मातलेःरसातलगमनं । नारदेनतत्रत्यसुरभिसन्ततिगुणवर्णनं ।
१०३	१०३	२६	मातलेर्भोगवतीपुरीगमनं । तत्रमातलिनासुमुखनामकनागराजस्यवरत्वेनवरणं ।
१०४	१०४	३०	नारदेनसुमुखमातामहमार्यकंप्रतिपौत्रार्थंमातलिकन्यापरिग्रहचोदना । आर्यकेणसुमुखजनकंभक्षितवतावैनतेयेनमासान्तरेसुमुखभक्षणप्रतिज्ञाननिवेदनं । तार्क्ष्यात्सुमुखरिरक्षयासर्वैश्शक्रसमीपगमनं । इन्द्रेणतस्यदीर्घायुर्दानं । मातलिनासुमुखायस्वकन्यां प्रदायविवाहनिर्वर्तनं ।
१०५	१०५	४३	सुमुखायाऽऽयुर्दानश्रवणकुपितेनगरुडेनेन्द्रोपेन्द्रावभ्येत्यदर्पोक्तिः । उपेन्द्रेणगरुडदर्पविमोक्षणायतदंसेस्वदक्षबाहुविक्षेपेतद्वहनाक्षमेणतेनतत्क्षमापनं । कण्वेनगरुडनिदर्शनप्रदर्शनपूर्वकंगर्वपरिहारेणपाण्डवैस्सहशमविधानं । दुर्योधनेनोरुताडनपूर्वकंकण्वोप-

अध्याय.	झपा.अ.	श्लोक.	
			हासेतेनतंप्रतितवोरावेवमृत्युर्भविष्यतीतिशापदानं ।
१०६	१०६	२७	निर्बन्धस्यानर्थहेतुतायांनिदर्शनप्रदर्शनायदुर्योधनंप्रतिनारदेनगालवोपाख्यानारंभः । विश्वामित्रेणगुरुदक्षिणानिषेधनेऽपिनिर्बन्धकारिणंगालवंप्रत्येकतश्श्यामकर्णश्वेताश्वशताष्टकानयननियोगः ।
१०७	१०७	१९	गालवेनविष्णूपासनेगरुडेनगालवमुपेत्यस्वेनतस्याभिमतदेशप्रापणकथनं ।
१०८	१०८	१८	गरुडेनगालवंप्रतिपूर्वदिग्गुणवर्णनं ।
१०९	१०९	२१	दक्षिणदिग्गुणवर्णनं ।
११०	११०	२०	पश्चिमदिग्गुणवर्णनं ।
१११	१११	२८	उत्तरदिग्गुणवर्णनं ।
११२	११२	२२	गालवेनगरुडपृष्ठमारुह्यपूर्वदिग्गमनं । मध्येमार्गंविश्रमार्थमृषभाचलेऽवतरणं ।
११३	११३	२६	तत्रशाण्डिलीनामकब्राह्मणीदर्शनं । तद्दत्तान्नमुपभुज्यतत्रशयनं । शाण्डिल्याअपध्यानेनगरुडपक्षनिपातः । पुनस्तत्प्रसादाधिगतपक्षेणगरुडेनपुनः प्रस्थानं ।
११४	११४	२०	गालवेनययातिंगत्वाहययाचनं ।
११५	११५	२१	व्ययितवित्तेनययातिनागालवायहयप्रतिनिधितयामाधवीनामकस्वकन्यासमर्पणं । गरुडेनगालवमापृच्छ्यस्वगृहगमनं । गालवेनकन्यायासहहर्यश्वनामकनृपसमीपमुपेत्यशुल्कार्पणेन कन्याकलत्रीकरणकथनं ।
११६	११६	२८	हर्यश्वेनतादृशाश्वशतद्वयप्रदानेनैकापत्योत्पादनकथनं । माधव्यास्वस्यप्रसूत्यन्तेप्रसूत्यन्तेपुनःपुनःकन्यात्वसंपादकविप्रवरप्राप्तिकथनं । हर्यश्वेनतस्यांवसुमनोनामकपुत्रोत्पादनं । हर्यश्वेनकालान्तरेसमागतायगालवायपुनर्माधवीप्रत्यर्पणं । गालवेनपुनः कन्यात्वमुपागतवत्यातयासहदिवोदाससमीपगमनं ।
११७	११७	२१	दिवोदासेनाप्यश्वशतद्वयप्रदानेनतस्यांप्रतर्दनाख्यसुतोत्पादनं ।
११८	११८	२१	उशीनरेणाश्वशतद्वयप्रदानेनमाधव्यां शिबिनामकपुत्रोत्पादनं ।

अध्याय.	छपा.अ.	श्लोक.	
११९	११९	२४	गालवेनाश्वानांषट्शतंप्रदायावशिष्टाश्वशतद्वयप्रतिनिधितयाविश्वामित्रंप्रतिमाधव्यास्समर्पणं । तेनतस्यामष्टकाख्यपुत्रमुत्पाद्यतस्याःपुनर्गालवेप्रत्यर्पणं । गालवेनययातयेमाधवीसमर्पणं ।
१२०	१२०	२२	ययातिनागङ्गायमुनासङ्गमदेशेमाधव्याःस्वयंवरकरणं । माधव्यातुसर्वेवरानतिक्रम्यवनमध्येतपश्चरणं । कालान्तरेस्वर्गंगतस्यययातेर्बहुवर्षसहस्रावसानेसदसिदेवर्ष्यवमानेनसद्यस्तेजोहानिःस्वर्गाद्भ्रंशश्च ।
१२१	१२१	२९	इन्द्रवरेणययातेःस्वदौहित्राणांमध्येपतनं । तस्मैतद्दौहित्रमाधवीगालवादिभिस्स्वस्वतपोभागदानं ।
१२२	१२२	१८	स्वदौहित्रादिदत्तपुण्यप्रभावेणपुनर्ययातेःस्वर्गप्राप्तिः ।
१२३	१२३	२५	स्वपतनकारणंपृष्टेनपितामहेनतंप्रति तत्कथनं । नारदेनदुर्योधनंप्रतिगालवययातिदृष्टान्तप्रदर्शनेननिर्बन्धाभिमानत्यागपूर्वकंसन्धिकरणविधानं ।
१२४	१२४	६२	धृतराष्ट्रेणश्रीकृष्णंप्रतिदुर्योधनानुनयप्रार्थना । श्रीकृष्णेनदुर्योधनानुनयः ।
१२५	१२५	२७	भीष्मादिभिर्दुर्योधनंप्रतिश्रीकृष्णवचनादरणविधानं ।
१२६	१२६	१८	भीष्मादिभिर्दुर्योधनंप्रतिपाण्डवैस्सहशमविधानं ।
१२७	१२७	२५	दुर्योधनेनश्रीकृष्णंप्रतिस्वस्मिन्नपराधलेशोपिनास्तीतिकथनं । तथास्वस्याजय्यत्वकथनपूर्वकंपाण्डवेभ्यःसूच्यग्रपरिमितभूमेरप्यप्रदानकथनं ।
१२८	१२८	५१	श्रीकृष्णेनदुर्योधनंप्रतितत्कृतापनयानुस्मारणं । कोपाद्दुर्योधनेनसभातोनिर्गमनं । श्रीकृष्णेनधृतराष्ट्रंप्रतिकुलस्यार्थेदुर्योधनपरित्यागविधानं ।
१२९	१२९	५४	विदुरेणधृतराष्ट्राज्ञयागान्धार्याःसभांप्रत्यानयनं । गान्धार्यादुर्योधनंपुनःसमानाय्यतंप्रतिनीतिकथनपूर्वकंपाण्डवैस्सहशमविधानं ।
१३०	१३०	६७	मातृवाक्यमनादृत्यनिर्गतेनदुर्योधनेनकर्णादिभिस्सहालोच्यश्रीकृष्णबन्धननिर्धारणं । इङ्गितज्ञेनसात्यकिनाश्रीकृष्णादिषुतन्निवेदनं । धृतराष्ट्रेणपुनर्दुर्योधनमानाय्यश्रीकृष्णस्यदुर्ग्रहत्वनिरूपणं । विदुरेणसंगृह्यश्रीकृष्णचरित्रनिरूपणं ।
१३१	१३१	५०	श्रीकृष्णेनसभायांविश्वरूपप्रदर्शनं । श्रीकृष्णप्रसादाल्लब्धचक्षुषाधृतराष्ट्रेण श्रीकृष्णदर्शनं । पुनरितरान्द्रष्टुमनिच्छताधृतराष्ट्रेणकृष्णप्रसादात्पुनःस्वचक्षुषोरन्तर्धानाधिगमः । श्रीकृष्णेनतद्रूपोपसंहारपूर्वकंपूर्वरूपंस्वीकृत्यकुन्तीसमीपगमनं ।
१३२	१३२	३४	श्रीकृष्णेनकुन्तींप्रतिसप्रणामंसभावृत्तान्तकथनं । कुन्त्याश्रीकृष्णेयुधिष्ठिरायसंदेशप्रेषणं ।
१३३	१३३	४५	कुन्त्यायुधिष्ठिरबोधनायश्रीकृष्णंप्रति विदुलोपाख्यानकथनं ।
१३४	१३४	४१	विदुलोपाख्यानं ।
१३५	१३५	४०	विदुलोपाख्यानं ।
१३६	१३६	२२	विदुलोपाख्यानं ।
१३७	१३७	३२	कुन्त्याश्रीकृष्णेऽर्जुनादीन्प्रतिवक्तव्यसंदेशकथनं । श्रीकृष्णस्यस्वरथमारोपितेनकर्णेनसहरहस्संभाषणपूर्वकं तद्विसर्जनेनोपप्लाव्यंप्रत्यागमनम् ।
१३८	१३८	२७	भीष्मद्रोणाभ्यांकुन्तीवाक्यंश्रुत्वादुर्योधनंप्रतिसन्धिविधानं ।
१३९	१३९	२२	दुर्योधनेनस्ववचनाकरणेभीष्मद्रोणाभ्यांपार्थेनसहयुद्धकरणेपरिशोचनं । द्रोणेनदुर्योधनंप्रतिपुनःशमविधानं ।
१४०	१४०	२९	श्रीकृष्णेनकर्णंप्रतिकिमुक्तमितिजनमेजयप्रश्नः । श्रीकृष्णेनकर्णंप्रतितस्य कुन्तीसुतत्वरूपरहस्यकथनपूर्वकंपाण्डवपक्षप्रवेशचोदना ।
१४१	१४१	५७	कर्णेनश्रीकृष्णंप्रतिस्वस्यपाण्डवपक्षप्रवेशेसयुक्तिकंप्रतिबन्धकनिरूपणपूर्वकंस्वरहस्यगोपनप्रार्थना ।
१४२	१४२	२०	श्रीकृष्णेनकर्णंप्रतिपाण्डवजयनिर्धारणकथनपूर्वकंभीष्मादिषुयुद्धसन्नाहसंदेशकथनचोदना ।
१४३	१४३	५२	कर्णेनश्रीकृष्णंप्रतिपृथिवीविनाशेस्वस्यशकुनिदुःशासनयोश्चमूलत्वकथनं । श्रीकृष्णमालिङ्ग्यकर्णस्यप्रतिनिवर्तनं । श्रीकृष्णस्योपप्लाव्यागमनं ।

अध्याय.	छपा.अ.	श्लोक.	
१४४	१४४	३१	कर्णपराक्रमभीतयाकुन्त्यागङ्गातीरे तत्समीपगमनं ।
१४५	१४५	१२	कुन्त्याकर्णंप्रतितस्यस्वपुत्रत्वकथनपूर्वकंपाण्डवैस्सहसङ्गमचोदना ।
१४६	१४६	२७	सूर्येणकर्णंप्रतिकुन्तीवचनस्वीकरणविधानं । कर्णेनकुन्तींप्रतिसोपालंभंदुर्योधनपरित्यागस्यसयुक्तिकमनौचित्यकथनपूर्वकमर्जुनवर्जंपाण्डवासंहरणप्रतिज्ञा ।
१४७	१४७	४३	श्रीकृष्णेनपाण्डवान्प्रतिसंक्षेपेणहास्तिनपुरवृत्तान्तकथनं । तैस्तंप्रतिविस्तरेणभीष्मादिवचनकथनप्रार्थना । श्रीकृष्णेनशमविधायकभीष्मवचनानुवादः ।
१४८	१४८	३६	श्रीकृष्णेनपाण्डवान्प्रतिद्रोणवचनानुवादः । तथाविदुरगान्धार्योश्चवचनानुवादः ।
१४९	१४९	३६	श्रीकृष्णेनपाण्डवान्प्रतिधृतराष्ट्रेणदुर्योधनंप्रत्युक्तवचनानुवादः ।
१५०	१५०	२०	श्रीकृष्णेनपाण्डवान्प्रतिदुर्योधनेनचोदितानांराज्ञांयुद्धार्थंकुरुक्षेत्रप्रस्थानकथनं । तथास्वेनसामाद्युपायत्रयप्रयोगेप्यवशीभूतेदुर्योधनेदण्डस्यैवप्रयोक्तव्यत्वकथनं ।

समाप्तं भगवद्यानपर्व ॥ ६ ॥

अथसैन्यनिर्याणपर्व ॥ ७ ॥ अध्यायाः ॥ ९ ॥

(१५१-१५९) ॥ श्लोकाः ॥ ३०३ ॥

अध्याय.	छपा.अ.	श्लोक.	
१५१	१५१	७१	धृष्टद्युम्नस्यसेनापतित्वकल्पना । युधिष्ठिरादीनांसर्वेषांकुरुक्षेत्रप्रवेशः ।
१५२	१५२	१८	कुरुक्षेत्रेसमुचितदेशेयुधिष्ठिरेणस्वसेनानांनिवेशनं । धृष्टद्युम्नादिभिस्सर्वेषांपृथक्पृथक्शिबिरनिर्मापणं ।
१५३	१५३	२७	कर्णादीन्प्रतिदुर्योधनेनसाङ्ग्रामिकसामग्रीसंपादनचोदनं । तच्चोदनयाराज्ञांसेनाभिस्सहकुरुक्षेत्रप्रस्थानं ।
१५४	१५४	२७	गुरुवधभयात्कर्तव्यमौढ्यमुपागतेनयुधिष्ठिरेणश्रीकृष्णंप्रतिकर्तव्यनिर्धारणप्रार्थना । तेनयुद्धकरणनिर्धारणं ।
१५५	१५५	३५	दुर्योधनेनस्वसेनानामुत्तममध्यमाधमभेदेनत्रेधाविभागः । तासांसांग्रामिकोपकरणसमृद्धिवर्णनं । दुर्योधनेनकृपादीनामेकादशानांपृथक्पृथगक्षौहिण्यधिपतित्वेऽभिषेचनं ।
१५६	१५६	३६	दुर्योधनेनभीष्मंप्रतिसैनापत्यस्वीकरणप्रार्थना । भीष्मेणसमयकरणपूर्वकंसैनापत्यस्वीकारः । दुर्योधनेनभीष्मस्यसैनापत्येऽभिषेचनपूर्वकंसेनाभिस्सहकुरुक्षेत्रगमनं ।
१५७	१५७	३५	युधिष्ठिरेणद्रुपदादीनांसप्तानांपृथगक्षौहिण्याधिपत्येऽभिषेकः । धृष्टद्युम्नस्यसर्वसैन्याधिपत्येऽभिषेकः । बलरामस्यपाण्डवदिदृक्षयाकुरुक्षेत्रागमनं । तस्यतीर्थनिषेवणायगमनं ।
१५८	१५८	३९	रुक्मिणापाण्डवानुपेत्यसगर्वसाहाय्यकरणार्थंस्वस्यागमनकथनं । अर्जुनेनतस्यप्रत्याख्यानं । तथाविधस्यतस्यदुर्योधनेनापिप्रत्याख्यानं ।
१५९	१५९	१५	धृतराष्ट्रेणसञ्जयंप्रतिकुरुपाण्डवसेनयोर्वृत्तान्तकथनचोदना ।

समाप्तं सैन्यनिर्याणपर्व ॥ ७ ॥

अथोलूकदूतागमनपर्व ॥ ८ ॥ अध्यायाः ॥ ५ ॥

(१६०-१६४) ॥ श्लोकाः ॥ ३०० ॥

अध्याय.	छपा.अ.	श्लोक.	
१६०	१६०	१२५	दुर्योधनेनोलूकस्यपाण्डवान्प्रतिदूत्येन प्रेषणं ।
१६१	१६१	४३	उलूकेनपाण्डवान्प्रतिदुर्योधनसंदेशकथनं ।
१६२	१६२	६३	भीमादिभिर्दुर्योधनंप्रत्युलूकद्वाराप्रतिसंदेशप्रेषणं ।
१६३	१६३	५७	उलूकेनदुर्योधनंप्रतिपाण्डवप्रतिसंदेशकथनं । दुर्योधनाज्ञयाकर्णस्ययुद्धसन्नाहोद्घोषणं ।
१६४	१६४	१२	युधिष्ठिरेणयुद्धायसेनानिर्यातनं । धृष्टद्युम्नेनभीमादीनांदुर्योधनादिभिस्सहद्वन्द्वयुद्धायसमादेशः ।

समाप्तमुलूकदूतागमनपर्व ॥ ८ ॥

अथ रथातिरथसङ्ख्यानपर्व ॥ ९ ॥ अध्यायाः ॥ ८ ॥

(१६५-१७२) ॥ श्लोकाः ॥ ३२५ ॥

अध्याय.	छपा.अ.	श्लोक.	
१६५	१६५	३३	भीष्मेणदुर्योधनायस्वसामर्थ्यकथनपूर्वकमभयदानं । दुर्योधनेनस्वसेनायांरथातिरथसङ्ख्यानं ।
१६६	१६६	२२	दुर्योधनेनस्वसेनायांरथातिरथसङ्ख्यानं ।

अध्याय.	छपा.अ.	श्लोक.	
१६७	१६७	३८	तथा ।
१६८	१६८	४२	भीष्मेणकर्णस्यार्धरथत्वेकथितेतेनभीष्मोपालंभनपूर्वकंतज्जीवितावधिस्वेन युद्धाकरणप्रतिज्ञा । भीष्मेणकर्णगर्हणेदुर्योधनेनभीष्मंप्रतिसान्त्वनपूर्वकं परसेनायांरथातिरथसङ्ख्यानप्रार्थना ।
१६९	१६९	२८	भीष्मेणपाण्डवसेनायांरथातिरथसङ्ख्यानं ।
१७०	१७०	१४	तथा ।
१७१	१७१	२७	तथा ।
१७२	१७२	२१	भीष्मेणदुर्योधनंप्रतिशिखण्डिनःपूर्वं स्त्रीत्वमभिधायतेनसहयुद्धाकरणप्रतिज्ञा ।

समाप्तं रथातिरथसङ्ख्यानपर्व ॥ ९ ॥

अथाम्बोपाख्यानपर्व ॥ १० ॥ अध्यायाः ॥ २४ ॥

(१७३-१९६) ॥ श्लोकाः ॥ ८०३ ॥

अध्याय.	छपा.अ.	श्लोक.	
१७३	१७३	२४	भीष्मेणाम्बोपाख्यानकथनारंभः । स्वेनस्वयंवरेऽम्बादिकन्यात्रयहरणकथनं ।
१७४	१७४	१०	भीष्मेणविचित्रवीर्यस्यकन्यात्रयेणविवाहप्रयतनेऽम्बयास्वस्यसाल्वकामत्वकथनपूर्वकंतत्समीपगमनेभीष्मंप्रत्यनुज्ञायाचनं ।
१७५	१७५	४६	साल्वंगतायाअम्बायास्तेनपरित्यागः । अम्बयाभीष्मस्यप्रतिचिकीर्षयातापसाश्रममेत्यतेषुस्ववृत्तान्तकथनं ।
१७६	१७६	५९	तत्रहोत्रवाहननाम्नोऽम्बामातामहस्यागमनं । तेनाम्बायाःपरशुरामंप्रति शरणागतिचोदना । तत्रयदृच्छयासमागतेऽकृतव्रणनाम्निमहर्षावम्बया स्ववृत्तान्तनिवेदनं ।
१७७	१७७	४२	अकृतव्रणेनसविमर्शंभीष्मस्यप्रतीकारनिर्धारणं । अम्बयापरेद्युरागतंजामदग्न्यंप्रतिभीष्मवधप्रार्थना ।
१७८	१७८	९५	श्रीपरशुरामेणाम्बादिभिःसहकुरुक्षेत्रं गत्वाभीष्मानयनं । रामेणस्वेनचोदनेऽपिभीष्मेणाम्बापरिग्रहानङ्गीकारेयुद्धायतस्याह्वानं ।
१७९	१७९	३९	भीष्मजामदग्न्ययुद्धं ।
१८०	१८०	३८	तथा ।
१८१	१८१	१६	तथा ।
१८२	१८२	३०	रामेणरथादधःपातितस्यभीष्मस्यदिव्यपुरुषैःसमाश्वासनं । भीष्मेणरामस्यरथादधःपातनं । पुनर्युयुत्सोरामस्यमहर्षिभिर्युद्धात्प्रतिनिवर्तनं ।
१८३	१८३	१९	सप्रणामंदेवादिप्रार्थनापूर्वकंशयितस्य भीष्मस्यदिव्यपुरुषैःस्वप्नेसमाश्वासनपूर्वकंज्ञातपूर्वप्रस्वापनास्त्रानुस्मारणं ।
१८४	१८४	२३	ततोरामभीष्मयोर्युद्धं । भीष्मस्यप्रस्वापनास्त्रप्रतिभानं ।
१८५	१८५	३७	भीष्मेरामंप्रतिप्रस्वापनास्त्रंप्रयोक्तुकामेनारदेनतन्निषेधनं । रामेणस्वस्यपराजितत्वोक्तिर्युद्धोपरमश्च ।
१८६	१८६	४१	राममामन्त्र्यगतयाऽम्बयापुण्याश्रमादिषुदुष्करतपश्चरणं ।
१८७	१८७	१९	अंबयातपस्तोषितान्महादेवाज्जन्मान्तरेपुंस्त्वप्राप्त्याभीष्महननरूपवरमुपलभ्याग्नौप्रवेशः ।
१८८	१८८	२०	पुत्रार्थंतपस्यतेद्रुपदायमहादेवेनस्त्रीभूत्वापुमान्भविष्यतीतिवरदानं । द्रुपदभार्ययाऽपत्यजननेपितस्यपुंस्त्वख्यापनं । द्रुपदेनतस्यस्त्रीत्वंप्रच्छाद्यपुंवज्जातकर्मादिकरणं ।
२८९	१८९	२५	पुंवेषगूहितयाशिखण्डिन्याद्रोणाद्धनुर्विद्याभ्यासः । तस्यादशार्णाधिपतिकन्ययाविवाहः । स्वदुहित्राशिखण्डिन्याःस्त्रीत्वंविज्ञापितेनदशार्णेनदूतमुखेनद्रुपदंप्रतिस्वविप्रलम्भकस्यतस्य सबन्धोःसमुच्छेदनिवेदनं ।
१९०	१९०	२२	द्रुपदेनपत्न्यासहकर्तव्यालोचनं ।
१९१	१९१	३०	शिखण्डिन्यास्वपित्रोःशोकस्यस्वमूलकत्वचिन्तनेनदुर्गमारण्यमेत्यस्थूणनाम्नःकुबेरानुचरस्यगृहसमीपेप्रायोपवेशः । स्थूणचोदितयाशिखण्डिन्यातं प्रतिस्वस्यपुंस्त्ववरणं ।
१९२	१९२	७०	स्थूणेनशिखण्डिन्यैतदीयस्त्रीत्वस्वीकारेणस्वीयपुंस्त्वसमर्पणं । दशार्णाधिपतिनाशिखण्डिनःपुंस्त्वमुपायैर्निर्धार्यैलज्जयास्वपुरगमनं । अत्रान्तरे

अध्याय.	इपा.अ.	श्लोक.	
			स्थूणगृहमागतेनकुबेरेणतंप्रतिस्त्रीत्वधारणस्यशिखण्डिमरणावधिकत्वरूपशापदानं । पुंस्त्वप्रत्यर्पणायगतेनशिखण्डिनास्थूणात्तद्वृत्तान्तमुपलभ्यहर्षात्स्वगृहागमनं । इतिभीष्मेणदुर्योधनंप्रतिशिखण्डिनासहस्वेनयुद्धाकरणेकारणाभिधानं ।
१९३	१९३	२२	दुर्योधनेनभीष्मादीन्प्रतिप्रत्येकंयुष्माभिःकियताकालेनसमग्रपरसेनाक्षपणं कर्तुंशक्यमितिप्रश्नेतैःपृथक्पृथक्तदुत्तरदानं ।
१९४	१९४	२२	युधिष्ठिरेणचारमुखाद्भीष्मादिभिःस्वस्वशक्तिकथनंनिशम्यार्जुनंप्रतितच्छक्तिनिवेदनचोदनेतेनतत्कथनं ।
१९५	१९५	१९	दुर्योधनेनत्रेधाविभज्यसेनानांयापनं सर्वेषांशिबिरप्रवेशः ।
१९६	१९६	३५	युधिष्ठिरेणापित्रेधाविभज्यस्वसेनानां प्रेषणं ।

समाप्तमम्बोपाख्यानपर्व ॥ १० ॥

उद्योगपर्व च संपूर्ण ॥ ५ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

अथ भीष्मपर्व ॥ ६ ॥

अवान्तरपर्वाणि ॥ ४ ॥ अध्यायाः ॥ १२२ ॥ श्लोकाः ॥ ५८०९ ॥

अथ जम्बूखण्डविनिर्माणपर्व ॥ १ ॥ अध्यायाः ॥१०॥ (१-१०) ॥ श्लोकाः ॥ ३९४ ॥

अध्याय.	छपा.अ.	श्लोक.	
१	१	३४	कुरुक्षेत्रेकुरुपाण्डवसेनयोःपरस्परसमागमः । उभयपक्षीयैःपरस्परंसमयकरणं ।
२	२	३३	श्रीव्यासेनधृतराष्ट्रंप्रतियुद्धदर्शनायचक्षुर्दानकथनं । धृतराष्ट्रेणयुद्धश्रवणमात्रेप्रार्थितेव्यासेनसञ्जयंप्रतियुद्धविषयेसार्वज्ञदानपूर्वकंयुद्धप्रकारकथननियोगः ।
३	३	८६	व्यासेनधृतराष्ट्रंप्रतिदुर्निमित्तप्रादुर्भावफलकथनं । तथाजेष्यतांजयसूचकलिङ्गकथनं ।
४	४	२१	व्यासेगतेसञ्जयेनधृतराष्ट्रंप्रतिभूमिगुणानुवर्णनं ।
५	५	१८	भूतपञ्चकगुणवर्णनं । सङ्क्षेपेणजम्बूद्वीपवर्णनं ।
६	६	५७	भारतादिखण्डानांतत्तत्समीपस्थपर्वतानांमेरोश्चवर्णनं ।
७	७	३२	उत्तरकुरुवर्णनं । भद्राश्ववर्णनं ।
८	८	३२	मेरोरुत्तरभागस्थखण्डत्रयवर्णनं ।
९	९	७६	भरतखण्डस्थनदीपर्वतदेशानांविस्तरेणकथनं ।
१०	१०	१५	युगचतुष्टयवर्णनं ।

समाप्तं जम्बूखण्डविनिर्माणपर्व ॥ १ ॥

अथ भूमिपर्व ॥ २ ॥ अध्यायौ ॥ २ ॥ (११-१२) ॥ श्लोकाः ॥ ९२ ॥

अध्याय.	छपा.अ.	श्लोक.	
११	११	४०	शाकद्वीपवर्णनं ।
१२	१२	५२	क्रौञ्चादिद्वीपवर्णनं ।

समाप्तं भूमिपर्व ॥ २ ॥

अथ भगवद्गीतापर्व ॥ ३ ॥ अध्यायाः ॥ ३० ॥ (१३-४२) ॥ श्लोकाः ॥ १०२९ ॥

अध्याय.	छपा.अ.	श्लोक.	
१३	१३	१३	सञ्जयेनधृतराष्ट्रंप्रतिभीष्महननकथनं ।
१४	१४	७८	धृतराष्ट्रेणभीष्महननश्रवणात्परिशोचनपूर्वकंसञ्जयंप्रतिविस्तरेणभीष्मादियुद्धवर्णनचोदना ।
१५	१५	२०	दुर्योधनेनदुश्शासनंप्रतिभीष्मरक्षणाज्ञापनं ।
१६	१६	२७	कुरुपाण्डवसेनावर्णनं ।
१७	१७	३९	युद्धायकुरुसेनानिर्याणं ।
१८	१८	१८	कुरुसेनावर्णनं ।
१९	१९	४५	कुरुसेनानिर्याणं ।
२०	२०	२०	कुरुसेनागमनप्रकारवर्णनं ।
२१	२१	१७	परसेनादर्शनचकितंयुधिष्ठिरंप्रत्यर्जुनेनसमाश्वासनं ।
२२	२२	१६	युधिष्ठिरादीनांयुद्धायनिर्गमः ।
२३	२३	२८	अर्जुनकृतादुर्गास्तुतिः ।
२४	२४	७	सञ्जयेनोभयसेनयोरभ्युदयवर्णनं ।
२५	२५	४७	भगवद्गीतायां प्रथमोऽध्यायः ॥ १ ॥
२६	२६	७२	,, द्वितीयोऽध्यायः ॥ २ ॥
२७	२७	४३	,, तृतीयोऽध्यायः ॥ ३ ॥
२८	२८	४२	,, चतुर्थोऽध्यायः ॥ ४ ॥
२९	२९	२९	,, पञ्चमोऽध्यायः ॥ ५ ॥
३०	३०	४७	,, षष्ठोऽध्यायः ॥ ६ ॥
३१	३१	३०	,, सप्तमोऽध्यायः ॥ ७ ॥
३२	३२	२८	,, अष्टमोऽध्यायः ॥ ८ ॥
३३	३३	३४	,, नवमोऽध्यायः ॥ ९ ॥
३४	३४	४२	,, दशमोऽध्यायः ॥१०॥
३५	३५	५५	,, एकादशोऽध्यायः ११
३६	३६	२०	,, द्वादशोऽध्यायः ॥१२॥
३७	३७	३५	,, त्रयोदशोऽध्यायः १३
३८	३८	२७	,, चतुर्दशोऽध्यायः १४

अध्याय.	छपा.अ.	श्लोक.	
३९	३९	२०	,, पञ्चदशोऽध्यायः १५
४०	४०	२४	,, षोडशोऽध्यायः ॥१६॥
४१	४१	२८	,, सप्तदशोऽध्यायः १७
४२	४२	७८	,, अष्टादशोऽध्यायः १८

समाप्तं भगवद्गीतापर्व ॥ ३ ॥

अथ भीष्मवधपर्व ॥ ४ ॥ अध्यायाः ॥ ८० ॥

(४३-१२२) ॥ श्लोकाः ॥ ४२९४ ॥

४३	४३	१११	युधिष्ठिरेणरथादवरुह्यभीष्मद्रोणाद्यभिवादनपूर्वकंतेभ्योजयाशीर्ग्रहणं ।
४४	४४	३०	सेनयोर्युद्धारंभः ।
४५	४५	८७	द्वन्द्वयुद्धवर्णनं ।
४६	४६	४९	संकुलयुद्धं ।
४७	४७	६७	उत्तरकुमारवधः ।
४८	४८	१२१	श्वेतयुद्धंभीष्मेणतद्वधश्च ।
४९	४९	५३	शङ्खयुद्धं ।

इति प्रथमदिवसयुद्धं ॥ १ ॥

५०	५०	५८	धृष्टद्युम्नेनक्रौञ्चव्यूहनिर्माणं ।
५१	५१	३०	भीष्मादिभिः प्रतिव्यूहरचना ।
५२	५२	७१	भीष्मार्जुनयोर्युद्धं ।
५३	५३	४१	द्रोणधृष्टद्युम्नयुद्धं ।
५४	५४	१२४	भीमेनकलिङ्गादिवधः ।
५५	५५	४५	अर्जुनयुद्धवर्णनं ।

इति द्वितीयदिवसयुद्धं ॥ २ ॥

५६	५६	२२	उभयपक्षयोर्व्यूहरचना ।
५७	५७	४०	संकुलयुद्धं ।
५८	५८	४६	अर्जुनयुद्धवर्णनं ।
५९	५९	१४०	स्वप्रतिज्ञांविहायगृहीतचक्रेणश्रीकृष्णेनपादचारेणभीष्मंहन्तुमभियानं । अर्जुनेनश्रीकृष्णस्यप्रतिनिवर्तनं ।

इति तृतीयदिवसयुद्धं ॥ ३ ॥

६०	६०	३०	भीष्मार्जुनयुद्धं ।
६१	६१	३६	धृष्टद्युम्नेनशलपुत्रवधः ।
६२	६२	६५	भीमसेनादियुद्धं ।
६३	६३	३३	सात्यकिभूरिश्रवसोर्युद्धं ।
६४	६४	८८	भीमेनदुर्योधनानुजाष्टकवधः । घटोत्कचभयेनकुरुभिःसेनावहारः ।

इति चतुर्थदिवसयुद्धं ॥ ४ ॥

६५	६५	७५	विश्वोपाख्यानं ।
६६	६६	४१	तथा ।
६७	६७	२४	विश्वोपाख्यानेभीष्मेणदुर्योधनंप्रतिवासुदेवमाहात्म्यकथनं । युधिष्ठिरस्य कृष्णसमाश्रयणेनविजयइतिभीष्मेण दुर्योधनंप्रतिकथनं ।
६८	६८	२०	भीष्मेणदुर्योधनंप्रतिब्रह्मर्षिकृतकृष्णस्तवनकथनं । तथाश्रीकृष्णस्यपाण्डवेषुप्रीतिकथनपूर्वकंतैस्सहशमविधानं ।
६९	६९	३९	कुरुपाण्डवसेनयोर्मकरश्येनव्यूहरचनं ।
७०	७०	२९	संकुलयुद्धं ।
७१	७१	४४	तथा ।
७२	७२	३५	तथा ।
७३	७३	४३	तथा ।
७४	७४	४०	भूरिश्रवसासात्यकिपुत्रदशकवधः । सात्यकिभूरिश्रवसोर्युद्धं ।

इति पञ्चमदिवसयुद्धं ॥ ५ ॥

७५	७५	३७	कुरुपाण्डवयोःक्रौञ्चमकरव्यूहरचना ।
७६	७६	२६	धृतराष्ट्रेणस्वसेनाक्षयश्रवणेनशोचनं ।
७७	७७	८४	भीमद्रोणपराक्रमवर्णनं ।
७८	७८	३६	संकुलयुद्धं ।
७९	७९	६७	तथा ।

इति षष्ठदिवसयुद्धं ॥ ६ ॥

८०	८०	१९	भीष्मदुर्योधनसंवादः ।
८१	८१	४६	भीष्मेणदुर्योधनसंहर्षणं ।
८२	८२	६२	द्रोणेनविराटसूनोःशङ्खस्यवधः । द्वन्द्वयुद्धं ।
८३	८३	५९	द्वन्द्वयुद्धं ।
८४	८४	५५	युधिष्ठिरादियुद्धं ।
८५	८५	४०	संकुलयुद्धं ।
८६	८६	५७	तथा ।

इति सप्तमदिवसयुद्धं ॥ ७ ॥

८७	८७	३९	उभयसेनयोर्व्यूहरचनापूर्वकंपरस्पराभियानं ।
८८	८८	४४	भीमेनसुनाभादिदुर्योधनानुजाष्टकवधः ।
८९	८९	४०	धृतराष्ट्रेणपुत्रवधश्रवणाच्छोचनं ।
९०	९०	९६	इरावताशकुन्यनुजानांवधः । आर्श्यशृङ्गिनाम्नाराक्षसेनइरावतोवधः ।
९१	९१	३१	दुर्योधनघटोत्कचयोर्युद्धं ।
९२	९२	४३	घटोत्कचयुद्धवर्णनं ।
९३	९३	४३	संकुलयुद्धं ।
९४	९४	५०	घटोत्कचयुद्धं ।
९५	९५	८६	भगदत्तादियुद्धं ।

अध्याय.	झपा.अ.	श्लोक.	
९६	९६	८०	भीमेनदुर्योधनानुजानांकतिपयानां-वधः ।

इत्यष्टमदिवसयुद्धं ॥ ८ ॥

९७	९७	४३	भीष्मोन्यस्तशस्त्रश्चेदहंपाण्डवाञ्जेष्यामीतिकर्णबोधितेनदुर्योधनेनरात्रौभीष्ममेत्यकर्णस्ययुद्धानुज्ञाप्रार्थना ।
९८	९८	५१	भीष्मेणदुर्योधनंप्रत्यर्जुनपराक्रमप्रशंसनपूर्वकंपाण्डवानामजय्यत्वमभिधायशिखण्डिवर्जंपाञ्चालादिवधप्रतिज्ञा ।
९९	९९	३०	कुरुपाण्डवसेनयोर्व्यूहरचनापूर्वकंपरस्पराभिगमनं ।
१००	१००	५४	अलंबुसस्यद्रौपदेयैस्सहयुद्धं । अभिमन्युनासमागमश्च ।
१०१	१०१	५९	अभिमन्युनाअलंबुसपराजयः ।
१०२	१०२	४०	द्रोणार्जुनयुद्धं । भीमसेनपराक्रमश्च ।
१०३	१०३	४७	संकुलयुद्धं ।
१०४	१०४	३८	तथा ।
१०५	१०५	३७	युधिष्ठिरादियुद्धं ।
१०६	१०६	८४	भीष्मपराक्रमममृष्यताश्रीकृष्णेनरथादवरुह्यतद्वधायाभियानं अर्जुनेनपश्चादनुधाव्यनिवर्तितस्यश्रीकृष्णस्यतेनसहपुनारथारोहणं ।

इति नवमदिवसयुद्धं ॥ ९ ॥

१०७	१०७	१०८	युधिष्ठिरेणश्रीकृष्णेनसहसंमन्त्र्यरात्रौ भीष्ममेत्यतद्वधोपायकथनप्रार्थना । तंप्रतिभीष्मेणतत्कथनं ।
१०८	१०८	६०	भीष्मयुद्धं । शिखण्डिनोभीष्मेणसहसंवादोयुद्धसन्नाहश्च ।
१०९	१०९	४१	भीष्मदुर्योधनसंवादः । भीष्मपराक्रमवर्णनं ।
११०	११०	४८	अर्जुनदुश्शासनयुद्धं ।
१११	१११	५८	द्वन्द्वयुद्धं ।
११२	११२	४२	द्रोणेनाश्वत्थामानंप्रतिदुर्निमित्तप्रदर्शनपूर्वकंयुद्धानुशासनं ।
११३	११३	५३	भीमसेनपराक्रमवर्णनं ।
११४	११४	४७	भीमार्जुनपराक्रमवर्णनं ।
११५	११५	४३	युद्धेविरक्तेनभीष्मेणयुधिष्ठिरंप्रतिस्ववधोद्यमचोदना ।
११६	११६	८०	संकुलयुद्धं ।
११७	११७	७२	तथा ।
११८	११८	५४	भीष्मपराक्रमवर्णनं ।
११९	११९	१२५	भीष्मनिपातः ।
१२०	१२०	७१	कुरुपाण्डवैरन्यैराजभिश्चभीष्माभिवादनं । अर्जुनेनभीष्मायबाणमयोपधानसमर्पणं ।
१२१	१२१	५८	तृषार्तेनभीष्मेणपानीययाचनं । राजभिरानीतंजलंविनिन्द्यार्जुनंप्रतितद्याचनं। अर्जुनेनपर्जन्यास्त्रेणभूमिंभित्वोत्थापितसलिलधारयाभीष्मस्यतृष्णाशमनं । भीष्मेणदुर्योधनंप्रत्यर्जुनप्रशंसनपूर्वकंपाण्डवैःसहशमोपदेशः ।
१२२	१२२	४४	अपगतेषुराजसुकर्णेनभीष्ममेत्यरहस्यभिवादनं । भीष्मेणकर्णंप्रतितस्य कुन्तीसुतत्वोक्त्यापाण्डवैःसहसंगमचोदना । कर्णेनसयुक्तिकंपाण्डवैः सहसंगमस्यदुष्करत्वमभिधायभीष्मक्षमापनपूर्वकंस्वावासगमनं ।

इति दशमदिवसयुद्धं ॥ १० ॥

समाप्तं भीष्मवधपर्व ॥ ४ ॥ भीष्मपर्वसंपूर्णं ॥ ६ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

अथ द्रोणपर्व ॥ ७ ॥

अत्रावान्तरपर्वाणि ॥ ८ ॥ अध्यायाः ॥ २०३ ॥ श्लोकाः ॥ १००१२ ॥

अथ द्रोणाभिषेकपर्व ॥ १ ॥ अध्यायाः ॥ १६ ॥ (१-१६) ॥ श्लोकाः ॥ ७०० ॥

अध्याय.	छपा.अ.	श्लोक.	
१	१	५४	धृतराष्ट्रेणसञ्जयंप्रतिभीष्मपातानन्तरीयकदुर्योधनादिवृत्तान्तप्रश्नः । सञ्जयेनयोधानांशरणत्वेनकर्णाह्वानेकथितेधृतराष्ट्रस्यकर्णवृत्तान्तप्रश्नः ।
२	२	३७	कर्णेनपाण्डवोच्छेदनपूर्वकंदुर्योधनायराज्यदानंप्रतिज्ञाययुद्धायाभियानं ।
३	३	२५	कर्णेनभीष्ममेत्ययुद्धानुज्ञायाचनं ।
४	४	१९	भीष्मानुज्ञातस्यकर्णस्ययुद्धायागमनं ।
५	५	२१	दुर्योधनपृष्टेनकर्णेनतंप्रतिद्रोणस्यसैनापत्यकरणविधानं ।
६	६	१४	दुर्योधनेनद्रोणंप्रतिसैनापत्यस्वीकरणप्रार्थना ।
७	७	५४	द्रोणस्यसैनापत्येऽभिषेकः । द्रोणयुद्धं ।
८	८	३८	सञ्जयेनधृतराष्ट्रंप्रतिद्रोणपराक्रमवर्णनपूर्वकंतन्निधनकथनं ।
९	९	५२	द्रोणमरणश्राविणोधृतराष्ट्रस्यशोचनं ।
१०	१०	७७	द्रोणमरणश्रवणेनमूर्च्छितस्यधृतराष्ट्रस्यपरिचारिकाभिर्जलसेचनादिनासमुद्बोधनं । धृतराष्ट्रेणसंजयंप्रतियुद्धकथनचोदना ।
११	११	५१	धृतराष्ट्रेणप्रसंगाद्वत्त्युद्रेकेणश्रीकृष्णचरित्रानुकीर्तनं । तथापुनर्युद्धकथनचोदना ।
१२	१२	३५	द्रोणचोदितेनदुर्योधनेनयुधिष्ठिरस्यजीवग्राहग्रहणवरणं । द्रोणेनार्जुनासन्निधानेतद्ग्रहणप्रतिज्ञानं । दुर्योधनेनतदुद्घोषणं ।
१३	१३	२९	अर्जुनेनद्रोणप्रतिज्ञाभीतस्ययुधिष्ठिरस्यसमाश्वासनं ।
१४	१४	८७	द्रोणयुद्धं । द्वैरथयुद्धं । अभिमन्युपराक्रमश्च ।
१५	१५	४१	भीमेनगदायुद्धेशल्यपराजयः ।
१६	१६	६६	द्रोणेनयुधिष्ठिरग्रहणोद्यमेऽर्जुनेनतद्भङ्गः ।

इत्येकादशदिवसयुद्धं ॥ ११ ॥

समाप्तंद्रोणाभिषेकपर्व ॥ १ ॥

अथ संशप्तकवधपर्व ॥ २ ॥ अध्यायाः ॥ १६ ॥ (१७-३२) ॥ श्लोकाः ॥ ८२१ ॥

अध्याय.	छपा.अ.	श्लोक.	
१७	१७	५०	संशप्तकैराहूतस्यार्जुनस्ययुधिष्ठिररक्षणेसत्यजितंनियोज्यतान्प्रतियुद्धायगमनं ।
१८	१८	३४	अर्जुनस्यसंशप्तकैस्सहयुद्धं ।
१९	१९	४३	तथा ।
२०	२०	६७	संकुलयुद्धं ।
२१	२१	६९	युधिष्ठिरंजिघृक्षतोद्रोणस्यसत्यजितानिरोधः । द्रोणेनसत्यजितिनिहतेभयाद्युधिष्ठिरस्यपलायनं । पुनर्युधिष्ठिरंजिघृक्षुणाद्रोणेनपाञ्चाल्यादीनांहननं ।
२२	२२	३३	द्रोणपराक्रमहृष्टेनदुर्योधनेनकर्णसंबोध्यभीमसेनाद्यवज्ञानेकृतेकर्णेनभीमादीनांप्रशंसनपूर्वकमनवज्ञेयत्वकथनं ।
२३	२३	९९	रथानामश्वध्वजवर्णनं ।
२४	२४	२०	धृतराष्ट्रेणपुत्रान्प्रतिशोचनपूर्वकंसञ्जयंप्रतियुद्धकथनचोदना ।
२५	२५	६७	द्वन्द्वयुद्धं ।
२६	२६	६९	भगदत्तपराक्रमवर्णनं ।
२७	२७	३२	अर्जुनेनसंशप्तकानांहननं ।
२८	२८	३०	भगदत्तार्जुनसमागमः ।
२९	२९	५७	अर्जुनेनसगजस्यभगदत्तस्यवधः ।
३०	३०	४२	अर्जुनयुद्धवर्णनं ।

अध्याय.	छापा.अ.	श्लोक.	
३१	३१	२९	अश्वत्थाम्नानीलस्यवधः ।
३२	३२	८०	संकुलयुद्धं ।

इति द्वादशदिवसयुद्धं ॥ १२ ॥

समाप्तंसंशप्तकवधपर्व ॥ २ ॥

अथाभिमन्युवधपर्व ॥ ३ ॥ अध्यायाः ॥ ३९ ॥

(३३–७१) ॥ श्लोकाः ॥ १०७४ ॥

३३	३३	४१	युधिष्ठिरस्याग्रहणाद्दुर्मनायमानंदुर्योधनंप्रतिद्रोणेनकस्यचिन्महारथस्यहननप्रतिज्ञा । सञ्जयेनधृतराष्ट्रंप्रतिसंक्षेपतोऽभिमन्युवधकथनं ।
३४	३४	१३	द्रोणेनपद्मव्यूहरचना ।
३५	३५	३२	युधिष्ठिरेणाभिमन्युंप्रतिपद्मव्यूहभेदनचोदना ।
३६	३६	५०	अभिमन्युयुद्धवर्णनं ।
३७	३७	३८	अभिमन्युपराक्रमवर्णनं ।
३८	३८	२४	तथा ।
३९	३९	३१	दुःशासनाभिमन्युसमागमः ।
४०	४०	३८	अभिमन्युनाकर्णदुःशासनपराजयः ।
४१	४१	२८	अभिमन्युपराक्रमवर्णनं ।
४२	४२	२४	अभिमन्युमनुगतानांजयद्रथेननिरोधः । जयद्रथस्यरुद्रात्पाण्डवनिरोधरूपवरलाभस्यसञ्जयेनधृतराष्ट्रंप्रतिकथनं ।
४३	४३	१९	जयद्रथेनव्यूहपथंपिधायपाण्डवादिनिरोधः ।
४४	४४	२१	अभिमन्युपराक्रमवर्णनं ।
४५	४५	३०	अभिमन्युनादुर्योधनपराजयः ।
४६	४६	२८	अभिमन्युनालक्ष्मणस्यवधः ।
४७	४७	२४	अभिमन्युपराक्रमवर्णनं ।
४८	४८	४१	द्रोणादिभिःषड्भिरभिमन्योर्विरथीकरणं ।
४९	४९	४०	अभिमन्युवधः ।
५०	५०	५५	युद्धभूमिवर्णनं ।

इति त्रयोदशदिवसयुद्धं ॥ १३ ॥

५१	५१	२५	युधिष्ठिरस्याभिमन्युमनुशोच्यविलापः ।
५२	५२	५२	युधिष्ठिरसमाश्वासनायव्यासेनतंप्रत्यकम्पनोपाख्यानकथनोपक्रमः ।
५३	५३	२४	ब्रह्मरुद्रसंवादः । ब्रह्मणाप्रजासंहारायमृत्युदेवीसर्जनं ।
५४	५४	५८	नारदेनमृत्युब्रह्मसंवादकथनेनाकंपनस्यशोकपरिहारः । व्यासेनाकंपनोपाख्यानकथनेनयुधिष्ठिरस्यशोकपरिहारः ।
५५	५५	५७	व्यासेनयुधिष्ठिरंप्रतिषोडशराजकीयाख्यानकथनं । नारदेनसञ्जयंप्रतिमरुत्तराजचरित्रकथनं ।
५६	५६	१२	सुहोत्रचरित्रं ।
५७	५७	१३	अङ्गराजचरित्रं ।
५८	५८	१५	शिबिचरित्रं ।
५९	५९	३१	दाशरथिरामचरित्रं ।
६०	६०	१५	भगीरथचरित्रं ।
६१	६१	१३	दिलीपचरित्रं ।
६२	६२	२०	मान्धातृचरित्रं ।
६३	६३	१३	ययातिचरित्रं ।
६४	६४	१७	अम्बरीषचरित्रं ।
६५	६५	१२	शशिबिन्दुचरित्रं ।
६६	६६	२१	गयचरित्रं ।
६७	६७	२१	रन्तिदेवचरित्रं ।
६८	६८	१६	भरतचरित्रकथनं ।
६९	६९	५१	पृथुचरित्रं ।
७०	७०	२७	परशुरामचरित्रं ।
७१	७१	२६	युधिष्ठिरंसमाश्वास्यव्यासस्यस्वाश्रमगमनं ।

समाप्तमभिमन्युवधपर्व ॥ ३ ॥

अथ प्रतिज्ञापर्व ॥ ४ ॥ अध्यायाः ॥ १३ ॥

(७२–८४) ॥ श्लोकाः ॥ ५६४ ॥

७२	७२	९३	अभिमन्युमनुशोच्यार्जुनस्यविलापः ।
७३	७३	६५	युधिष्ठिरेणार्जुनंप्रत्यभिमन्युनिधनप्रकारकथनं । अर्जुनेनसशपथंजयद्रथवधप्रतिज्ञा ।
७४	७४	३६	अर्जुनप्रतिज्ञाश्रवणचकितस्यजयद्रथस्यद्रोणदुर्योधनाभ्यांसमाश्वासनं ।
७५	७५	३१	श्रीकृष्णेनार्जुनंप्रतिद्रोणादिभिर्जयद्रथरक्षणप्रतिज्ञाकथनं ।
७६	७६	२९	अर्जुनेनश्रीकृष्णंप्रतिस्वसामर्थ्यकथनं ।
७७	७७	२७	श्रीकृष्णेनसुभद्रासमाश्वासनं ।
७८	७८	४७	तथा ।
७९	७९	४७	श्रीकृष्णेनरात्रावर्जुनेनत्र्यम्बकायबलिप्रदापनं । कृष्णदारुकसंभाषणं ।
८०	८०	६६	अर्जुनस्यश्रीकृष्णेनसहस्वप्नेकैलासगमनंतथास्तुत्यारुद्रप्रसादनं ।
८१	८१	२५	अर्जुनेनस्वप्नेकैलासेशङ्करात्पाशुपता-

अध्याय.	छपा.अ.	श्लोक.	
			स्यमुपलभ्यश्रीकृष्णेनसहपुनःशिबिरंप्रत्यागमनं ।
८२	८२	३५	श्रीकृष्णस्यकृताह्निकंयुधिष्ठिरंप्रत्यागमनं ।
८३	८३	२८	जयद्रथवधस्यदुष्करत्वशङ्किनोयुधिष्ठिरस्यश्रीकृष्णेनसमाश्वासनं ।
८४	८४	३५	जयद्रथंप्रतिगच्छताऽर्जुनेनयुधिष्ठिररक्षणायसात्यकिंप्रतिचोदना ।

इति प्रतिज्ञापर्व ॥ ४ ॥

अथ जयद्रथवधपर्व ॥ ५ ॥ अध्यायाः ॥ ६९ ॥ (८५–१५३) ॥ श्लोकाः ॥ ३७८८ ॥

अध्याय.	छपा.अ.	श्लोक.	
८५	८५	५५	धृतराष्ट्रेणपुत्रान्प्रतिशोचनपूर्वकमभिमन्युनिधनानन्तरीयकयुद्धकथनचोदना ।
८६	८६	२३	सञ्जयेनधृतराष्ट्रोपालम्भनपूर्वकंयुद्धकथनोपक्रमः ।
८७	८७	३४	द्रोणेनशकटव्यूहनिर्माणं ।
८८	८८	३१	अर्जुनस्यरथाङ्गणप्रवेशः ।
८९	८९	३३	अर्जुनयुद्धवर्णनं ।
९०	९०	३७	अर्जुनेनदुश्शासनपराजयः ।
९१	९१	४६	अर्जुनस्यव्यूहमुखस्थेनद्रोणेनकंचित्कालंयुद्ध्वातमपहायव्यूहप्रवेशः ।
९२	९२	७७	अर्जुनेनश्रुतायुधसुदक्षिणयोर्वधः ।
९३	९३	७४	अर्जुनेनश्रुतायुःप्रभृतीनांवधः ।
९४	९४	७९	अर्जुनाद्भीतेनदुर्योधनेनद्रोणमेत्यतदुपालंभनपूर्वकंजयद्रथंप्रतिशोचनं । द्रोणेनदुर्योधनस्याभिमन्त्रितकवचमाबध्यार्जुनेनसहयुद्धायप्रेषणं ।
९५	९५	५२	राज्ञांद्वन्द्वीभूययुद्धायसमागमः ।
९६	९६	३१	द्वन्द्वयुद्धवर्णनं ।
९७	९७	३६	द्रोणधृष्टद्युम्नयोर्युद्धं ।
९८	९८	५८	द्रोणसात्यक्योर्युद्धं ।
९९	९९	६४	अर्जुनेनरणाङ्गणेहयाप्यायनायशरैःसरोनिर्माणं तथाशरमयवेश्मनिर्माणं।
१००	१००	४३	श्रीकृष्णेनतस्मिन्सरसिस्नापनादिनाऽऽप्यायितानांतुरगाणांपुनारथेयोजनं । पुनःश्रीकृष्णार्जुनयोर्जयद्रथंप्रतिगमनं ।
१०१	१०१	४३	जयद्रथंयियासोरर्जुनस्यदुर्योधनेननिरोधः ।
१०२	१०२	३९	श्रीकृष्णेनदुर्योधनदुष्कृतानुस्मारणपूर्वकमर्जुनंप्रतितद्वधचोदना । अर्जुनंप्रतिदुर्योधनस्यवीरवादः ।
१०३	१०३	४९	अर्जुनेनदुर्योधनपराजयः ।
१०४	१०४	३४	अर्जुनस्यभूरिश्रवःप्रभृतिभिरष्टभिर्युद्धं।
१०५	१०५	३८	सञ्जयेनरथानांध्वजानांचवर्णनं ।
१०६	१०६	४६	द्रोणयुधिष्ठिरयोर्युद्धं ।
१०७	१०७	३९	संकुलयुद्धं ।
१०८	१०८	४३	द्रौपदेयैःशलवधः । भीमेनालंबुसपराजयः ।
१०९	१०९	८८	घटोत्कचेनालंबुसवधः ।
११०	११०	१०७	रणाङ्गणेपाञ्चजन्यस्वनेश्रुते अश्रुतेचगाण्डीवघोषेऽर्जुनस्यविपदमाशङ्कमानेनयुधिष्ठिरेणसात्यकिंप्रत्यर्जुनवृत्तान्तपरिज्ञानायगमनचोदना ।
१११	१११	५३	अर्जुनंप्रतिगच्छेतियुधिष्ठिरचोदितेनसात्यकिना तंप्रतिस्वस्यार्जुनेनतद्रक्षणायनियोगाभिधानपूर्वकंस्वेनतस्यापरित्याज्यत्वकथनं । युधिष्ठिरेणभीमादिभिःस्वस्यरक्षणकथनपूर्वकंपुनःसात्यकेरर्जुनंप्रतिगमनेनियोजनं ।
११२	११२	८३	सात्यकेर्युधिष्ठिररक्षणेभीमंनियोज्यार्जुनदर्शनायप्रस्थानं ।
११३	११३	७५	अर्जुनंगच्छतःसात्यकेःकृतवर्मणासहयुद्धं ।
११४	११४	१०३	धृतराष्ट्रस्यस्वसैन्यपराजयश्रवणेनशोचनं । संजयेनतदुपालंभपूर्वकंकृतवर्मपराक्रमवर्णनं ।
११५	११५	६३	सात्यकिनाजलसन्धस्यवधः ।
११६	११६	४९	सात्यकिनादुर्योधनकृतवर्मणोःपराजयः ।
११७	११७	३६	सात्यकिपराक्रमवर्णनं ।
११८	११८	१८	सात्यकिनासुदर्शननाम्नोराज्ञोवधः ।
११९	११९	६७	सात्यकिपराक्रमवर्णनं ।
१२०	१२०	४७	सात्यकियुद्धवर्णनं ।
१२१	१२१	६४	तथा ।
१२२	१२२	७३	सात्यकिभयात्पलायमानस्यदुश्शासनस्यद्रोणेनोपालम्भः।द्रोणधृष्टद्युम्नयोर्युद्धं।
१२३	१२३	३८	सात्यकिनादुश्शासनपराजयः ।
१२४	१२४	५८	संकुलयुद्धं ।
१२५	१२५	७८	द्रोणपराक्रमवर्णनं ।
१२६	१२६	५५	अर्जुनवृत्तान्तपरिज्ञानायसात्यकिंप्रेषितवतायुधिष्ठिरेणपुनस्तयोर्वृत्तान्तपरिज्ञानायभीमस्यतत्रगमनचोदना ।

अध्याय.	छपा.अ.	श्लोक.	
१२७	१२७	५०	भीमेनकेषांचिद्धार्तराष्ट्राणांहननं तथास्वपथंनिरुन्धानस्यद्रोणस्यरथभञ्जनं ।
३६६	३५७	११	ब्राह्मणेनधर्मावगमनायनागगृहंप्रतिगमनं ।
३६७	३५८	१३	ब्राह्मणेननागींप्रतिप्रवासिनेनागायस्वागमननिवेदननिर्देशपूर्वकंनदीपुलिनंप्रतिगमनं ।
३६८	३५९	१३	पुलिनवासिनाब्राह्मणेनस्वस्यफलाद्याहारंप्रार्थयतांनागीयानांनागागमनावधिस्वस्याहाराकरणकथनपूर्वकंप्रतिनिवर्तनं ।
३६९	३६०	१६	नागपत्न्याप्रवासादागतंस्वभर्तारंप्रतिब्राह्मणवचननिवेदनं ।
३७०	३६१	२०	ब्राह्मणसंदेशश्रवणरुष्टेननागेनपत्नीसान्त्वनेनरोषत्यागपूर्वकंब्राह्मणंप्रतिप्रस्थानं ।
३७१	३६२	१६	नागब्राह्मणयोःसंलापः ।
३७२	३६३	१८	आश्चर्यकथनंप्रार्थितेननागेनसूर्यमण्डलेतत्तुल्यतेजोन्तरप्रवेशदर्शनकथनं ।
३७३	३६४	६	नागेनब्राह्मणंप्रतिसूर्येणस्वंप्रतितद्बिंबप्रविष्टतेजसःउञ्छवृत्तिमुनिस्वरूपत्वकथनं ।
३७४	३६५	१०	ब्राह्मणेननागामन्त्रणपूर्वकमिष्टदेशंप्रतिगमनं ।
३७५	३६६	९	भीष्मेणयुधिष्ठिरंप्रत्युञ्छवृत्त्युपाख्यानोपदेशपरंपराक्रमकथनपूर्वकमुञ्छवृत्तिब्राह्मणस्यवनप्रवेशकथनं ।

समाप्तं मोक्षधर्मपर्व ॥ ३ ॥ शान्तिपर्व च संपूर्णम् ॥ १२ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

अथानुशासनपर्व ॥ १३ ॥

अत्रावान्तरपर्वणी ॥ २ ॥ अध्यायाः ॥ २७४ ॥ श्लोकाः ॥ ११९०७ ॥

अथ दानधर्मपर्व ॥ १ ॥ अध्यायाः ॥ २७२ ॥ (१-२७२) ॥ श्लोकाः ॥ ११०२० ॥

अध्याय.	झपा.अ.	श्लोक.	
१	१	८४	युधिष्ठिरेणभीष्मंप्रतिपुनःशमादिकथनप्रार्थना । भीष्मादिनिधनेस्वस्यैव हेतुत्वबुद्ध्यास्वोपालम्भनपूर्वकंशोचन्तंयुधिष्ठिरंप्रतिभीष्मेणजीवस्यकर्मण्यस्वातन्त्र्यमभिधायतन्निदर्शनतयालुब्धगौतमीसंवादानुवादः ।
२	२	११२	गार्हस्थ्याश्रयणेनातिथिसत्कारस्यश्रेयस्साधनतायांदृष्टान्ततयासुदर्शनोपाख्यानकथनं ।
३	२७	३०	ब्राह्मण्यस्यक्षत्रियादिदौर्लभ्येदृष्टान्ततयामतङ्गोपाख्यानकथनं । तत्रेन्द्रमतङ्गसंवादः ।
४	२८	१६	मतङ्गेनब्राह्मण्यप्राप्तयेतपश्चरणं । तं प्रतीन्द्रेणब्राह्मण्यस्यदुर्लभत्वोक्तिः ।
५	२९	२८	पुनरपितपस्यतेमतङ्गायेन्द्रेणब्राह्मण्यस्यदुष्प्रापत्वकथनपूर्वकमितराभीष्टदानं ।
६	३	१९	युधिष्ठिरेणभीष्मंप्रतिविश्वामित्रचरित्रानुवादपूर्वकंतस्यब्राह्मण्यप्राप्तिहेतुप्रश्नः ।
७	४	६२	भीष्मेणयुधिष्ठिरंप्रतिविश्वामित्रोत्पत्तिप्रकारकथनेनैवब्राह्मण्यप्राप्तिप्रकारकथनं ।
८	३०	६७	वीतहव्यस्यब्राह्मण्यप्राप्तिः ।
९	६	५१	पुरुषकारस्यप्राबल्येवसिष्ठब्रह्मसंवादः ।
१०	७	३०	शुभाशुभकर्मफलं ।
११	५	३२	शुकवासवसंवादानुवादेनानृशंस्यप्रशंसनं ।
१२	८	३२	ब्राह्मणप्रशंसनं ।
१३	+	५	क्रोधस्यातिथेश्चक्रमेणनिंदाप्रशंसनपरवेदचतुष्टयसंवादः ।
१४	+	६	ब्राह्मणानांपतिव्रतानांचमहिमप्रतिपादकेन्द्राग्न्यादिसंवादः ।
१५	+	१२	भगवन्महिमप्रतिपादकव्यासवासुदेवसंवादः ।
१६	+	८	भगवन्महिमप्रतिपादकव्यासवचनं ।
१७	+	५	भक्तिश्रद्धादीनांमुक्तिसाधनताप्रतिपादकव्यासवाक्यं ।
१८	+	१२	श्रीकृष्णमहिमप्रतिपादकव्यासमद्रराजसंवादः ।
१९	+	८	श्रीकृष्णेनभीष्मंप्रतियुधिष्ठिरायगरुडोपाख्यानकथनचोदना ।
२०	+	२२	कश्यपेनस्वभार्ययोःकद्रूविनतयोःक्रमेणपुत्रसहस्रतद्वयलाभरूपवरदानं । विनतयाएकाण्डभेदनं । असमप्रतयाजातेनारुणेनमात्रेदासीभवनरूपशापदानं ।
२१	+	१५	गरुडोत्पत्तिः । कद्रूविनतयोरुच्चैश्श्रवोवालरूपविषयेविवादः । पराजितायादासीभावरूपपणबन्धः ।
२२	+	१०	कद्र्वास्वपुत्रान्प्रत्युच्चैःश्रवोवालस्यनैल्यसंपादनचोदना ।
२३	+	१५	कद्र्वास्ववचनतिरस्कारिणःकांश्चनस्वपुत्रान्प्रतिजनमेजयसत्रेनिधनरूपशापदानं । कैश्चनसर्पैर्वालस्यनैल्यसंपादनं । हयवालेनैल्यदर्शिन्याविनतया स्वस्यकद्रूदासीभवनाङ्गीकरणं ।
२४	+	२३	नारदेनगरुडंप्रतिविनतायाःकद्रूदास्यनिवेदनं । गरुडेनकद्रूंप्रतिस्वमातुर्दास्यान्मोचनयाचना । कद्र्वागरुडंप्रत्यमृतानयनेमातुर्दास्यान्मोचनोक्तिः ।

अध्याय.	झपा.अ.	श्लोक.	
२५	+	२८	गरुडेनस्वपितरिअमृताहरणायस्वगमननिवेदनं । कश्यपेनतंप्रतिगजकच्छपभक्षणपूर्वकममृताहरणचोदना ।
२६	+	३७	गरुडेनचरणाभ्यांगजकच्छपग्रहणं । तेनतयोर्भक्षणायनैमिशारण्यस्थमहातरुशाखायांवेगान्निपतनं । स्वनिपतनमात्रेणभज्यमानशाखाया अधोभागेलंबमानमुनिगणावलोकनात्तुण्डेनतच्छाखाग्रहणपूर्वकंतस्यपुनरुत्पतनं । तेनसमुद्रान्तेशाखाविसर्जनेनतन्निवासिनांकुविन्दानांहननं ।
२७	+	१४	गरुडेनशैलाग्रेउपविश्यगजकच्छपभक्षणं । ततःस्वर्गेऽमृतसमीपंगतेन तेनतत्रपरितोज्वलदग्निदर्शनभयाद्ब्रह्माणंप्रतितच्छमनोपायप्रश्नः । ब्रह्मणातंप्रतिनवनीतप्रक्षेपेणाग्निसंशामनचोदना ।
२८	+	२३	गरुडेननवनीतप्रक्षेपेणमन्दीभूताग्न्युल्लङ्घनपूर्वकममृतरक्षिणांपक्षप्रहारेण निराकरणं । तथाऽमृतमाहृत्यवियतिसमुत्पतनं । गरुडोपरिइन्द्रेणवज्रायुधपातनं ।
२९	+	२२	गरुडेनकद्रूंप्रत्यमृतनयनकथनं । तयाविनतायादास्यान्मोचनं । गरुडेनेन्द्रायपुनरमृतप्रत्यर्पणं ।
३०	९	२८	भीष्मेणयुधिष्ठिरंप्रतिब्राह्मणायप्रतिश्रुतार्थाप्रदानस्यानर्थहेतुतायांदृष्टान्ततयासृगालवानरसंवादानुवादः ।
३१	१०	७५	शूद्रोपदेशस्यानर्थहेतुतायांदृष्टान्ततयामुनिशूद्रयोःकथा ।
३२	११	२४	महालक्ष्म्यारुक्मिणींप्रतिस्वावासस्थलनिर्देशः ।
३३	+	२५	कृतघ्नस्यप्रायश्चित्तविषयेदृष्टान्ततयावत्सनाभमुनिचरित्रं ।
३४	१२	५४	स्त्रीपुंसयोःसमायोगेस्त्रियाएवसुखाधिक्येसंवादतयाभङ्गास्वनोपाख्यानकथनं ।
३५	१३	७	मनोवाक्कायरूपकरणैर्दुष्कर्मपरित्यागपूर्वकंशुभकर्मकरणस्यभगवत्प्रसादनहेतुत्वोक्तिः ।
३६	+	६५	युधिष्ठिरेणभीष्मंप्रतिस्वेनश्रुतान्धर्माननूयप्राणिनांसांसारिकदुःखानुवर्णनपूर्वकंस्वस्यसंसारनिर्वेदनिदर्शनेनपुनर्विस्तरेणवैष्णवधर्मकथनप्रार्थना ।
३७	+	१८	ब्राह्मणादिसर्वजगतामनित्यत्वकथनपूर्वकंनारायणस्यनित्यत्वकथनेनतदुपासनविधानं ।
३८	+	६५	तत्वसृष्ट्यादिप्रतिपादकनारदसनत्कुमारसंवादानुवादः ।
३९	+	३८	प्रलयप्रकारः ।
४०	+	७९	ब्रह्मणादेवान्प्रतिनारायणमहिमप्रतिपादकगरुडकश्यपसंवादानुवादः ।
४१	+	४४	गरुडस्यबदरीनारायणानुगमनादिप्रतिपादकगरुडमुनिगणसंवादानुवादः ।
४२	+	६८	श्रीनारायणमहिमप्रतिपादकगरुडमुनिगणसंवादः ।
४३	+	७३	बदरीनारायणेनगरुडंप्रतिस्वमहिमोक्तिः । गरुडेनमुनिगणान्प्रतिस्वानुभूतनारायणमहिमोक्तिः ।
४४	+	१२	सुपर्णोपाख्यानसमापनं ।
४५	१४	४१७	श्रीकृष्णेनभीष्मनियोगाद्युधिष्ठिरंप्रति महादेवमहिमकथनं ।
४६	१५	११	श्रीकृष्णेनपार्वतीपरमेश्वराभ्यांस्वस्यैववरप्रदानकथनं ।
४७	१६	७६	उपमन्युनाश्रीकृष्णंप्रतितण्डिकृतमहादेवस्तुत्यनुवादः ।
४८	१७	१८२	शिवसहस्रनाम ।
४९	१८	८४	महादेवमहिमा ।
५०	१९	११०	स्त्रीस्वभावप्रदर्शनायाष्टावक्रोपाख्यानकथनारंभः । अष्टावक्रेणवदान्यंप्रतिकन्यायाचनं । तथावदान्यनियोगादुत्तरदिग्गमनं । तत्रजरतीरूपधारिण्योत्तरदिगभिमानिदेवतयासंवादः ।
५१	२०	२६	तयादेवतयापरदारत्वशङ्कयास्वभोगमनङ्गीकुर्वाणमष्टावक्रंप्रतिजरतीरूपत्यागेनकन्यारूपस्वीकरणपूर्वकंस्वपाणिग्रहणप्रार्थना ।
५२	२१	२३	तयादेवतयास्वीयप्रार्थनायाःस्त्रीचापल्यप्रदर्शनार्थत्वकथनपूर्वकमष्टावक्रस्यधर्मोपदेशेनस्वगृहंप्रतिप्रेषणं । अष्टावक्रेणवदान्यकन्यापाणिग्रहणेनस्वाश्रमेसुखनिवासः ।

अध्याय.	झपा.अ.	श्लोक.	
५३	+	३९	ऋष्यादीनांवियोनिजत्वेपितपोविद्यादीनामेवमाहात्म्यप्रयोजकत्वेनिदर्शनतयातादृशानांसंभवप्रकारादिकथनं।
५४	+	२६	युगचतुष्टयधर्मप्रतिपादकनारदमार्कण्डेयसंवादः ।
५५	+	२२	कन्यानांप्रदानकालादिप्रतिपादकनारदमार्कण्डेयसंवादः ।
५६	+	६	भार्यात्वेनपरिग्रहयोग्याःस्त्रियः ।
५७	+	२५	सतीनामसतीनांचगुणदोषप्रतिपादनं।
५८	+	११	स्त्रीणामतिक्रमेप्रायश्चित्तं ।
५९	+	५०	स्त्रीणामपरित्याज्यत्वं ।
६०	२२	४१	दानपात्राणांलक्षणं ।
६१	२३ (१–४७)	५७	श्राद्धेनिमन्त्रणार्हाब्राह्मणाः ।
६२	२३ (४८–१०३)	५९	दानपात्रलक्षणं । स्वर्गनरकप्रापकपुण्यपापप्रतिपादनं ।
६३	२४	१२	हिंसांविनापिब्रह्महत्याप्राप्तिः ।
६४	२५	७२	नद्यादितीर्थानांतत्तन्नामविशेषनिर्देशेनतत्सेवनफलप्रतिपादकगौतमाङ्गिरस्संवादः ।
६५	२६	१११	गङ्गामहिमप्रतिपादकसिद्धशिलवृत्तिसंवादानुवादः ।
६६	३१	३७	मानवेषुपूज्यताप्रयोजकगुणप्रतिपादककृष्णनारदसंवादः ।
६७	३२	३९	शरणागतरक्षणप्रतिपादकश्येनकपोतोपाख्यानं ।
६८	३३	२७	ब्राह्मणमहिमा ।
६९	३४	३०	ब्राह्मणमहिमप्रतिपादकपृथ्वीवासुदेवसंवादः ।
७०	३५	२५	ब्राह्मणमहिमा ।
७१	३६	२०	ब्राह्मणमहिमप्रतिपादकशक्रशंबरसंवादः ।
७२	३७	१८	पात्रलक्षणं ।
७३	३८	४१	स्त्रीस्वभावप्रतिपादकनारदपञ्चचूडासंवादः ।
७४	३९	१६	स्त्रीणांदुश्चरितं ।
७५	४०	६१	स्त्रीणांपुरुषचित्तप्रमथनायशक्तिविशेषदानपूर्वकंब्रह्मणासृष्टतयातद्रक्षणस्य दुष्करत्वकथनं । अत्रदृष्टान्ततयाविपुलोपाख्यानं । गुरुणास्वभार्यारक्षणे नियुक्तेनविपुलनाम्नाशिष्येणतदर्थंयोगेनगुरुभार्याशरीरप्रवेशः ।
७६	४१	३६	इन्द्रेणदेवशर्ममुन्यसंनिधानेतद्भार्याविलोभनायतदाश्रमाभिगमनं । विपुलतपोभिभूतेनेन्द्रेणभयात्ततोनिर्गमनं ।
७७	४२	३३	गुरुनियोगाद्दिव्यपुष्पानयनार्थंगतेनविपुलेनमध्येमार्गेनरवरमिथुनात्स्वगतिनिन्दाश्रवणं । निन्दितगतिप्रापकस्वदुश्चरितंचिन्तयतातेनचिरायतदनुस्मरणं ।
७८	४३	३१	देवशर्मणाविपुलंप्रतितदृष्टानांमिथुनानांषट्पुरुषाणांचक्रमेणाहोरात्रऋत्वभिमानिदेवतात्वकथनं । तथास्वस्मिन्स्वदाररक्षणाययोगेनतच्छरीरप्रवेशानिवेदनस्यदुर्गतिहेतुत्वकथनं । तथातत्कृतस्वदाररक्षणपरितोषेणतद्दुरितदूरीकरणपूर्वकंतेनस्वभार्ययाचसहस्वर्गेसुखनिवासः ।
७९	४४	५७	विवाहविभागः । कन्यानांभार्यात्वप्रापकविध्यादि ।
८०	४५	२३	वैवाहिकविध्यादेर्दायार्हतादेश्चकथनं ।
८१	४६	१५	स्त्रीणांप्रशंसनं ।
८२	४७	६२	ब्राह्मणादीनांदायविभजनविधिः ।
८३	४८	४९	संकरजातीनांशीलविभागादिकथनं ।
८४	४९	४७	औरसादिपुत्रनिरूपणं ।
८५	५०	२६	महद्दर्शनसहवासयोर्गवांचप्रभावबोधनायच्यवनोपाख्यानकथनारंभः । अन्तर्जलेनिमज्यतपस्यतश्च्यवनस्यदाशैर्जालेनजलचरैःसहकूलप्रापणं। दाशैःप्रार्थितेनऋषिणादाशान्प्रतिमत्स्यैःसहस्वस्यमारणमोचनान्यतरकरणचोदना ।
८६	५१	५१	दाशैश्च्यवनवृत्तान्तंनिवेदितेननहुषेणतंप्रतिच्यवनाभीष्टकरणप्रतिज्ञानं । च्यवनेननहुषंप्रतिस्वोचितमूल्यदानेनात्ममोचनचोदना । नहुषेणसमग्रराज्यस्यमूल्यतापरिकल्पनेपिमुनिनातदनङ्गीकरणेगविजातेनमुनिनातंप्रतिगोःप्रतिनिधीकरणचोदना । च्यवनेनगोप्रतिग्रहेणस्वसहवासिभिर्मत्स्यैःसहदाशानांस्वर्गप्रापणं ।
८७	५२	३९	परशुरामविश्वामित्रयोरुत्पत्तिकथारंभः । च्यवनेनकुशिकराजमेत्यसभा-

अध्याय.	छापा.अ.	श्लोक.	
			र्यस्तप्रतिस्वशुश्रूषाविधानं । सभार्येणकुशिकेनएकविंशतिदिवसाननवरतमेकपार्श्वेनप्रसुप्तस्यच्यवनस्यपादसंवाहनेनपर्युपासनं । ततःशयनादुत्थितेनतेनकिंचिद्दूरंगत्वाऽन्तर्धानं ।
८८	५३	७०	ततश्च्यवनेनकुशिकंप्रतिपुनःशयनेप्रस्वपतआत्मनःप्रदर्शनं । पुनरुत्थितेनमुनिनाराजानंप्रत्यात्मनस्तैलाभ्यञ्जननियोजनेनस्नानशालायांपुनरन्तर्धानं । पुनराविष्कृतात्मनातेनसभार्यस्यराज्ञोरथधुरिसंयोजनपूर्वकंयाचकेभ्यस्तदीयवित्तादिवितरणपूर्वकंवीथ्यांरथेननिर्गमनं । स्वीयप्रतोदताडनेप्यविकृतमानसेसभार्येकुशिकेप्रसीदतामुनिनातस्मैवरदानं ।
८९	५४	४०	परेद्युःप्रभातेसभार्येणकुशिकेनच्यवनावलोकनायवनप्रवेशः । च्यवनेन कुशिकंप्रतिस्वयोगप्रभावसृष्टस्वर्गप्रदर्शनपूर्वकमभिमतवरवरणप्रेरणा ।
९०	५५	३८	च्यवनेनकुशिकंप्रतितद्गृहेनिवासादेः कारणकथनं । तथातस्यब्राह्मण्यप्राप्तीच्छावगमेनतत्पौत्रादेस्तल्लाभवरदानं ।
९१	५६	२१	च्यवनेनकुशिकंप्रतिस्वकुलेजनिष्यतऋचीकस्यानुभावेनस्वकुलेपरशुरामस्यकुशिकवंशेविश्वामित्रस्यचजन्मकथनं ।
९२	५७	४४	भीष्मेणयुधिष्ठिरंप्रतिनानाविधदानानांविशिष्यफलकथनं ।
९३	५८	३३	तटाकादिप्रतिष्ठायावृक्षाद्यारोपणस्यचफलकथनं ।
९४	५९	४०	ब्राह्मणप्रशंसनपूर्वकंतदाराधनविधानं
९५	६०	२०	ब्राह्मणमहिमा ।
९६	६१	४०	ब्राह्मणप्रशंसनपूर्वकंब्राह्मणानांप्रजानांचरक्षणस्यावश्यकर्तव्यत्वकथनं ।
९७	६२	१००	भूदानप्रशंसा ।
९८	६३	५२	अन्नदानप्रशंसा तत्फलंच ।
९९	६४	३६	अश्विन्यादिनक्षत्रयोगेऽन्नदानफलप्रतिपादकनारददेवकीसंवादः ।
१००	६५	१९	जलादिदानफलं ।
१०१	६६	६४	जलतिलभूम्यन्नगोदानादिफलं ।
१०२	६७	१९	जलप्रभाववर्णनं तद्दानप्रशंसाच ।
१०३	६८	३५	तिलजलदीपादिदानप्रशंसापरयमब्राह्मणसंवादानुवादः ।
१०४	६९	२६	गोभूविद्यादानप्रशंसा ।
१०५	७०	३३	ब्राह्मणस्वापहारस्यानर्थहेतुतायांनृगोपाख्यानकथनं ।
१०६	७१	५७	गोदानप्रशंसापरनाचिकेतोपाख्यानं
१०७	७२	१२	गोदानफलविशेषविषयकेन्द्रप्रश्नानुवादः ।
१०८	७३	५१	इन्द्रंप्रतिब्रह्मणागोदानप्रशंसनं ।
१०९	७४	१६	गोविक्रयापहारफलं । सुवर्णस्यगोदानेदक्षिणात्वप्रशंसनं ।
११०	७५	४१	सत्यदमादिप्रशंसनं ।
१११	७६	३१	गोदानविधिः ।
११२	७७	३६	गवामुत्पत्तिप्रकारः । कपिलानामुत्पत्तिप्रकारः ।
११३	७८	२६	गोमहिमप्रतिपादकवसिष्ठसौदाससंवादः ।
११४	७९	२७	ब्रह्मणागोभ्योवरदानं ।
११५	८०	१७	गोदानेसौदासस्यपुण्यलोकावाप्तिः ।
११६	८१	४७	गवांशृङ्गप्राप्तिः ।
११७	+	२४	गोलोकस्यब्रह्मलोकादुपरितनत्वं ।
११८	+	२९	गवामुत्पत्तिः ।
११९	+	२५	सुरभ्याःक्षीरपानादिन्द्रस्यामरत्वप्राप्तिः ।
१२०	+	२९	फेनपोपाख्यानारंभः । सुमित्रनाम्नेविप्रायाङ्गिरसेनैकस्यागोर्दानं । तस्यावंशेऽसंख्येयानांगवांसंभवःसुमित्रेणवत्समुखोद्गतक्षीरफेनपानात्फेनपइतिनामप्राप्तिः ।
१२१	+	२२	फेनपस्यगोभिःकदाचनगोलोकादेत्य गिरिहृदेस्त्रीरूपधारणेनविहरमाणानां गवामवलोकनं । फेनपस्यगोभिःस्वेषांगोलोकप्राप्त्युपायंपृष्टाभिःस्त्रीरूपधारिणीभिर्गोभिःफेनपगाःप्रतिरन्तिदेवस्यसत्रेआत्मनांपशुत्वोपकल्पनस्य तदुपायत्वोक्तिः । फेनपस्यस्वेष्वतिवत्सलतयायागीयपशुत्वेतदभ्यनुज्ञानस्यदुःसंपादतांचिन्तयन्तीषुतासुकपिलाभिस्ताभ्यःस्वेषामेवश्रैष्ठ्यप्राप्तिरूपवराधिगमेनफेनपवधप्रतिज्ञानं ।

अध्याय.	झपा.अ.	श्लोक.	
१२२	+	१४	फेनपस्यगोभक्त्युद्रेकसंतुष्टाभिर्गोलोकादागतगोमातृभिर्योगप्रभावेणशरीराद्वियोजनेनस्वलोकप्रापणपूर्वकंतस्मिन्कपिलानिश्चयनिवेदनं । ततःकपिलाभिर्यथाप्रतिज्ञंशृङ्गाघातादिनाफेनपस्यकुणपशरीरविभेदनं । गोमातृभिरितरगवाममेध्यवदनत्वरूपशापदानं ।
१२३	+	२३	फेनपस्यगोभीरन्तिदेवंप्रतितत्सत्रेस्वेषांपशुत्वेनविनियोगप्रार्थना । तेनगवांमध्येकस्याश्चिदप्यकामलज्ञानेसत्रविरामरूपसमयकरणेनसत्रारंभः । कदाचनकस्याश्चिद्गोर्वत्सस्नेहात्स्वमरणेदुःखावगमेनयागोपरमः ।
१२४	+	४४	गोमाहात्म्यप्रतिपादकव्यासशुकसंवादः ।
१२५	+	११	ब्राह्मणेतरवर्णानांकपिलाक्षीरपानानर्हत्वं ।
१२६	+	११	कपिलानांवरिष्ठत्वेकारणं ।
१२७	+	१७	कपिलालक्षणं ।
१२८	८२	२७	गोमूत्रपुरीषयोःश्रियोनिवासस्यकथनं।
१२९	८३	४९	गोलोकस्यदेवलोकादप्युत्तमत्वेनिमित्तप्रतिपादकब्रह्मशक्रसंवादः ।
१३०	८४	८२	रुद्रवीर्यात्सुवर्णस्योत्पत्तिकथनं । भवस्यभवान्यासहरतियोगेतद्वीर्यभीरुभिर्देवैःप्रार्थितेनदेवेनवीर्यस्योर्ध्वनिरोधनेप्रजोच्छेदकुपितयादेव्यादेवानामनपत्यत्वरूपशापदानं ।
१३१	{८५ / १-८६}	८३	तारकासुरबाधितैर्देवैःब्रह्माणंप्रतिस्वेषांपार्वतीशापेनानपत्यत्वकथनपूर्वकमसुरवधोपायकथनप्रार्थना । ब्रह्मणादेवान्प्रत्यग्नेरसंनिहितत्वेनदेवीशापाविषयतयादेवेनस्ववीर्यनिरोधकालेभुविप्रस्कन्नकिंचिद्वीर्यांशस्यतस्मिन्संसृष्टतयाचतेनगङ्गायांकुमारोत्पादनकथनेनाग्न्यन्वेषणचोदना । अग्निनादेवानांप्रार्थनयागङ्गायांस्वसंसृष्टरुद्रवीर्याधानं । गङ्गयाऽग्निनास्वस्मिन्नाहितगर्भस्यमेरुगिरौसमुत्सर्जनेतदीयतेजोव्याप्तयावद्वस्तूनांकाञ्चनीभावप्राप्तिः ।
१३२	{८५ / ८७-१६८}	८१	वसिष्ठेनपरशुरामंप्रतिसुवर्णप्रभावकथनप्रसंगेनभृग्वङ्गिरःप्रभृतीनांप्रभावकथनं ।
१३३	८६	३५	कुमारोत्पत्तिप्रकारस्यदेवादिभिस्तस्मैक्रीडनकादिदानस्यतारकासुरवधादेश्चकथनं ।
१३४	८७	२१	प्रतिपदादितिथिषुश्राद्धकरणस्यप्रत्येकंफलकथनं ।
१३५	८८	१५	श्राद्धेतिलमांसदानस्यफलविशेषकथनं
१३६	८९	१५	अश्विन्यादिनक्षत्रेषुश्राद्धकरणस्यफलविशेषकथनं ।
१३७	९०	५६	श्राद्धेनिमन्त्रणार्हाणांलक्षणं ।
१३८	९१	४५	श्राद्धेवर्जनीयधान्यशाकादिप्रतिपादकात्रिनिमिसंवादः ।
१३९	९२	२३	निमिकृतश्राद्धप्रकारानुवादेनश्राद्धविधिकथनं ।
१४०	{९३ / १-१७}	१७	उपवासब्रह्मचर्यादीनांलक्षणं ।
१४१	{९३ / १८-६१}	४९	असाधुभ्यःप्रतिग्रहस्यनिन्द्यत्वेसप्तर्षिवृषादर्भिसंवादः । वृषादर्भिणाराज्ञाकश्यपादिसप्तर्षिभिःस्वस्मात्प्रतिग्रहनिराकरणेतज्जिघांसयाकृत्योत्पादनं । तन्नामार्थपरिज्ञानेनतद्वधंचोदितयाकृत्ययावनेतत्समीपंप्रतिगमनं ।
१४२	{९३ / ६२-१४९}	८७	वनेविचरतांसप्तर्षीणांपरिव्राड्रूपधारिणेंद्रेणसमागमः । अरुन्धत्यातस्यातिपीनाङ्गत्वेकारणंपृष्टैस्तैस्तत्कथनं । तथाकामपिपद्मिनीमवलोकितवद्भिस्तैर्बिसग्रहणायतत्समीपगमनं । तत्रतद्रक्षिण्यावृषादर्भिनिर्मितयाकृत्ययास्वस्वनामनिर्वचनेनसरःप्रवेशंचोदितैस्तांप्रतितन्निर्वचनं । भिक्षुरूपिणेन्द्रेणसकृत्स्वनामनिर्वचनेपिपुनःपृच्छन्त्याःकृत्यायादण्डेनमारणपूर्वकंऋषीन्प्रतिस्वस्वरूपप्रकटनं ।
१४३	९४	५४	संभूयतीर्थयात्रांकुर्वद्भिर्द्विजर्षिभीराजर्षिभिश्चक्रमेणब्रह्मसरःप्रतिगमनं । तत्रागस्त्येनहृदात्समुद्धृतस्यपद्मस्यधर्मशुश्रूषुणेन्द्रेणगूढमपहारेऋषिभीराजभिश्चस्वेषुपुष्करस्तेयंशङ्कमानमगस्त्यंप्रतिप्रत्येकशोनानाशपथकरणं । पश्चादिन्द्रेणस्वस्वरूपप्रकाशनपूर्वकंस्वे-

अध्याय.	छपा.अ.	श्लोक.	
			नपुष्करापहारस्यऋष्यादिभ्योधर्मशुश्रूषाप्रयोजनकत्वनिवेदनेनतत्प्रसादनं ।
१४४	९५	२८	जमदग्निनारेणुकयासहबाणक्रीडा ।
१४५	९६	२२	छत्रोपानहोरुत्पत्तिः ।
१४६	+	६४	शूद्रधर्माणांमृत्तिकाशौचादीनांचनिरूपणं ।
१४७	+	३१	ब्राह्मणादिधर्मनिरूपणं । शूद्रस्ययतिशुश्रूषाप्रकारः ।
१४८	+	१४	यतिशुश्रूषाप्रशंसनं ।
१४९	+	२६	तथा ।
१५०	+	३७	पुरुषस्यमृतिसूचकलिङ्गैःस्वमरणनिश्चयेनभगवत्स्मरणादिपूर्वकंदेहत्यागेस्वर्गभोगप्रकारस्यसुकृतशेषेणपुनर्भूलोकेजननादेश्चकथनं ।
१५१	+	३५	पुरुषस्यपुण्यविशेषेणपुनःपुनःस्वर्गभूम्यादिषुपरिवर्तनेनजातवैराग्यस्यब्रह्मज्ञानेनापुनरावर्तिशाश्वतपदप्राप्त्यादिप्रकारप्रतिपादनं ।
१५२	+	३१	चातुर्वर्ण्यस्यश्रेयस्साधनोपायप्रतिपादकपराशरवचनानुवादः ।
१५३	+	१७	सकलसेव्यताप्रयोजकगुणप्रतिपादकेन्द्रमातलिसंवादः ।
१५४	९७	२६	गृहस्थधर्मप्रतिपादकपृथिवीवासुदेवसंवादानुवादः ।
१५५	९८	६६	पुष्पधूपदीपदानादिप्रशंसापरबलिशक्रसंवादः ।
१५६	९९	२९	बलिदीपप्रदानकथनोपयोगितयानहुषचरितारंभः । देवैर्वरदानपूर्वकमिन्द्रपदंप्रापितेननहुषेणदर्पात्सप्तर्ष्यादिभिःपर्यायेणस्वयानवाहनं । अगस्त्यस्यतद्यानवहनपर्यायेभृगुणाऽगस्त्यंप्रतिस्वेननहुषस्याधःपातनप्रतिज्ञानं ।
१५७	१००	३९	नहुषेणागस्त्यस्यस्वयानेयोजनं । तथातेनश्रुतिप्रामाण्यविवादेस्वविरुद्धभाषिणोऽगस्त्यस्यमस्तकेस्वपादेनताडनं। तदातज्जटान्तर्निगूढेनभृगुणाशापदानेनतस्याधःपातनं । ततोदेवैरिन्द्रस्यस्वपदेऽभिषेचनं नहुषस्यस्वकृतपूर्वबलिदीपदानादिजसुकृतमहिम्नापुनः स्वर्गप्राप्तिः ।
१५८	१०१	३३	ब्रह्मस्वापहारस्यानर्थहेतुतायांप्रमाणतयानृपचण्डालसंवादः ।
१५९	१०२	६३	पुण्यपापकर्मफलभेदस्यपुण्यकर्मणांचतरतमभावस्यचबोधनायतादृशकर्मविशेषसाध्यफलविशेषप्रतिपादकशक्रगौतमसंवादः ।
१६०	१०३	४६	विप्रवचनस्यैहिकपारत्रिकश्रेयस्साधनत्वं । अनशनस्यमहातपस्त्वं ।
१६१	१०४	१७३	आयुष्यानायुष्यकारणशुभाशुभकर्मप्रतिपादनं ।
१६२	१०५	१९	ज्येष्ठकनिष्ठयोःपरस्परस्मिन्वर्तनप्रकारादिकथनं ।
१६३	१०६	७०	पक्षोपवासमासोपवासफलप्रतिपादकाङ्गिरोवचनानुवादः ।
१६४	१०७	१३३	यज्ञप्रतिनिधिकर्माणि ।
१६५	+	४२	तत्वसृष्टिप्रतिपादकरुद्रसनत्कुमारसंवादः ।
१६६	+	४२	तत्वलयक्रमः ।
१६७	+	५१	देहावयवाश्रितदेवताकथनपूर्वकंयोगनिरूपणं ।
१६८	+	४५	अव्यक्तादितत्वानांतारतम्यकथनपूर्वकंतत्सृष्टलयादिकथनं । तथातज्ज्ञानस्यसंसारतारकत्वं ।
१६९	+	५५	मरणसूचकदुर्निमित्तानितत्परिहारोपायश्च । तथामरणपरिहारानिच्छोर्भगवद्ध्यानेनशरीरत्यागस्यपारत्रिकसुखसाधनत्वोक्तिः । तथाभगवज्ज्ञानप्रशंसनपूर्वकंतदुपदेशपरंपराकथनं ।
१७०	१०८	२१	तीर्थशौचनिरूपणं ।
१७१	१०९	१७	मार्गशीर्षादिकार्तिकान्तेषुद्वादशमासेषुद्वादशद्वादशीषुकेशवादिदामोदरान्तभगवद्रूपविशेषपूजाफलविशेषकथनं ।
१७२	११०	१०	शरीरसौन्दर्यादिफलकचान्द्रव्रतं ।
१७३	१११	१३३	बृहस्पतिनायुधिष्ठिरंप्रतिदेहिनांजननादिप्रकारनिरूपणं । प्राणिनांदुष्कर्मविशेषफलतयातिर्यग्योनिविशेषेषुजननं ।
१७४	११२	३५	पश्चात्तापादेर्ब्राह्मणेभ्योऽन्नदानस्यचपापपरिहारोपायत्वकथनं ।
१७५	११३	११	अहिंसाप्रशंसनं ।

अध्याय.	झपा.अ.	श्लोक.	
१७६	११४	२२	हिंसायामांसभक्षणस्यचगर्हणं ।
१७७	११५	८३	मांसभक्षणाभक्षणयोर्निन्दाप्रशंसने ।
१७८	११६	४४	मांसगुणकथनपूर्वकंतद्भक्षणगर्हणं । दयायाअहिंसायाश्चप्रशंसनं ।
१७९	११७	२९	कीटोपाख्यानं । कीटेनव्यासंप्रतिस्व-पूर्वजन्मवृत्तान्तकथनं ।
१८०	११८	२२	व्यासेनकीटायराज्यदानं ।
१८१	११९	१४	कीटेनराज्यपरिपालनं । तथाजन्मा-न्तरेब्राह्मण्यलाभेनतपश्चर्यादिनाब्रह्म-सालोक्याधिगमः ।
१८२	१२०	२८	विद्यातपोदानानांमध्येदानप्रशंसनप-रव्यासमैत्रेयसंवादानुवादः ।
१८३	१२१	१९	दानादिप्रशंसा ।
१८४	१२२	२३	विद्यातपोदानप्रशंसापरव्यासमैत्रेय-संवादः ।
१८५	१२३	२५	शाण्डलीसुमनासंवादः ।
१८६	+	२४	श्रीमन्नारायणमहिमप्रतिपादकनारद-पुण्डरीकसंवादानुवादपूर्वकंनारायण-स्यसर्वोत्कृष्टत्वेनवेद्यत्वोपास्यत्वकथनं।
१८७	१२४	४४	साम्नःसकलवशीकरणोपायत्वेदृष्टान्त-तयारक्षोब्राह्मणसंवादानुवादः ।
१८८	१२५	८०	श्राद्धविध्यादिप्रतिपादकपितृदेवदूता-दिसंवादः ।
१८९	१२६	४७	विष्णुनेन्द्रंप्रतिस्वप्रीतिकरधर्मकथनं । तथाबलदेवाग्निविश्वामित्रादिभिःपृथ-क्पृथग्धर्मविशेषकथनं ।
१९०	१२७	१९	सूर्यगार्ग्यादिभिःपृथक्पृथग्धर्मरह-स्यकथनं ।
१९१	१२८	१०	वायुनाधर्मरहस्यकथनं ।
१९२	१२९	१५	लोमशेनधर्मरहस्यकथनं ।
१९३	१३०	३८	अरुन्धतीचित्रगुप्तोदितधर्मरहस्यं ।
१९४	१३१	१२	प्रमथैर्ऋषिगणान्प्रतिप्रजानांस्वहिंसा-तदभावकारणाभिधानं ।
१९५	१३२	१७	दिग्गजगदितधर्माः ।
१९६	१३३	९	महेश्वरेणदेवादीन्प्रतिगोप्रशंसनं ।
१९७	१३४	१७	स्कन्देनदेवादीन्प्रतिधर्मविशेषकथनं।
१९८	१३५	२१	भोज्याभोज्यान्नकानांजनानांविवेचनं।
१९९	१३६	२५	अप्रतिग्राह्यप्रतिग्रहेअभोज्यभोजनेच प्रायश्चित्तं ।
२००	१३७	३२	दानप्रशंसनं ।

अध्याय.	झपा.अ.	श्लोक.	
२०१	१३८	११	दानस्यपञ्चविधत्वकथनपूर्वकंतल्लक्ष्य-प्रदर्शनं ।
२०२*	+	१५	युधिष्ठिरेणपुनर्धर्मकथनप्रार्थनं ।
२०३	+	३९	श्रीकृष्णेनपुत्रार्थंकैलासेतपश्चरणं । त-त्रश्रीकृष्णदर्शनायनारदादीनामागम-नं । श्रीकृष्णेनस्वमुखनिःसृताग्निना तत्पर्वतस्यभस्मीकरणं । तथापुनःप्र-सन्नदृष्ट्यागिरेरुज्जीवनं । तथानारदा-दीन्प्रतितत्कारणकथनं ।
२०४	+	२१	कृष्णेनाश्चर्यकथनंप्रार्थितैर्मुनिगणैर्ना-रदंप्रतितत्कथनचोदना ।
२०५	+		नारदेनश्रीकृष्णंप्रत्युमामहेश्वरसंवा-दानुवादः । पार्वत्याक्रीडार्थंमहादेव-नयनद्वयपिधानं । तदाजगतआन्ध्य-प्राप्तौदेवेनस्वललाटेतृतीयनेत्रसर्जनं। तत्तेजसानिर्दग्धेगिरौदेवीप्रार्थनया-देवेनपुनर्गिरेरुज्जीवनं ।
२०६	+	३६	ईश्वरेणपार्वतींप्रतिस्वस्यचतुर्मुखत्वस्य-नीलकण्ठतायाःपिनाककार्मुकतायावृ-षभवाहनत्वस्यचकारणाभिधानं ।
२०७	+	४३	तथाश्मशानवासचन्द्रकलाधारणादेः कारणाभिधानं ।
२०८	+	५६	ईश्वरेणपार्वतींप्रतिवर्णाश्रमधर्मकथनं।
२०९	+	४१	ऋषिधर्मकथनं ।
२१०	+	४४	ऋषीणांकर्मफलविशेषादिकथनं ।
२११	+	६०	निवृत्तिधर्मकथनं । गार्हस्थ्यधर्मकथ-नं ।
२१२	+	७२	महेश्वरेणपार्वतींप्रतिविस्तरेणराजध-र्मकथनं ।
२१३	+	५४	हिंसायादुस्त्यजत्वनिरूपणपूर्वकमहिं-साप्रशंसनं ।
२१४	+	६४	सदृष्टान्तप्रदर्शनंसर्वैर्विधैर्दुरतिक्रमत्व-निरूपणं । योधधर्मकथनपूर्वकंराज्ञां-योधानांचप्राणयज्ञप्रशंसनं ।
२१५	+	४५	राज्ञांमृगयायाधर्मत्वप्रतिपादनं । ब्रा-ह्मणानामदण्ड्यत्वकथनंसामान्येनरा-जधर्मकथनं ।
२१६	+	६६	त्रिवर्गनिरूपणं ।

* २०२ आरभ्य २५० पर्यन्तंविद्यमानानां ४९ अध्यायानां-स्थाने झ. पाठे १३९ आरभ्य १४६ पर्यन्ता ८ एव अध्यायाः एतदर्थैकदेशप्रतिपादकादृश्यन्तेनत्वेतदनुक्तार्थप्रतिपादकाः ।

अध्याय.	छपा.अ.	श्लोक.	
२१७	+	४७	ब्राह्मण्यस्यकर्माधीनत्वप्रतिपादनं । प्राणिनांभोगाभोगादेस्स्वस्वकर्मायत्तत्वप्रतिपादनं ।
२१८	+	४४	प्राणिनांशुभाशुभकर्मानुसारेणशुभाशुभफलप्राप्तिकथनं ।
२१९	+	३५	शुभाशुभकर्मणोःसुखदुःखहेतुत्वकथनं ।
२२०	+	५१	ईश्वरेणोमांप्रत्यन्धत्वपङ्गुत्वादिनानादोषकारणीभूतानांदुष्कर्मणांविशिष्यकथनं ।
२२१	+	३७	प्राणिनामङ्गविकृत्यनपत्यतादिदोषहेतुभूतदुष्कर्मप्रतिपादनं ।
२२२	+	३३	महेश्वरेणोमांप्रतिस्त्रीणांपुंश्चलीत्वादिदोषहेतुभूतदुष्कर्मकथनं । प्राणिसाधारण्येनदास्यादिप्रयोजकदुष्कर्मकथनं ।
२२३	+	७७	चण्डालत्वदरिद्रत्वादिप्रापकदुष्कर्माणि ।
२२४	+	११	मर्त्यानांशरीरभेदाभेदेनकर्मफलभोगोक्तिः ।
२२५	+	४१	शुभाशुभफलयोर्मध्येकस्यपूर्वोपभोगइतिप्रश्नेतयोर्यौगपद्येनोपभोगकथनं । अल्पायुष्ट्वदीर्घायुष्ट्वादिकारणकथनं ।
२२६	+	२१	स्त्रीत्वपुंस्त्वयोःस्वाभाविकत्वनिषेधेनकर्मायत्तत्वोक्तिः ।
२२७	+	४१	उद्भिदादिचतुर्विधानांप्राणिनांनिरूपणं । शास्त्रजन्यज्ञानस्यश्रेयस्साधनत्वं ।
२२८	+	६०	प्राणिनांफलनिष्पत्तौदैवपुरुषकारयोः परस्परसापेक्षत्वेनसाधनत्वं । अण्डजजरायुजानांगर्भप्रवेशप्रकारः ।
२२९	+	४१	यमनगरतन्मार्गप्रतिपादनपूर्वकंपापिनांयातनानुभवप्रकारः ।
२३०	+	४१	रौरवादिनरकेषुयातनानुभवप्रकारः । यातनानुभवानन्तरंकर्मशेषफलतयानानानीचयोनिप्राप्तिः ।
२३१	+	५१	शुभाशुभकर्मणांमानसिकत्वादिभेदेनत्रैविध्यं तत्तत्फलानिच । मद्योत्पत्तिकारणं तत्पानेदोषंच ।
२३२	+	४२	सुकृतस्यत्रेधाविभजनेनतल्लक्षणकथनं।
२३३	+	६५	मांसभक्षणाभक्षणयोर्दोषगुणकथनं । गुरुप्रशंसनपूर्वकंतत्पूजादिफलकथनं । तीर्थस्नानोपवासादिफलकथनं ।

अध्याय.	छपा.अ.	श्लोक.	
२३४	+	३६	दानस्यषाड्गुण्यप्रतिपादनपूर्वकंतत्फलकथनं ।
२३५	+	७८	अन्नस्वर्णगोभूकन्याविद्यादानानांमहिमप्रतिपादनं ।
२३६	+	३१	तिलदानप्रकारस्तत्फलंच । जलान्नादिनानादानफलकथनं ।
२३७	+	२६	यज्ञप्रशंसा । देवानांपूजादिफलं । देवानांमनुष्यचिन्तितविज्ञानसामर्थ्यकथनं ।
२३८	+	५२	श्राद्धविधिः ।
२३९	+		दानत्रैविध्यंतत्फलत्रैविध्यंच । दानफलस्यपञ्चविधत्वं । नानाधर्मास्तत्फलानिच ।
२४०	+	३०	भद्राश्वकेतुमालादिखण्डानांसुकृतिनां भोगस्थानत्वादिप्रतिपादनं ।
२४१	+	२१	प्राणिनांशुभाशुभत्वनिश्चायकलिङ्गकथनं ।
२४२	+	३२	मरणकालेकर्तव्यानि । शरीरत्यागप्रभेदास्तत्फलानिच । कामक्रोधादिनाशरीरत्यागेनरकः ।
२४३	+	४०	मोक्षधर्मस्यैवश्रैष्ठ्यप्रतिपादनं ज्ञानस्यमोक्षहेतुत्वंतत्प्राप्त्युपायश्च ।
२४४	+	७५	जरामरणतारणोपायः ।
२४५	+	६१	साङ्ख्यज्ञानप्रतिपादनपूर्वकमव्यक्तादिचतुर्विंशतितत्वानामुत्पत्तिप्रकारादिकथनं । सत्वादिगुणानांकार्यविशेषनिरूपणं । भूतपञ्चकादिगुणप्रतिपादनं ।
२४६	+	४७	योगनिरूपणं । तत्फलप्रतिपादनंच ।
२४७	+	३८	महेश्वरेणपार्वतींप्रतिस्वमाहात्म्यकथनपूर्वकंदीक्षयाशिवलिङ्गार्चनफलकथनं ।
२४८	+	३४	महेश्वरेणपार्वतींप्रतिस्त्रीधर्मकथनचोदना ।
२४९	+	२६	पार्वत्यापरमेश्वरंप्रतिदेवगन्धर्वादियोषितांमध्येस्त्रीधर्मकथनं ।
२५०	+	७१	स्त्रीधर्मकथनं । उमामहेश्वरसंवादोपसंहारः ।
२५१	१४७	६२	महेश्वरेणमुनिगणान्प्रतिश्रीकृष्णस्य वंशानुक्रमवर्णनपूर्वकंगुणानुवर्णनं ।
२५२	१४८	६६	श्रीकृष्णमहिमा । पार्थश्रीकृष्णयोर्नरनारायणात्मकत्वं ।

अध्याय.	छपा.अ.	श्लोक.	
२५३	+	११	विप्रकन्योपाख्यानं । विद्वत्संरक्षणस्य महाफलहेतुत्वं ।
२५४	१४९	४८	श्रीविष्णुसहस्रनामस्तोत्रं ।
२५५	१५१*	८	देवर्ष्यादीनांनामकीर्तनस्यसावित्र्यादिजपस्यचमहाफलहेतुत्वं ।
२५६	१५२	२३	ब्राह्मणमहिमप्रशंसनं ।
२५७	१५३	२८	ब्राह्मणमहिमप्रकाशनायकार्तवीर्यार्जुनकथा । कार्तवीर्येणस्वसाम्याभावकथनेअशरीरवाण्याब्राह्मणानामुत्कर्षकथनं । तेनदर्पात्तदवज्ञानेवायुनापि ब्राह्मणानामेवोत्कर्षेकथितेतेनवायुं प्रतितत्प्रकाशनप्रार्थना ।
२५८	१५४	१९	वायुनातंप्रत्यङ्गिरःप्रभृतिब्राह्मणचरित्रकथनं ।
२५९	१५५	३१	कश्यपचरित्रं । उचथ्योपाख्यानं । सोमेनभद्रायाःस्वकन्यायाउचथ्यायभार्यात्वेनप्रदानं । पूर्वमेवतांकामितवतावरुणेनविजनेतस्याअपहरणं । नारदात्तच्छ्रुतवतोचथ्येनकोपात्समुद्रेशोषितेभयाद्वरुणेनोचथ्यायपुनर्भद्राप्रत्यर्पणं ।
२६०	१५६	२६	वायुनाहैहयार्जुनंप्रतिस्वतेजसादैत्यहननरूपागस्त्यवसिष्ठचरित्रकीर्तनं ।
२६१	१५७	३४	अत्रिमहिमा । च्यवनमहिमोक्तिः ।
२६२	१५८	२७	देवानांप्रार्थनयाऽग्निसर्जनेनकपहननरूपब्राह्मणमहिमा ।
२६३	१५९	४६	युधिष्ठिरेणब्राह्मणमहिमानंपृष्टेनभीष्मेणतंप्रतिस्वस्यकुण्ठितेन्द्रियादिशक्तिकतयामुमूर्षानिवेदनपूर्वकंश्रीकृष्णात्तदवगमनचोदना । तथाश्रीकृष्णस्यनारायणात्मकत्वनिवेदनेनतन्महिमानुवर्णनं ।
२६४	१६०	५७	श्रीकृष्णेनयुधिष्ठिरंप्रतिस्वेनप्रद्युम्नंप्रत्युक्तदुर्वासश्चरित्रप्रतिपादनं ।
२६५	१६१	४४	दक्षाध्वरविध्वंसनंत्रिपुरदहनादिरुद्रमहिमा ।

* छ. पुस्तके १४९ तमाध्यायादनन्तरं १५० तमरूपाएकाध्यायसंख्यात्रुटितावर्तते ।

अध्याय.	छपा.अ.	श्लोक.	
२६६	१६२	२९	शिवमहिमा ।
२६७	१६३ (१-२६)	२६	धर्मप्रमाणनिरूपणं ।
२६८	१६३ (२७-६३)	४२	धार्मिकाधार्मिकाणांस्वर्गनरकप्राप्तिनिरूपणं ।
२६९	१६४	१५	सुकृतदुष्कृतयोःसुखदुःखकारणत्वं ।
२७०	१६५	१६	धर्मप्रशंसनं ।
२७१	१६६	१७	देवदेवर्षिगिरिनदीतीर्थक्षेत्रादीनांनामकीर्तनस्यमहाफलहेतुत्वं ।
२७२	१६७	१७	युधिष्ठिरायनिखिलधर्मोपदेशानन्तरं स्वावसानकालसामीप्यावगमेनभगवद्ध्यानायवाक्प्रसरणादुपरतेभीष्मेतंप्रतिव्यासेनयुधिष्ठिरस्यनगरगमनाभ्यनुज्ञानचोदना । युधिष्ठिरेणभीष्माभ्यनुज्ञयासहकृष्णादिभिर्हास्तिनपुरप्रवेशनं ।

समाप्तं दानधर्मपर्व ॥ १ ॥

अथ भीष्मस्वर्गारोहणपर्व ॥ २ ॥ अध्यायौ द्वौ ॥ २ ॥

(२७३-२७४) ॥ श्लोकाः ॥ ८७ ॥

अध्याय.	छपा.अ.	श्लोक.	
२७३	१६८	५२	युधिष्ठिरेणभीष्मसंस्कारोपयोगिसंभारप्रस्थापनपूर्वकंश्रीकृष्णधृतराष्ट्रादिभिःसहभीष्मसमीपंप्रत्यागमनं । युधिष्ठिरेणाभिवादनपूर्वकंश्रीकृष्णाद्यागमनंनिवेदितेनभीष्मेणस्वस्यश्रीकृष्णयाथात्म्यज्ञानप्रकाशनेनतत्प्रणामस्तुतिपूर्वकंव्यासकृष्णधृतराष्ट्रादिभ्यःस्वस्यप्राणोत्सर्गाभ्यनुज्ञानप्रार्थना ।
२७४	१६९	३५	भीष्मेणभगवद्ध्यानपूर्वकंस्वशरीरमूर्धमध्योद्भेदनेनतेजोज्वालादिरूपेणसर्वापरोक्षमाकाशप्रवेशनेनक्षणादन्तर्धानं । ततोधृतराष्ट्रयुधिष्ठिरादिभीराजवैभवेनचितारोपणेनविधिवदग्निनासमुद्दीपनं । ततोगङ्गामवगाह्यकृतोदकेषुयुधिष्ठिरादिषुमूर्तीभूयजलादुद्गत्यभीष्मंप्रतिसकरुणविलापेनशोचन्तींगङ्गांप्रतिश्रीकृष्णादिभिराश्वासनं।

समाप्तं भीष्मस्वर्गारोहणपर्व ॥ २ ॥ अनुशासनपर्व च संपूर्णम् ॥ १३ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC S

आश्वमेधिकपर्व ॥ १४ ॥

अत्रावान्तरपर्वाणि ॥ ३ ॥ अध्यायाः ॥ ११८ ॥ श्लोकाः ॥ ४५५५ ॥

अध्याय. छपा.अ. श्लोक.

अथाश्वमेधपर्व ॥ १ ॥ अध्यायाः ॥ १६ ॥

(१-१६) ॥ श्लोकाः ॥ ४४८ ॥

अध्याय.	छपा.अ.	श्लोक.	
१	१	२०	गङ्गायांभीष्मायोदकदानानन्तरंबन्धुशोकविषण्णंयुधिष्ठिरंप्रतिधृतराष्ट्रेणसमाश्वासनं । तथाविदुरवचनानादरेणस्वस्यैतादृशानर्थप्राप्तिकथनं ।
२	२	२२	धृतराष्ट्रेणसमाश्वासनेपितूष्णींतिष्ठतो युधिष्ठिरस्यकृष्णेनपरिसान्त्वनं । पुनर्भीष्मद्रोणकर्णमारणानुस्मरणविषादेनारण्यगमनायकृष्णानुज्ञानमाकाङ्क्षमाणस्ययुधिष्ठिरस्यव्यासेनपरिसान्त्वनं ।
३	३	२३	व्यासेनयुधिष्ठिरंप्रतिपुरुषकर्मणामीश्वरप्रेरणायत्ततयादोषानापादकत्वकथनपूर्वकंतदभ्युपगमेनापिपापापनोदायाश्वमेधादिविधानं । युधिष्ठिरेणस्वस्यतावद्द्रव्याभावनिवेदनेव्यासेनतंप्रतिहिमवतिगिरौविद्यमानमरुत्तयागावशिष्टद्रव्यानयनेनाश्वमेधकरणचोदना ।
४	४	२७	व्यासेनयुधिष्ठिरंप्रतिसंवर्तमरुत्तीयोपाख्यानकथनारंभः । मरुत्तेनराज्ञायज्ञारंभः ।
५	५	२८	अङ्गिरसःपुत्रेणसंवर्तेनस्वाग्रजन्मनोबृहस्पतेरुपद्रवासहनेनसर्वस्वत्यागपूर्वकमरण्यप्रवेशः । इन्द्रेणस्वातिशायिनिमरुत्तेराजनिस्पर्धयाबृहस्पतिसाचिव्येनततोप्यतिशयलिप्सयामरुत्तपुरोहितस्यबृहस्पतेर्भेदोपायेनवशीकरणं । बृहस्पतिनेन्द्रंप्रतिमरुत्तस्यस्वेनायाजनप्रतिज्ञानं ।
६	६	३३	बृहस्पतिंप्रतिमरुत्तेनस्वयाजनप्रार्थनेतत्प्रत्याख्यानं । ततःप्रतिनिवृत्तस्य मरुत्तस्यमध्येमार्गंनारदेनसमागमः । नारदचोदनयामरुत्तेनवाराणसीद्वारेस्वेनस्थापितकुणपावलोकनेनपलायमानंसंवर्तंप्रत्यनुगमनं । संवर्तेनतत्प्रतिनिवर्तनायपांसुकर्दमप्रक्षेपेप्यनिवर्तमानंतंमरुत्तमवलोक्यविजनेन्यग्रोधमूलेसमुपवेशः ।
७	७	२७	संवर्तमरुत्तसंवादः । संवर्तेनमरुत्तं प्रतियाजनप्रतिज्ञानं ।
८	८	४९	संवर्तचोदितेनमरुत्तेनहिमवद्गिरिसन्निहितमुञ्जवद्गिरेर्बहुसुवर्णाहरणं । तेनयागोपयोगिभाण्डनिर्माणं । इन्द्रेणबृहस्पतेस्समीपंप्रत्यागमनं ।
९	९	३७	बृहस्पतिनेन्द्रंप्रतिसंवर्तेनमरुत्तस्ययाजनकथनपूर्वकंतद्विघटनचोदना । अग्निनामरुत्तमेत्ययाजनायबृहस्पतिस्वीकरणरूपेन्द्रसंदेशकथनं । तथापुनरिन्द्रमेत्यमरुत्तेनस्वसन्देशापरिग्रहणनिवेदनं । तथेन्द्रेणपुनर्मरुत्तेस्वसन्देशनिवेदनचोदनेसंवर्ततपोभयात्तदनङ्गीकरणं ।
१०	१०	३७	इन्द्रेणमरुत्तयज्ञविघाताययज्ञवाटंप्रत्यागमनं । संवर्तेनेन्द्रादीनांसंस्तम्भनं । ततःसंवर्तानुवर्तिनेन्द्रेणहविर्ग्रहणं । व्यासेनैवंमरुत्तयज्ञप्रवृत्तिकथनपूर्वकंतच्छिष्टद्रव्याहरणेनाश्वमेधकरणविधानं ।
११	११	२०	श्रीकृष्णेनयुधिष्ठिरंप्रतीन्द्रवृत्रासुरयुद्धप्रकारकथनं ।
१२	१२	१७	श्रीकृष्णेनयुधिष्ठिरंप्रतिशारीरमानस-

अध्याय.	झपा.अ.	श्लोक.	
			भेदेनव्याधेर्द्वैविध्याभिधानपूर्वकंतत्प-रिहारोपायकथनं ।
१३	१३	२२	कामस्यदुर्जयत्वकथनपूर्वकंतज्जयोपा-यकथनं ।
१४	१४	१६	व्यासादिभिर्युधिष्ठिरंसमाश्वास्यान्त-र्धानं । युधिष्ठिरेणहास्तिननगरप्रवे-शः ।
१५	+	३१	युधिष्ठिरस्यप्रजापालनकालेप्रजादीना-मभ्युदयप्रकारवर्णनं ।
१६	१५	३५	हास्तिनपुरेश्रीकृष्णार्जुनविहारप्रकार-वर्णनं ।

समाप्तमश्वमेधपर्व ॥ १ ॥

अथानुगीतापर्व ॥ २ ॥ अध्यायाः ॥ ७९ ॥
(१७-९५) ॥ श्लोकाः ॥ २४६३ ॥

अध्याय.	झपा.अ.	श्लोक.	
१७	१६	४६	श्रीकृष्णेनार्जुनंप्रतिस्वस्यैब्राह्मणोक्त-सिद्धकाश्यपसंवादरूपानुगीतारंभः ।
१८	१७	४२	प्राणिनांजननमरणादिप्रतिपादनं ।
१९	१८	३६	जीवस्यगर्भप्रवेशः ।
२०	१९	२६	मोक्षसाधनकथनं ।
२१	२०	२८	भूतादिसृष्टिप्रतिपादकब्राह्मणदंपति-संवादः ।
२२	२१	२६	दशेन्द्रियगुणप्रतिपादनं ।
२३	२२	२९	पृथग्घ्राणादीन्द्रियगुणप्रतिपादनपूर्व-कंतेषांमनसासहविवादप्रतिपादकब्रा-ह्मणदंपतिसंवादः ।
२४	२३	२५	प्राणापानादीनांस्वस्वश्रैष्ठ्येविवादः ।
२५	२४	१९	सृष्ट्यादिप्रतिपादकनारददेवमतसं-वादः ।
२६	२५	१७	कर्तृकर्मादिप्रतिपादनं ।
२७	२६	१८	प्रजापतिनाएकेनैवशब्देनपरब्रह्मोप-देशेदेवासुरादीनांस्वस्वयोग्यतानुसा-रेणनानार्थावगमः ।
२८	२७	२५	विद्याब्रह्मणोःअरण्यत्वेननिरूपणं ।
२९	२८	२८	यागीयहिंसायाअधर्म्यत्वाभावः ।
३०	२९	२२	परशुरामचरित्रकथनारंभः । रामेण कार्तवीर्यहननं । तदनुयायिभिर्जम-दग्नेर्हननं । रामेणत्रिःसप्तकृत्वोनिः-क्षत्रियीकरणं ।
३१	३०	३२	अलर्कोपाख्यानं । रामेणहिंसातोनि-वृत्त्यतपश्चरणं ।
३२	३१	१३	अंबरीषगीता । कामक्रोधादिपरित्या-गस्यपरमपुरुषार्थसाधनत्वं ।
३३	३२	२६	ब्राह्मणजनकसंवादः । ममतावर्जन-स्यपरमपुरुषार्थसाधनत्वं ।
३४	३३	८	ब्राह्मणेनब्राह्मणींप्रतिस्वमाहात्म्यकथ-नं ।
३५	३४	१२	ब्राह्मणब्राह्मणीक्षेत्रज्ञशब्दार्थः ।
३६	३५	५१	श्रीकृष्णेनार्जुनंप्रतिपरब्रह्मस्वरूपतत्प्रा-प्तिसाधनादिप्रतिपादकगुरुशिष्यसंवा-दानुवादः ।
३७	३६	३६	ब्रह्मणामहर्षीन्प्रतितमोगुणकार्यनि-रूपणं ।
३८	३७	१८	रजोगुणकार्यनिरूपणं ।
३९	३८	१५	सत्वगुणकार्यनिरूपणं ।
४०	३९	२५	सत्वादिगुणत्रयनिरूपणं ।
४१	{ ४०, ४१ }	१८	महदहंकारतत्वनिरूपणं ।
४२	४२	६४	अहंकारतत्वाद्भूतादिसृष्टिः ।
४३	४३	४२	ब्रह्मणामहर्षीन्प्रतिमनुष्येषुक्षत्रिया-णांरजोगुणकार्यबलप्रधानतयातेषां-सत्वप्रधानब्राह्मणरक्षणस्यकर्तव्यत्व-कथनप्रसङ्गेनतत्तज्जातिश्रेष्ठवस्तुकथनं। अहिंसादिधर्मादिप्रतिपादनं ।
४४	४४	२२	स्वस्वजातिश्रेष्ठवस्तुप्रतिपादनपूर्वकंज्ञा-नस्याविनाशित्वकथनेनतस्यैवश्रेय-स्साधनत्वोक्तिः ।
४५	४५	२६	कालचक्रनिरूपणं । गृहस्थधर्मनिरू-पणं ।
४६	४६	५८	ब्रह्मचारिवानप्रस्थधर्मनिरूपणं ।
४७	४७	१७	संन्यासज्ञानतपसांपरमपुरुषार्थसाध-नत्वं ।
४८	४८	१३	योगिविभागः । मुमुक्षुवेद्यार्थकथनं ।
४९	४९	१७	महर्षिभिर्ब्रह्माणंप्रतिधर्मविषयेनाना-विधवादिविप्रतिपत्तिप्रदर्शनपूर्वकंत-त्प्रयुक्तस्वीयसंशयनिवर्तनप्रार्थना ।
५०	५०	५६	ब्रह्मणामहर्षीन्प्रतिधर्मप्रदर्शनपूर्वकं तदनुष्ठानसहकृतज्ञानस्यैवपरमपुरुषा-र्थसाधनत्वोक्तिः । तथाक्षेत्रक्षेत्रज्ञ-संबन्धकथनं । तथापृथिव्यादिभूत-गुणप्रतिपादनं ।
५१	५१	५४	श्रीकृष्णेनार्जुनंप्रतिमुक्त्युपायप्रतिपा-दकगुरुशिष्यसंवादानुवादसमापनपू-र्वकंस्वस्यनिजनगरजिगमिषानिवेदनं।

अध्याय.	झपा.अ.	श्लोक.	
			अर्जुनेनतंप्रतियुधिष्ठिराभ्यनुज्ञानसंपादनपूर्वकंगमनानुज्ञानं ।
५२	५२	५८	अनुगीतोपदेशानन्तरंश्रीकृष्णार्जुनाभ्यांहास्तिनपुरंप्रतिप्रस्थानं । तत्र मध्येमार्गमर्जुनेनश्रीकृष्णंप्रतिस्तुतिपूर्वकंव्यासनारदादिभ्यःस्वस्यश्रीकृष्णयाथात्म्यावगतिनिवेदनं । ततःश्रीकृष्णेनसहार्जुनेनहास्तिनपुरमेत्यधृतराष्ट्रादिभ्यःपादाभिवादनं । ततोयुधिष्ठिरानुमत्यासुभद्रामानीयद्वारकां प्रतिप्रस्थानं ।
५३	५३	२६	कुरुपुराद्वारकांगच्छताश्रीकृष्णेनमध्येमार्गमुदङ्केनसहसंवादः । कौरवादिविनाशेस्वोपेक्षायाहेतुत्वधियाशापदानोद्यतोदङ्कपरिसान्त्वनायतंप्रतितत्वकथनोपक्रमः ।
५४	५४	२५	श्रीकृष्णेनोदङ्कंप्रतिस्वमाहात्म्यप्रकाशनपूर्वकंकुरूणांस्ववचनातिक्रमणादिरूपस्वापराधेनैवनिधनोक्तिः ।
५५	५५	४१	श्रीकृष्णेनोदङ्कायविश्वरूपप्रदर्शनपूर्वकंपिपासाकालेजललाभरूपवरदानं । श्रीकृष्णेनोदङ्कायामृतदानंचोदितेनेन्द्रेणकदाचिद्वनमध्येपिपासुमुदङ्कंप्रतिचण्डालवेषेणजलस्वीकारप्रार्थनेउदङ्केनचण्डालबुध्यातदधिक्षेपः । पश्चात्तस्यतिरोधानेनपरितप्यन्तमुदङ्कंप्रति तत्रसंनिहितेनश्रीकृष्णेनेन्द्रकृतवञ्चनानिवेदनपूर्वकंमरुप्रदेशेजललाभरूपवरदानं ।
५६	५६	३४	उदङ्कोपाख्यानकथनारंभः । उदङ्ककृतपरिचर्यातुष्टेनगौतमेनतस्मैप्रीत्यतिशयेनचिरादपिगृहगमनायानभ्यनुज्ञानं । कदाचनगुरुशासनेनकाष्ठभारमाहृतवतोदङ्केनकाष्ठलग्नजरापलितनिजकेशावलोकनेनपरिदेवनं । ततस्तदवबोधितनिजरोदनहेतुनागुरुणातस्मैनिजतनयाप्रतिपादनं । ततस्तेन गुरुपत्नीनिदेशेनकुण्डलयाचनायसौदासंप्रतिगमनं ।
५७	५७	२८	शापाद्राक्षसत्वंगतेनसौदासेनोदङ्कभक्षणोद्यमेउदङ्केनपुनःप्रत्यागमनप्रतिज्ञापूर्वकंतंप्रतिकुण्डलयाचनं । उदङ्केनसौदासवचसातत्पत्नींप्रतिकुण्डलयाचनेतयातंप्रतिमणिकुण्डलमहिमादिकथनपूर्वकंराजाभिज्ञानानयनचोदना।
५८	५८	६०	उदङ्केनाभिज्ञाननिवेदनेनमदयन्तीतः कुण्डलग्रहणपूर्वकंप्रतिनिवर्तनं । मध्येमार्गंक्षुधाविष्टेनतेनबिल्वतरुमारुह्यशाखायांकुण्डलासञ्जनपूर्वकंफलपातनायशाखाचालनं । तत्रपतत्फलघट्टनेनकुण्डलयोरधःपतनेकेनचिदुरगवरेणतदपहृत्यनागलोकगमनं । इन्द्रादिसाहाय्येननागलोकंगतेनोदङ्केन सर्पेभ्य कुण्डलानयनं । तथागुरुपत्न्यैकुण्डलदानं । उदङ्कोपाख्यानोपसंहारः ।
५९	५९	२४	उदङ्कायवरदानात्परंद्वारकामागच्छताश्रीकृष्णेनमध्येरैवतकप्रवेशः । रैवतकोत्सववर्णनं । ततःश्रीकृष्णेनस्वभवनगमनं ।
६०	६०	३६	श्रीकृष्णेनवसुदेवादीन्प्रतिकुरुपाण्डवयुद्धप्रकारकथनं ।
६१	६१	४१	श्रीकृष्णेनवसुदेवंप्रत्यभिमन्युनिधनाकथनेसुभद्रयातंप्रतितत्कथनचोदनापूर्वकंशोकान्मोहावेशेनभुविनिपतनं । ततःश्रीकृष्णेनवसुदेवपरिसान्त्वनं ।
६२	६२	२०	वसुदेवादिभिरभिमन्यवेश्राद्धदानं । व्यासेनहास्तिनपुरमेत्यउत्तरादिपरिसान्त्वनपूर्वकंयुधिष्ठिरंप्रत्यश्वमेधकरणसंचोदनेनपुनरन्तर्धानं ।
६३	६३	३१	युधिष्ठिरेणव्यासाज्ञयाभीमादिभिःसहालोच्ययज्ञार्थंधनाहरणायहिमवत्पार्श्वंप्रतिप्रस्थानं ।
६४	६४	१७	युधिष्ठिरेणहिमवद्गिरिमेत्यतत्रब्राह्मणचोदनयाउपवासादिव्रताचरणं ।
६५	६५	२२	युधिष्ठिरेणत्र्यंबकंपरितोष्यविविधकनकभाण्डाहरणेननगरंप्रत्यागमनं ।
६६	६६	२९	श्रीकृष्णेनबलभद्रसुभद्रादिभिःसहयज्ञार्थंहास्तिनपुरंप्रत्यागमनं । ततःपरीक्षितोजननं । अश्वत्थामास्त्रेणजननकालएवशवभूतस्यतस्योज्जीवनाय कुन्त्यादिभिःश्रीकृष्णंप्रतिप्रार्थना ।

अध्याय.	झपा.अ.	श्लोक.	
६७	६७	१९	सुभद्रयाश्रीकृष्णंप्रतितन्महिमसंस्तवनपूर्वकंपरीक्षिदुज्जीवनप्रार्थना ।
६८	६८	२४	श्रीकृष्णेनपरीक्षित्सूतिकागृहप्रवेशः । तत्रोत्तरयाश्रीकृष्णसमीपेबहुधाविलापपूर्वकंपुत्रोज्जीवनप्रार्थना ।
६९	६९	२६	श्रीकृष्णेनसशपथंसंस्पर्शनेनपरीक्षितःसमुज्जीवनं ।
७०	७०	२४	श्रीकृष्णेनाभिमन्युसुतस्यपरीक्षिदितिनामकरणं । अत्रान्तरेयुधिष्ठिरादीनांस्वर्णभारानयनेनहास्तिनपुरंप्रत्यागमनश्रवणेनश्रीकृष्णादिभिस्तत्प्रत्युद्यानं ।
७१	७१	२६	युधिष्ठिरादिभिःपुरप्रवेशः । व्यासेनाश्वमेधकरणविधानं । युधिष्ठिरेणाश्वमेधेस्वयंदीक्षास्वीकारंप्रार्थितेनश्रीकृष्णेनसहेतुकथनंतंप्रत्येवदीक्षास्वीकारविधानं ।
७२	७२	२६	व्यासेनयुधिष्ठिरंप्रतिपृथिवीसंचाराय मेध्याश्वोत्सर्जनचोदना । तथाऽश्वरक्षणेऽर्जुनस्यनियोजनं ।
७३	७३	२७	अर्जुनेनप्रथममुत्तरदिशंप्रत्यश्वरक्षणायगमनं ।
७४	७४	३५	अर्जुनेनत्रैगर्तानांपराजयः ।
७५	७५	२०	अर्जुनेनप्राग्ज्योतिषपुरमेत्याश्वरक्षणायभगदत्तसुतेनयज्ञदत्तेनसहायोधनं ।
७६	७६	२६	अर्जुनेनयज्ञदत्तपराजयः ।
७७	७७	३३	सिन्धुदेशंगतेनार्जुनेनसैन्धवैःसहायोधनं । तत्रपराजितस्यार्जुनस्यदेवर्ष्यादिभिस्तेजसउद्दीपनं ।
७८	७८	४७	अर्जुनसमागमनश्रवणमात्रेणजयद्रथसुतेमृतेदुःशलयामृतंसुतमादायार्जुनसमीपगमनं । अर्जुनेनदुःशलाप्रार्थनयातस्यांबहुमानेनयुद्धादुपरमः ।
७९	७९	३९	अर्जुनेनमणलूरपुरंप्रतिगमनं । तत्रपितृभक्त्याविनयेनागतंचित्राङ्गदायांजातंस्वात्मजंबभ्रुवाहनंप्रतिक्षत्रधर्मपरित्यागजरोषादुपालंभः । तमसहमानयोलूप्यानागलोकादेत्यबभ्रुवाहनस्यार्जुनेनसहयुद्धप्रोत्साहनं । बभ्रुवाहनेनस्वशरगाढाभिघातेननिपतितेपार्थेपितृमारणशोकेनमोहाधिगमः । ततश्चित्राङ्गदयारणाङ्गणमेत्यविलापः ।
८०	८० (१-४०)	४०	चित्राङ्गदायामोहाधिगमः । पुनःसंज्ञांप्राप्तयाचित्राङ्गदयाउलूपींप्रत्युपालम्भः । ततश्चिराल्लब्धसंज्ञेनबभ्रुवाहनेनात्मोपालंभपूर्वकंप्रायोपवेशनं ।
८१	८० (४१-६१)	२१	उलूप्यासंजीवनमणिनाऽर्जुनस्यसमुद्बोधनं । उत्थितेनार्जुनेनबभ्रुवाहनंप्रतिचित्राङ्गदादीनांरणाङ्गणागमनकारणप्रश्नेतेनतंप्रत्युलूपींप्रतिप्रश्नकरणचोदना ।
८२	८१	३१	उलूप्याऽर्जुनंप्रतिचित्राङ्गदादीनामागमनकारणकथनं । तथाबभ्रुवाहनेनतस्यपराजयेविस्तरेणहेतुकथनं ।
८३	८२	३१	अर्जुनेनाश्वानुसरणवशान्मगधदेशगमनं । तेनतत्रजरासन्धपौत्रस्यमेघसन्धेःपराजयः ।
८४	८३	१९	दक्षिणांदिशमुपगतवताऽर्जुनेनचेदीशितुःशिशुपालात्मजस्यपूजापरिग्रहणं । तथाकाशिकोसलादिदेशपराजयपूर्वकंगान्धारदेशगमनं ।
८५	८४	२४	अर्जुनेनशकुनितनयपराजयपूर्वकंतत्सेनावमर्दनं । ततःशकुनिभार्यया तेनस्वसुतवधसंभावनयारणाङ्गणमेत्यार्जुनस्यप्रसादनं । अर्जुनेनगान्धारीगौरवात्तत्संमाननपूर्वकंतत्तनयसमाश्वासनं ।
८६	८५	४२	यज्ञीयाश्वेनसहार्जुनस्यपुरंप्रतिप्रतिनिवृत्तिः । भीमेनयज्ञशालादिनिर्मापणं । तथानानादेशेभ्योब्राह्मणाद्यानयनपूर्वकंतेषामन्नदानादिव्यवस्थाकरणं ।
८७	८६	२१	श्रीकृष्णेनहास्तिनपुरंप्रत्यागमनं ।
८८	८७	२५	युधिष्ठिरेणार्जुनस्यैवविशेषतोऽध्वसंचारादिपरिक्लेशसूचकशारीरलक्षणप्रश्नेश्रीकृष्णेनतंप्रतितत्कथनं । साश्वस्यार्जुनस्यस्वपुरंप्रत्यागमनं ।
८९	८८	४२	बभ्रुवाहनेनोलूपीचित्राङ्गदाभ्यांसहयागदिदृक्षयाहास्तिनपुरंप्रत्यागमनं । व्यासाज्ञयाऽश्वमेधोपक्रमः ।
९०	८९	४४	युधिष्ठिरेणाश्वमेधयज्ञकरणं । तथाराज्ञांयथोचितंसंमाननपूर्वकंस्वस्वदेशान्प्रतिप्रस्थापनं ।

अध्याय.	झपा.अ.	श्लोक.	
९१	९० (१-२२)	२२	नकुलाख्यानारंभः । अश्वमेधावसानेबिलान्निःसृतेनकनकपार्श्वेनकेनचिन्नकुलेनसदस्यान्प्रत्युञ्छवृत्तिब्राह्मणस्य सक्तुप्रस्थदानप्रशंसनपूर्वकंयुधिष्ठिराश्वमेधगर्हणं । तथासदस्यचोदनया तत्कथनोपक्रमः ।
९२	९० (२३-१२०)	९८	नकुलेनयुधिष्ठिरादीन्प्रतिसकुटुंबस्योञ्छवृत्तेर्ब्राह्मणस्यधर्मपुरुषायसक्तुप्रस्थदानमहिमवर्णनपूर्वकंपुनस्तत्रैवान्तर्धानं ।
९३	९१	३६	जनमेजयेननकुलकृतयज्ञनिन्दाकारणंपृष्टेनवैशंपायनेनतंप्रतिसत्यदानतपोभिरेवस्वर्गादिसिद्धौपशुहिंसाहेतुयज्ञस्यनातिप्रशस्ततरत्वमितिनकुलाभिप्रायवर्णनं ।
९४	९२ (१-३८)	३८	पशुहिंसांविनैवध्यानदानादिभिरेवयज्ञफलसंसिद्धौदृष्टान्ततयाऽगस्त्ययज्ञप्रकारकथनं ।
९५	९२ (३९-५३)	१५	वैशंपायनेनजनमेजयंप्रतिनकुलस्यनिजस्वरूपकथनपूर्वकंतस्यनकुलत्वप्राप्तिविमोक्षकारणाभिधानं ।

समाप्तमनुगीतापर्व ॥ २ ॥

***अथ वैष्णवधर्मपर्व ॥ ३ ॥** अध्यायाः ॥ २३ ॥

(९६-११८) ॥ श्लोकाः ॥ १६४४ ॥

अध्याय.	झपा.अ.	श्लोक.	
९६	+	७३	युधिष्ठिरेणश्रीकृष्णंप्रतिवैष्णवधर्मप्रशंसनपूर्वकंतत्कथनप्रार्थना । वसिष्ठादिभिस्तच्छुश्रूषयातत्समीपोपसर्पणं । श्रीकृष्णेनयुधिष्ठिरादीन्प्रतिवैष्णवधर्मप्रशंसनपूर्वकंस्वमहिमानुबोधनं ।
९७	+	४६	श्रीकृष्णेनयुधिष्ठिरंप्रतिचातुर्वर्ण्यधर्मनिरूपणं ।
९८	+	९९	जन्मदानजीवितानांवैयर्थ्यापादकधर्मनिरूपणं । तथादानानांसात्विकत्वादिकथनपूर्वकंतत्तत्फलानांत्रैविध्यादिप्रतिपादनं । दानपात्रनिरूपणं । ब्राह्मणमहिमानुवर्णनं ।
९९	+	६१	बीजयोन्योःशुद्ध्यशुद्धिनिरूपणं । गायत्रीमहिमा । ब्राह्मणमहिमा । ब्राह्मणावमन्तॄणांनारकयातनानुवर्णनं ।
१००	+	१२२	सुकृतिदुष्कृतिजनप्राप्यवैवस्वतपुरमार्गादिप्रतिपादनपूर्वकंतेषांतद्गमनप्रकारवर्णनं ।
१०१	+	९०	जलदानान्नदानफलं । अतिथिलक्षणंतत्पूजाफलंच ।
१०२	+	८४	भूगोतिलकन्यादानफलं ।
१०३	+	१२५	वृषभगृहशय्यादिदानप्रशंसा । गोब्राह्मणरक्षणादिनानाधर्मकथनं ।
१०४	+	११५	पञ्चमहायज्ञनिरूपणं । स्नानविधिः वैष्णवलक्षणाभिधानं । श्रीकृष्णपूजायोग्यायोग्यपुष्पविवेचनं ।
१०५	+	८३	कपिलाप्रभेदकथनं । तद्दानप्रशंसा ।
१०६	+	१०९	कपिलादानप्रशंसा । कपिलासृष्टिः । रुद्रादिदेवैःकपिलायैवरदानं । देवर्ष्यादिभिःस्वनिवासायकपिलावयवसमाश्रयणं । हव्यकव्यदानकालनिरूपणं । श्राद्धार्हानर्हब्राह्मणाः । स्वर्गनरकप्रापकसुकृतदुष्कृतकथनं ।
१०७	+	३८	ब्रह्महत्यासदृशपापानि । अभोज्यान्नानांपापिनांलक्षणं ।
१०८	+	४९	यत्याग्निमहिमा । दानपात्राणिब्राह्मणाः । अन्नदानप्रशंसा ।
१०९	+	३९	भोजनविधिः । गोग्रासदानं । तिलप्रशंसनं । यन्त्रेतिलनिपीडनस्येक्षुनिपीडनस्यचब्राह्मणेनाकर्तव्यत्वकथनं ।
११०	+	६५	आपद्धर्मकथनं । प्रशस्ताप्रशस्तब्राह्मणाः । ब्राह्मण्यसिद्धिप्रकाराः । गुर्वाचार्योपाध्यायलक्षणं ।
१११	+	१०१	अग्निसृष्टिप्रकारः । आहवनीयादिनामनिर्वचनं । यज्ञाग्निहोत्रप्रशंसनं ।
११२	+	४९	चान्द्रायणविधिनिरूपणं । तदाचरणफलंच ।

* अत्र मुद्रितमिदं त्रयोविंशत्यध्यायात्मकं वैष्णवधर्मपर्व दाक्षिणात्यकोशेष्वेव वर्तते । अवश्यं वर्तितव्यं चैवानेन । अपरार्के चतुर्वर्गचिन्तामणिप्रभृतिधर्मशास्त्रनिबन्धनग्रन्थकारैस्तत्रतत्र श्लोकार्थे प्रमाणतया "तथा चोक्तमाश्वमेधिकेपर्वणि" इति प्रतिज्ञायोदाहृतानां श्लोकानामत्रैव दृश्यमानत्वात् । अन्यथा तेषां वचनानां निर्मूलत्वापातात् । किंच विनैतत्पर्व कथाविच्छेदोपि न विदुषां हृदयङ्गमः । औत्तराहपाठे एतदमुद्रणस्य कारणंतु नज्ञायते ।

अध्याय.	झपा.अ.	श्लोक.	
११३	+	५४	कार्तिकादिद्वादशमासेष्वेकभुक्तव्रताचरणप्रकारनिरूपणपूर्वकंतत्फलकथनं ।
११४	+	५२	केशवादिभगवन्मूर्त्युपास्तिपूर्वकंमार्गशीर्षादिद्वादशद्वादशीव्रताचरणफलं । युधिष्ठिरेणविस्तरेणश्रीकृष्णस्तवनं।श्रीकृष्णेनयुधिष्ठिरायएकादश्युपवासपूर्वकंद्वादश्यांभगवत्पूजायाःफलकथनं ।
११५	+	६९	विषुवाख्यपुण्यकालमहिमा । गायत्रीजपमाहात्म्यं अश्वत्थमाहात्म्यं । शिशुमाराकृतिनिरूपणं । पञ्चगव्यविधानं ।
११६	+	३१	श्रीकृष्णेनयुधिष्ठिरंप्रतिभगवद्भक्तिसौशील्याद्यभावेब्राह्मणानामप्यग्निहोत्रस्वाध्यायादिकर्मणांवैफल्यस्यशूद्राणामपिभक्त्यादिमतांस्वोचितकिंचित्कर्मणामपिसाफल्यस्यचकथनं ।
११७	+	१४	अश्वत्थगोब्राह्मणमहिमप्रशंसनपूर्वकंब्राह्मण्यभ्रंशकदुष्कर्मकथनं ।
११८	+	६८	श्रीकृष्णेनयुधिष्ठिरंप्रतिपालाशविधिप्रकारकथनं । तीर्थाटनासमर्थानांतत्प्रतिनिधितीर्थानुवर्णनं । भगवद्भक्तलक्षणं तत्प्रशंस च । स्वस्यसर्वोत्तमत्वकथनं । स्वोक्तधर्मश्रवणस्यफलकथनं । ततोयुधिष्ठिरायामन्त्रणपूर्वकंद्वारकांप्रतिगमनं ।

समाप्तं वैष्णवधर्मपर्व ॥ ३ ॥

आश्वमेधिकपर्व च संपूर्णं ॥ १४ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

आश्रमवासिकपर्व ॥ १५ ॥

अत्रावान्तरपर्वाणि ॥ ३ ॥ अध्यायाः ॥ ४१ ॥ श्लोकाः ॥ १०९८ ॥

अथाश्रमवासपर्व ॥ १ ॥ अध्यायाः ॥ ३० ॥

(१–३०) श्लोकाः ॥ ७५६ ॥

अध्याय.	छपा.अ.	श्लोक.	
१	१	२७	युधिष्ठिरेणराज्यपरिपालनं । कुन्तीद्रौपद्यादिभिर्गान्धार्याश्वश्रूवद्वर्तनं । भीमवर्जमर्जुनादिभिर्युधिष्ठिरशासनेनविशेषतोधृतराष्ट्रानुवर्तनं ।
२	२	३०	युधिष्ठिरेणधृतराष्ट्रपरितोषणं ।
३	३ (१–४०)	४०	भीमसेनपरुषभाषणश्रवणान्निर्विण्णेन धृतराष्ट्रेणगान्धार्यासहवनगमनाध्यवसायः । तेनसकलपौरानानाय्यतेषु स्वाध्यवसायनिवेदनं ।
४	३ (४१–८७)	४७	धृतराष्ट्रेणयुधिष्ठिरंप्रतिस्वस्यवनगमनाभ्यनुज्ञानप्रार्थना । युधिष्ठिरेणतत्प्रतिषेधनेतत्रव्यासागमनं ।
५	४	२२	व्यासेनयुधिष्ठिरंप्रतिसहेतूपन्यासंधृतराष्ट्रस्यवनगमनाभ्यनुज्ञानचोदनापूर्वकंस्वाश्रमगमनं । युधिष्ठिरेणधृतराष्ट्रं प्रतिकृच्छ्रेणतदभ्यनुज्ञानाङ्गीकरणं ।
६	५	४७	वनंयियासुनाधृतराष्ट्रेणयुधिष्ठिरायराजनीत्युपदेशः ।
७	६	२०	तथा ।
८	७	२३	तथा ।
९	८	२४	धृतराष्ट्रेणसकलपौरानानाय्यतान्प्रति स्वस्यवनगमनाभ्यनुज्ञानप्रार्थना ।
१०	९	१९	धृतराष्ट्रेणपौरान्प्रतिदुर्योधनपक्षपातेनस्वकृतापनयक्षमापणं । तथायुधिष्ठिरस्यतेषुन्यासतयासमर्पणपूर्वकंस्व स्यवनगमनाभ्यनुज्ञानप्रार्थना ।
११	१०	५३	पौरजनैर्ब्राह्मणमुखेनधृतराष्ट्रंप्रतिसमाश्वासनपूर्वकंकृच्छ्रेणवनगमनाभ्यनुज्ञानं ।
१२	११	२४	धृतराष्ट्रेणभीष्मदुर्योधनादीनांश्राद्धदानायविदुरमुखाद्युधिष्ठिरंप्रतिद्रव्ययाचनं। तद्दानेविमनायमानेनभीमेनधृतराष्ट्रापनयानुस्मारणपूर्वकंतत्प्रतिषेधनं ।
१३	१२	१३	भीमेदुर्योधनादिभ्यःश्राद्धदानायधनदानमरोचयतिसतियुधिष्ठिरेणविदुरं प्रतिधृतराष्ट्रेनिजगृहकोशाद्धनदाननिवेदनकथनं ।
१४	१३	१५	विदुरेणधृतराष्ट्रंप्रतियुधिष्ठिरेणभीष्मादीनांश्राद्धदानायधनदानाङ्गीकरणनिवेदनं ।
१५	१४	१८	धृतराष्ट्रेणभीष्मदुर्योधनाद्युद्देश्यकश्राद्धेधनवस्त्रान्नादिनाब्राह्मणादिसंतर्पणं ।
१६	१५	१३	धृतराष्ट्रेणकुन्तीस्कन्धावसक्तहस्ताया गान्धार्याअंसावलंबनेनसशोकैःपौरैर्युधिष्ठिरादिभिश्चानुगम्यमानेनसतावनं प्रतिप्रस्थानं ।
१७	१६	३२	धृतराष्ट्रेणसहविदुरसंजयाभ्यामपिवनवासायप्रस्थानं । कुन्त्याऽपिगान्धार्यासहवनंप्रतिप्रस्थानं ।
१८	१७	२१	कुन्त्यास्वस्यवनगमनंप्रतिविषीदतोयुधिष्ठिरान्प्रतिसमाश्वासनं ।
१९	१८	२४	युधिष्ठिरादिभिःकृच्छ्रात्पुरंप्रत्यागमनं। धृतराष्ट्रेणविदुरादिभिःसहवनमेत्यगङ्गातीरेसन्ध्योपास्त्यादिनारात्रियापनं।
२०	१९	१८	धृतराष्ट्रेणगङ्गातीरात्कुरुक्षेत्रमेत्यतत्रशतयूपाश्रमेव्यासाज्ञयातीव्रतपश्चरणं।

अध्याय.	छपा.अ.	श्लोक.	
२१	२० / १-२२	२२	तत्रनारदादीनामागमनं । नारदेन धृतराष्ट्रंप्रतितत्तपोवनस्थसहस्रचित्यादिराजर्षीणांस्वर्गप्रापकत्वमहिमोक्तिपूर्वकंविदुरादिभिःसहतस्यापिभविष्यत्सिद्धिप्रदत्वकथनं ।
२२	२० / २३-३८	१६	शतयूपपृष्टेननारदेनतंप्रतिधृतराष्ट्रस्य वर्षत्रयादूर्ध्वंगान्धार्यासहकुबेरलोकप्राप्तिकथनं ।
२३	२१	१६	युधिष्ठिरादिभिःकुन्तीधृतराष्ट्रादीनांप्रव्रजनशोकेनाभिमन्युप्रभृतिबन्धुजनानुस्मरणजशोकेनचस्वस्वव्यापारेष्वनादरणं ।
२४	२२	२६	युधिष्ठिरेणवनस्थकुन्तीधृतराष्ट्रादिदिदृक्षयाद्रौपद्यादिभिःपौरैर्भ्रातृभिश्चवनं प्रतिप्रस्थानं ।
२५	२३	१८	युधिष्ठिरेणनानायानारूढैःपौरैर्भ्रातृभिश्चसहधृतराष्ट्रादिदिदृक्षयाशतयूपाश्रमवनप्रवेशः ।
२६	२४	२०	युधिष्ठिरादिभिर्धृतराष्ट्रादीनुपेत्यपादाभिवादनं । धृतराष्ट्रेणस्वावस्थादर्शनेनशोचतांतेषांसमाश्वासनं ।
२७	२५	१९	संजयेनतापसान्प्रतियुधिष्ठिरादीनां द्रौपद्यादिस्त्रीणांचाङ्गुलिनिर्देशेननामनिर्देशः ।
२८	२६	३८	धृतराष्ट्रयुधिष्ठिराभ्यांपरस्परकुशलप्रश्नादिपूर्वकंसँल्लापः । युधिष्ठिरेणधृतराष्ट्रंप्रतिविदुरःक्वेतिप्रश्नेतत्रत्येनकेनचिद्यदृच्छयाधृतराष्ट्रमुपसर्पतोजनावलोकनेनप्रतिनिवर्तमानस्यचतस्यप्रदर्शनं । ततोयुधिष्ठिरेणानुधाव्यतत्समीपगमनं । ततोविदुरेणयोगात्स्वशरीरत्यागेनतच्छरीरप्रवेशः । युधिष्ठिरेणधृतराष्ट्रादिषुतदद्भुतनिवेदनं ।
२९	२७	२६	युधिष्ठिरेणधृतराष्ट्राभ्यनुज्ञयाभ्रात्रादिभिःसहमहर्षीणामाश्रमदर्शनं । शतयूपादिभिः सशिष्येणव्यासेनच युधिष्ठिरादिभिःपरिवृतस्यधृतराष्ट्रस्याश्रमंप्रत्यागमनं ।
३०	२८	२५	व्यासेनधृतराष्ट्रंप्रतिकुशलप्रश्नपूर्वकंविदुरस्यनिजस्वरूपादिप्रतिपादनं । तथाइतरमहर्षिदुष्करतदभीष्टाश्चर्यैकमेकरणप्रतिज्ञानं ।

समाप्तमाश्रमवासपर्व ॥ १ ॥

अथपुत्रदर्शनपर्व ॥ २ ॥ अध्यायाः ॥ ८ ॥

(३१-३८) ॥ श्लोकाः ॥ २४९ ॥

अध्याय.	छपा.अ.	श्लोक.	
३१	२९	५६	धृतराष्ट्राश्रमेभ्रात्रादिभिःसैन्येनचसहमासमेकंनिवसतियुधिष्ठिरेकदाचनव्यासधृतराष्ट्रौपरिवार्यनारदादिभिर्गान्धार्यादिभिःपाण्डवैश्चसमुपवेशनं । तत्रगान्धार्याव्यासंप्रतिधृतराष्ट्रस्यपुत्रदिदृक्षानिवेदनेव्यासेनकुन्तींप्रतितदभीष्टनिवेदनचोदना ।
३२	३०	२४	कुन्त्याव्यासंप्रतिस्वस्मिन्दुर्वाससःप्रसादेनसूर्यात्कर्णस्योत्पत्तिकथनपूर्वकंस्वस्यतद्दिदृक्षानिवेदनं । व्यासेनकुन्तींप्रतिहेतूपन्यासेनतत्प्रयुक्तदोषशङ्कानिरसनं ।
३३	३१	२५	व्यासेनगान्धारींप्रतिसमरहतानांदुर्योधनादीनांसर्वेषांरात्रौप्रदर्शनप्रतिज्ञानपूर्वकंधृतराष्ट्रादीनांविशिष्यगन्धर्वांशत्वकथनं । धृतराष्ट्रादिभिर्व्यासवचनाद्गङ्गातीरमेत्यबन्धुदर्शनौत्कण्ठ्येनकृच्छ्रादहर्यापनं ।
३४	३२	२१	व्यासेननिशायांगङ्गाजलावगाहनेनसमाह्वानेपुरासमरनिहतैःकुरुपाण्डवोभयपक्षीयैःसर्वैःस्वस्वाभरणायुधवाहनादिभिःसहसलिलादुद्गम्यतीरोत्तरणं। धृतराष्ट्रेणव्यासप्रसादलब्धदिव्यचक्षुषादुर्योधनादीनांसर्वेषामवलोकनं ।
३५	३३	३४	धृतराष्ट्रयुधिष्ठिरादिभिर्व्यासप्रसादोज्जीवितैर्हतपूर्वबन्धुभिःसहयावद्रात्रिसुखेनविहरणं ।
३६	३४	१८	त्यक्तदेहानामपिकुरुपाण्डवपक्षीयाणांकथंपुनरागमनमितिजनमेजयप्रश्नस्सोपपत्तिकमुत्तरदानं ।
३७	३५	१८	जनमेजयेनपरीक्षित्प्रदर्शनेप्रार्थितेव्यासेनपरीक्षितःशमीकमहर्षेःशृङ्गिणश्चप्रदर्शनं । जनमेजयेनावभृथस्नानानन्तरमास्तिकपूजनपूर्वकंवैशंपायनंप्रतिकथाशेषकथनप्रार्थना ।

अध्याय.	छपा.अ.	श्लोक.	
३८	३६	५३	धृतराष्ट्रेणपुत्रदर्शनानन्तरंयुधिष्ठिरादिभिःसहपुनःस्वाश्रमंप्रत्यागमनं । व्यासेनधृतराष्ट्रंप्रतियुधिष्ठिरादीनांनगरप्रस्थापनचोदना । नगरंप्रतिपुनर्गमनमनिच्छताऽपियुधिष्ठिरेणधृतराष्ट्रस्यकुन्तीगान्धार्योश्चनिदेशनिर्बन्धेनपुनःसर्वैःसहहास्तिनपुरंप्रत्यागमनं ।

समाप्तं पुत्रदर्शनपर्व ॥ २ ॥

अथ नारदागमनपर्व ॥ ३ ॥ अध्यायाः ॥ ३ ॥
(३९-४१) ॥ श्लोकाः ॥ ९३ ॥

अध्याय.	छपा.अ.	श्लोक.	
३९	३७	४५	कदाचनहास्तिनपुरमुपागतेननारदेनपाण्डवान्प्रतिधृतराष्ट्रादीनांस्वर्गप्राप्तिनिवेदनं । धृतराष्ट्रेगान्धारीकुन्तीसञ्जयैःसहगङ्गायामाप्लुत्यस्वाश्रममागच्छतिसतिमध्येमार्गंदावाग्निनातत्परिवेष्टनं । धृतराष्ट्रेणसञ्जयंप्रत्यग्नितोदूरापसर्पणप्रेरणापूर्वकंकुन्तीगान्धारीभ्यांसहवह्नौप्रवेशः ।
४०	३८	२१	युधिष्ठिरेणधृतराष्ट्रादिनिधनश्रवणेनभ्रातृभिःसहसकरुणंपरिदेवनपूर्वकंसतिसंस्कृताग्नौ तेषांतथाग्निनादाहंप्रत्यनुशोचनं ।
४१	३९	२७	नारदेनयुधिष्ठिरंप्रतिधृतराष्ट्रादिदाहकाग्नेर्मन्त्रपूतत्वकथनं । युधिष्ठिरेण युयुत्सुपुरस्कारेणगान्धारीधृतराष्ट्रयोरुदकदानपूर्वकंकुन्त्याश्चविधिवच्छ्राद्धदानं । ततोनारदगमनानन्तरंप्रजापालनेननिजनगरेभ्रात्रादिभिःसहसुखविहारः ।

समाप्तं नारदागमनपर्व ॥ ३ ॥ आश्रमवासिकपर्व च संपूर्णं ॥ १५ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

अथ मौसलपर्व ॥ १६ ॥

अत्रावान्तरपर्वाणि ॥ १ ॥ अध्यायाः ॥ ९ ॥ श्लोकाः ॥ ३०१ ॥

मौसलपर्व ॥ १ ॥ अध्यायाः ॥ १ ॥

(१–९) ॥ श्लोकाः ॥ ३०१ ॥

अध्याय.	छपा.अ.	श्लोक.	
१	{ १ / १–११ }	१२	प्रजापालनेननिजनगरेभ्रातृभिःसहसुखनिवासिनायुधिष्ठिरेणकदाचनाशुभसूचकोत्पातदर्शनं । ततःकालान्तरेरामकृष्णयोर्देहत्यागेनस्वलोकगमनस्यसर्वयादवानांपरस्परंमुसलप्रहारेणनिश्शेषनिधनस्यचश्रवणं ।
२	{ १ / १२–३१ }	२०	वैशंपायनेनजनमेजयंप्रतियादवानांमुसलेननिधनप्रकारकथनारंभः । कदाचनविश्वामित्रादिमहर्षिषुद्वारकामागतेषुकैश्चनयादवैःसांबस्यस्त्रीवेषपरिकल्पनेनमुनीन्प्रतिगर्भिणीयंकिंरूपमपत्यंप्रसविष्यतइतिप्रश्नः । ततोरुष्टैर्महर्षिभिःस्वकुलविनाशकमायसंमुसलंप्रसविष्यतइतिशापदानं । ततःपरेद्युःसांबेनमुसलेप्रसूतेभीतैस्तैराजाज्ञयातस्यचूर्णीकरणेनसमुद्रेप्रक्षेपणं ।
३	२	२४	द्वारकायांनानोत्पातप्रादुर्भावः । तद्दर्शनात्कृष्णेनगान्धारीशापदानानुस्मरणेनतस्यसत्यताचिकीर्षयाभटैःसर्वत्रकृष्ण्यादीनांतीर्थयात्रोद्घोषणं ।
४	३	४८	ततःकृष्णाज्ञयासस्त्रीबालवृद्धैःप्रभासक्षेत्रगमनं । तत्रनृत्तगानादिमहोत्सवानुभवपूर्वकंमद्यपानं । तत्रसभायांसात्यकिनास्यमन्तकमणिहरणादिमर्मोद्घाटनपूर्वकंकृतवर्मगर्हणं । मणिवृत्तान्तश्रवणखिन्नसत्यभामामनःप्रसादनायसात्यकिनाखड्गेनकृतवर्मणःशिरश्छेदनं । ततःकृतवर्मसात्यकिपक्षीयैःमौसलनृणैःपरस्परप्रहारेणपरस्परमारणं ।
५	४	३५	सर्वयादवेषुनिहतेषुबभ्रुदारुकाभ्यांसहबलभद्रमन्वेषमाणेनश्रीकृष्णेनवनेवृक्षाश्रितस्यतस्यदर्शनं । ततःश्रीकृष्णेनपाण्डवान्प्रतिदारुकप्रेषणं । बलभद्रेणयोगात्सर्पशरीरस्वीकारेणसमुद्रप्रवेशः । श्रीकृष्णेनशरीरत्यागाययोगेनशयनं । व्याधेनमृगबुद्ध्याश्रीकृष्णस्यपादतलेसायकेनगाढवेधनं । श्रीकृष्णेनपश्चात्समीपमागतवतःपश्चात्तापेनप्रणमतोव्याधस्यदेवैस्स्वर्गप्रापणं । ततःशरीरत्यागपूर्वकंदिवंगतेनश्रीकृष्णेनदेवैःपुष्पवर्षणपूर्वकंस्तुत्याप्रत्युद्गम्यमानेनसतानिजपरधामप्रवेशः ।
६	५	१५	दारुकेणहास्तिनपुरमेत्यपाण्डवेषुसर्वयादवक्षयनिवेदनं । अर्जुनेनद्वारकामेत्यरुक्मिण्यादिपरिसान्त्वनपूर्वकंवसुदेवगृहंप्रतिगमनं ।
७	६	२७	वसुदेवेनस्वगृहमागतेऽर्जुनेयादवक्षयनिदाननिवेदनपूर्वकंश्रीकृष्णाद्यनुस्मरणेनपरिशोचनं । तथातंप्रतिश्रीकृष्णवचननिवेदनेनराज्यस्त्रीधनादिसमर्पणपूर्वकंस्वेनस्वप्राणत्यजनप्रतिज्ञानं ।
८	७	७७	अर्जुनेनवसुदेवसमाश्वासनपूर्वकंमकलपौरान्प्रतिनातिचिरादेवद्वारकायाःसमुद्रेणसमाप्लावननिवेदनपूर्वकंसर्वेषामिन्द्रप्रस्थंप्रतिप्रयाणसन्नाहचोदना । तथापरेद्युर्योगेनशरीरंत्यक्तवतोवसुदे-

अध्याय.	छपा.अ.	श्लोक.	
			वस्रपत्नीभिःसहसंस्करणपूर्वकंरामकृष्णशरीरयोर्दाहनं । ततोवज्रार्जुनपुरस्कारेणसकलपौरजनेपुरःपुरःप्रयातेसमुद्रेणपश्चाद्भागेपौरजनमुक्ततत्तद्भागस्यस्वजलेनसमाक्रमणं । अर्जुनेनमध्येमार्गेचोरापहृतावशिष्टयादवकलत्रादिभिःसहस्वदेशमेत्ययुधिष्ठिराज्ञयावज्रस्येन्द्रप्रस्थराज्येऽभिषेचनं । सात्यकिसुतादीनांतत्रतत्रराज्येऽभिषेकः । रुक्मिण्यादिभिःकाभिश्चिदग्निप्रवेशनं । सत्यभामादिभिःकाभिश्चनतपसेवनगमनं ।
९	८	४३	अर्जुनेनव्यासाश्रमेतद्दर्शनं । तस्मिन्द्वारकावृत्तान्तनिवेदनं । व्यासेनार्जुनंप्रतियुधिष्ठिरादीनामपिस्वर्गगमनसूचनं । ततोऽर्जुनेनहास्तिनपुरमेत्ययुधिष्ठिरेद्वारकावृत्तान्तादिनिवेदनं।

समाप्तं मौसलपर्व ॥ १६ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

अथ महाप्रस्थानिकपर्व ॥ १७ ॥

अत्रावान्तरपर्व ॥ १ ॥ अध्यायाः ॥ ३ ॥ श्लोकाः ॥ १११ ॥

अवान्तरपर्व ॥ १ ॥ अध्यायाः ॥ ३ ॥ श्लोकाः ॥ १११ ॥

अध्याय.	झपा.अ.	श्लोक.	
१	१	४७	भ्रातृभिर्द्रौपद्याचसहस्वर्गंजिगमिषुणायुधिष्ठिरेणयुयुत्सौराज्यभारनिवेशनपूर्वकंपरिक्षितोराज्येऽभिषेचनं । तथाकृच्छ्रात्पौरानुमतिसंपादनेनवल्कलधारणादिपूर्वकंशुनासहगृहात्प्रस्थानं । अर्जुनेनमध्येमार्गमग्निवचसासनिषङ्गस्यगाण्डीवस्यवरुणोद्देशेनसमुद्रेप्रक्षेपणं ।
२	२	२६	मेरुगिरिंप्रतिगच्छन्तंयुधिष्ठिरंज्यैष्ठ्यक्रमादनुगच्छत्सुभीमादिषुयोगभ्रंशाद्व्युत्क्रमेणभूमौनिपतत्सुभीमप्रश्नात्तंप्रतियुधिष्ठिरेणतेषांपतनेहेतुकथनं । तथाततःशुनाकेवलमनुगम्यमानेनसतापुरोगमनं ।
३	३	३८	शुनासहगच्छन्तंयुधिष्ठिरंप्रतीन्द्रेण स्वर्गगमनायनिजरथारोहणचोदना । युधिष्ठिरेशुनाविनारथारोहणमरोचयमानेयमेननिजस्वरूपप्रकाशनेनतंप्रशंसनं । ततोयमेन्द्रादिभीरथेनस्वर्गंप्रापितेनयुधिष्ठिरेणतत्रभीमाद्यदर्शनादिन्द्रंप्रतिभ्रात्रादीन्विनास्वस्यस्वर्गेप्यनभिरुचिकथनपूर्वकंतत्समीपगमनेच्छानिवेदनं ।

महाप्रस्थानिकपर्व संपूर्णं ॥ १७ ॥

श्रीवेदव्यासायनमः ।

श्रीमन्महाभारतविषयानुक्रमणी ॥

अथ स्वर्गारोहणपर्व ॥ १८ ॥

अत्रावान्तरपर्व ॥ १ ॥ अध्यायाः ॥ ५ ॥ श्लोकाः ॥ २३२ ॥

अवान्तरपर्व ॥ १ ॥ अध्यायाः ॥ ५ ॥ श्लोकाः ॥ २३२ ॥

अध्याय.	झपा.अ.	श्लोक.	
१	१	२५	स्वर्गगतेनयुधिष्ठिरेणतत्रमहासमुच्छ्र्येणशोभमानदुर्योधनदर्शनं । तथातदुत्कर्षासहिष्णुतयातदीयदोषोद्घाटनेनतेनसहस्वेनस्वर्गवासानभिरोचननिवेदनपूर्वकंनारदंप्रतिस्वस्यभ्रात्रादिदिदृक्षानिवेदनं ।
२	२	५४	स्वर्गेकर्णादिबन्धुजनानपश्यतायुधिष्ठिरेणदेवान्प्रतियत्रकुत्रापिबन्धुजनैःसहैवस्वस्यनिवासेच्छानिवेदनं । देवैर्युधिष्ठिरायबन्धुजनप्रदर्शनंचोदितेनदेवदूतेनतस्यनरकप्रदेशप्रापणं । दुर्दर्शनरकदर्शनासहिष्णुतयादूतेनसहप्रतिनिवर्तमानेनयुधिष्ठिरेणश्रुतपूर्वकण्ठध्वनिश्रवणं । ततोयुधिष्ठिरपृष्टैस्तैस्तंप्रतिस्वेषांकर्णभीमादित्वकथनं । ततस्तेनदूतंप्रतीन्द्रेस्वस्यतत्समीपंप्रत्यनागमनचोदना । दूतेनेन्द्रेयुधिष्ठिरचिकीर्षितनिवेदनं ।
काठकोपनिषदर्थप्रतिपादनं । **शां० २५२ । अनु० १०६** ॥

कान्तिकोसलाः । देशः । **भी० ९ । ४०** ॥

कान्यकुब्जः । देशः । गाधेः राजधानी । **आ० १९१ । ३** ॥ Kanouj is on the junction of the river Ganges and the Kali-nadi or Ikshumati, in Rohilkhand.

कापच्यः । (**कायव्यः**) । निषादजात्युद्भवो दस्यूनामधिपतिः । **शां० १३५ । ३** ॥

कापव्याः । जनाः । **स० ७८ । ८८** ॥

कापिलं । क्रौञ्चद्वीपस्थं वर्षं । **भी० १२ । १४** ॥

कापी । नदी । **भी० ९ । २४** ॥

कामः । मन्मथः । तद्भार्या रतिः । **आ० ६७ । ३३** ॥

तस्य प्रशंसा । **शां० १६५** ॥

तस्य द्रुमत्वेन रूपणं । **शां० २६०** ॥

कामठकः । सर्पः । **आ० ५७ । १६** ॥

कामधेनुः । नन्दिनीनाम्नी वसिष्ठधेनुः । **आ० १९१ । ९** ॥

तस्या अपहारो विश्वामित्रेण । **आ० १९१ । २३** ॥

कामन्दः । ऋषिः । तस्यारिष्टनाम्ना राज्ञा सह धर्मत्यागिनः प्रायश्चित्तविषये संवादः । **शां० १२३ । ११** ॥

काम्पिल्यं । माकन्दीसमीपस्थं नगरं । **आ० १४८ । ७८** ॥ इदं दक्षिणपाञ्चालानां राज-

धानी । तस्य राजा द्रुपदः । Kampilya is twentyeight miles north-east of Fategarh in the District of Farrukhabad, N. W. P. It was the capital of South-Panchala, the king of which was Drupada.

काम्भोजाः । देशः । निषधपर्वतस्य दक्षिणतो विद्यमानः । **भी०** ९ । ६५ ॥ तत्रार्जुनस्य राजसूयदिग्विजयार्थं गमनं । **स०** २८ । २५॥ Afganisthan, the name has been derived from Aswasthan the place of horses.

तस्य राजा सुदक्षिणः । अर्जुनेन हतः । **द्रो०** ९२ । ६२ ॥

काम्यकं । खाण्डवप्रस्थस्य पश्चिमस्यां दिशि मरुधन्वसु विद्यमानं पुण्यवनं । तत्र पाण्डवानां वासः । **व०** ५—२३ ॥ ३६—९० ॥ १८४ ॥

काम्या । अप्सराः । **आ०** १२२ । ४६ ॥

कायव्यः । कापव्यशब्दं पश्यत ।

कायशोधनं । तीर्थं । **व०** ८१ । ४२ ॥

कारन्धमः । क्षत्रियः । करन्धमपुत्रोऽविक्षत् । **अश्व०** ४ । १८ ॥

कारन्धमतीर्थं । दक्षिणसमुद्रसमीपे । **आ०** २३६ । ३ ॥

कारीषिः । ऋषिः । विश्वामित्रपुत्रः । **अनु०** ७ । ५५ ॥

कारूशकाः । करूशदेशवासिनो जनाः । **स०** ७८ । ९९ ॥

कारूषः । क्षत्रियः । मनोः पुत्रः । **आ०** ६९।१९॥ The eastern portion of the District of Shahabad, in the Province of Bihar.

कार्कोटकः । कर्कोटकशब्दं पश्यत ।

कार्तवीर्यः । क्षत्रियः । सो० वं० कृतवीर्यस्य पुत्रोऽर्जुनः । **स०** ८ । ११ ॥

तस्य कथा । **स०** ९६ । २७ ॥

तस्य दत्तात्रेयात्सहस्रबाहुत्ववरप्राप्तिः । **स०** ४८ । ५ ॥ **अनु०** २५७ ॥

तस्य परशुरामेण वधः । **स०** ४९ । ४ ॥ **व०** ११७ । २५ ॥

तत्पुत्रैर्जमदग्निहननं । **व०** ११७ । २७ ॥

तेन रावणबन्धनं । **स०** ९६ । २९ ॥ [रा०७।३२]

[तस्य कथा । भा० ९ । १५ ॥ हरि० १ । ३३ । वायु० ९४ ॥ मत्स्य० ४३ ॥ रा० ७ । ३१ ॥ मार्कण्डेय० १६ ॥]

तेन वसिष्ठाश्रमदाहः । वसिष्ठात् शापप्राप्तिश्च । **शां०** ४८ । ४१ ॥

कार्त्तिकेयः । स्कन्दः । **व०** २३३ । ९ ॥

+ कार्तिकादिद्वादशद्वादशीनां विशेषः । **अश्व०** ११३ ॥

कार्ष्णिः । अभिमन्युः । **भी०** ४७ । १५ ॥

१ **कालः** । क्षणलवादिरूपः । तस्य महिमा । **आ०** १। २७३ ॥

तस्य विभागः । **वि०** ५२ । १ ॥ [भा० ३ । ११ ॥ हरि० १ । ८ ॥]

तं प्रति राज्ञः कारणत्वं । **शां०** ६९ । ६ ॥

तस्य द्रुततरपातित्वं । **शां०** १७४ ॥ २८३ ॥

२ **कालः** । कालाभिमानिनी मृत्युनाम्नी देवता । तस्याः सर्पेणसंवादः । **अनु०** १ । ७० ॥

कालकवृक्षीयः । (**कालवृक्षीयः**) । ऋषिः । **स०** ७ । १८ ॥

तस्य कथा अमात्यपरीक्षाविषये । **शां०** ८२ ॥

तस्य शकुन्त्यामुत्पन्नः पुत्रः हिरण्यहस्तः । **अनु०** ५३ । २३ ॥

तस्य कौसल्येन क्षेमदर्शिना संवादः । **शां०** १०४-१०६ ॥

कालका । असुरस्त्री । तत्पुत्राः कालकेयाः । **व०** १७५ । ७ ॥

कालकीर्तिः । क्षत्रियः । **आ०** ६८ । ३७ ॥

कालकूटः । पर्वतः । **स०** ३० । २६ ॥

कालकेयाः । (**कालेयाः**) । हिरण्यपुरवास्तव्या असुराः । अर्जुनेन हताः । **व० ९९ । ३** ॥ **१७५ । १२** ॥

तेषां केषांचिद्वधो देवैः । **व० १०४ । ७** ॥

कालखञ्जाः । असुराः । **स० ९ । १६** ॥

कालघटः । जनमेजयसर्पसत्रे सदस्यो ब्राह्मणः । **आ० ५३ । ८** ॥

कालञ्जरः । पर्वतः । **व० ८३ । ५६** ॥ तत्समीपे मेधावितीर्थं ।

कालतोयकाः । देशः । **भी० ९ । ४७** ॥

कालदन्तकः । सर्पः । **आ० ५७ । ६** ॥

कालदाः । देशः । **भी० ९ । ६३** ॥

कालनेमिः । असुरः । **स० ५१ । ८** ॥ विष्णुना हतः । **स० ५१ । २९** ॥

कालपथः । विश्वामित्रऋषेः पुत्रः । **अनु० ७ । ५०** ॥

कालयवनः । गर्गस्य पुत्रः । श्रीकृष्णेन हतः । **शां० ३४८ । २९** ॥

कालवेगः । सर्पः । **आ० ५७ । ६** ॥

काला । (**कालिका**) । दक्षप्रजापतिकन्या । कश्यपभार्या । तत्पुत्राः कालकेयाः । **आ० ६६ । ३४** ॥ **व० १७५ । ७०** ॥

कालापः । ऋषिः । **स० ४ । २४** ॥

कालिका । कालाशब्दं पश्यत । **स० ११ । ४०** ।

कालिङ्गः । कलिङ्गशब्दं पश्यत ।

कालिञ्जरः । कालञ्जरशब्दं पश्यत ।

कालिन्दी । यमुनानदी । **स० ९ । २२** ॥

कालियः । सर्पः । **आ० ३५ । ६** ॥ **उ० १०३ । ९** ॥

तस्य मर्दनं श्रीकृष्णेन । **स० ५३ । १५** ॥ [भा० १० । १६ ॥ हरि० २ । १२ ॥ विष्णु० ५ । ७ ॥]

काली । वेदव्यासमाता सत्यवती । **आ० ६० । २** ॥

कावेरी । नदी । **स० ९ । २४** ॥ **व० ८३ । २२** ॥ **भी० ९ । २०** ॥

तत्रार्जुनस्य तीर्थयात्रार्थं गमनं । **आ० २३५ । १४** ॥

तत्र नकुलस्य राजसूयदिग्विजयार्थं गमनं । **स० ३३ । १२** ॥

काशयः । देशः । **भी० ९ । ४२** ॥

काशिकाः । जनाः । **स० ७८ । ९७** ॥

काशी । वाराणसीक्षेत्रं । **आ० १९० ॥**

काश्मीराः । देशः । **स० २८ । १७** ॥ **भी० ९ । ५३** ॥ तस्य राजधानी श्रीनगरं ।

काश्मीरमण्डलं । काश्मीरदेशः । **व० १३२ । १०** ॥

काश्यः । पाण्डवपक्षीयो राजा । एकरथः । **उ० १७१ । २२** ॥

१ **काश्यपः ।** सप्तर्षिष्वन्यतमः प्रजापतिः । कश्यपशब्दं पश्यत ।

२ **काश्यपः ।** वसुदेवपुरोहितः । तेन पाण्डवानां जातकर्मादिकरणं । **आ० १३३ । ४४** ॥

काश्यपद्वीपः । **भी० ६ । ५६** ॥

किंजप्यं । तीर्थं । **व० ८१ । ७९** ॥

किंदत्तः । पुण्यतीर्थभूतः कूपः । **व० ८१ । ९८** ॥

किंदमः । मृगरूपधारणेन मृग्या सह मैथुनं कुर्वन्पाण्डुना हतः ऋषिः । **आ० १२३ । १२** ॥

तेन पाण्डोः शापदानं । **आ० १२३ । ३७** ॥

किंदानं । तीर्थं । **व० ८१ । ७९** ॥

किंधुरं । द्रौपदीस्वयंवरे लक्ष्यवेधार्थं निहितं धनुः । **आ० २०० । १३** ॥

किंपुना । नदी । **स० ९ । २४** ॥

किंपुरुषः । हिमवदुत्तरभागे वर्तमानः खण्डः । तत्र राजसूयदिग्विजयार्थमर्जुनस्य गमनं । **स० २९** ॥

+ **किरातकथा ।** अत्याशाया अनर्थहेतुत्वे । **उ० ६४ । १५** ॥

+ **किरातरूपिरुद्रकथा ।** **व० ३९** ॥

किराताः । देशः । **भी० ९ । ५१** ॥ Tipara—Hill Tippera, Comilla in Bengal.

किरीटमाली । अर्जुनः । **वि० ६३** । २७ ॥

किरीटी । अर्जुनः । तन्नामनिर्वचनं । **वि० ४३** । २९ ॥

किर्मीरः । बकभ्राता राक्षसः । **व० ११** । २३ ॥

तस्य वधो भीमेन । **व० ११** । ६७ ॥

किर्मीरवधपर्व । **व० १-११** ॥

किष्किन्धा । वालिसुग्रीवयोरावासभूता नगरी । **स० ३१** । १८ ॥ ५० । १७॥ **व० २८१** । १६ ॥ **२९२** । ५७ ॥ A small village on the northern bank of the river Tungabhadra, near Humpi in the District of Bellary, Madras Presidency.

कीचकः । विराटस्य श्यालः । सुदेष्णाया भ्राता । केकयस्य पुत्रः । तन्माता मालवी । तद्भ्रातर उपकीचकाः पञ्चोत्तरशतं । **वि० २१** ॥

तेन द्रौपदीकामना । **वि० १६** ॥

तस्य बाणासुरांशत्वं । **वि० २१** । २२ ॥

तस्य वधः भीमसेनेन । **वि० २६** । ३३ ॥

+ **कीचकवधपर्व** । **वि० १६-२८** ॥

+ **कीटः** । कश्चन क्रिमिः । तस्योपाख्यानं । **अनु० १७९** ॥

तस्मै व्यासेन राज्यदानं । तेन राज्यपालनं च । **अनु० १८०** ॥

कीर्तिः । दक्षप्रजापतिपुत्री । धर्मस्य भार्या । **आ० ६७** । १४ ॥

+ **कीर्तिः** । यशः । तस्याः स्वर्गप्रापकत्वं । **व० २०२** ॥

तस्याः संपादनीयत्वं । **आ० २२२** । ११ ॥

कीर्तिधर्मा । पाण्डवपक्षीयः क्षत्रियः । **द्रो० १५९** । ३८ ॥

कुकुणः । सर्पः । **उ० १०३** । १० ॥

कुकुरः । सर्पः । **उ० १०३** । १० ॥

कुकुराः । देशः । **भी० ९** । ४२ ॥

कुकुरः । ऋषिः । **स० ४** । २४ ॥

कुञ्जरः । जयद्रथभ्राता । **व० २६६** । ११ ॥

कुठारमुखः । सर्पः । **आ० ५७** । १५ ॥

कुणिगार्ग्यः । ऋषिः । तत्पुत्री वृद्धकन्या यां गालवपुत्रः शृङ्गवानुपयेमे । **श० ५३** । ३ ॥

कुण्डकः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ० २०१** । ३ ॥

कुण्डजः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ० ६८** । १०५ ॥

१ **कुण्डधारः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ० १३१** । ७ ॥ भीमसेनेन हतः । **भी० ८८** । २३ ॥

२ **कुण्डधारः** । मेघः । तेन माणिभद्रनामानं यक्षं प्रसाद्य ब्राह्मणायैश्वर्यदापनं । **शां० २७७** ॥

३ **कुण्डधारः** । सर्पः । **स० ९** । १० ॥

कुण्डभेदी । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ० ६८** । १०४ ॥ **१३१** । १३ ॥ **भी० ९६** । २७ ॥ तद्वधः भीमसेनेन । **द्रो० १२७** । ४२ ॥

कुण्डलः । सर्पः । **आ० ५७** । १३ ॥

कुण्डलाः । देशः । **भी० ९** । ६३ ॥

+ **कुण्डलाहरणं** । विप्ररूपिणा इन्द्रेण कर्णस्य । **व० ३११** ॥

+ **कुण्डलाहरणपर्व** । **व० ३०१-३११** ॥

१ **कुण्डली** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । भीमेन हतः । **भी० ९६** । २४ ॥

२ **कुण्डली** । गरुडस्य पुत्रः । **उ० ११** । ९ ॥

३ **कुण्डली** । नदी । **भी० ९** । २१ ॥

कुण्डशायी । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **आ० १३१** । १० ॥

कुण्डाशी । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ० १३१** । १४ ॥

कुण्डिकः । क्षत्रियः । सो० वं० तृतीयजनमेजयपुत्रस्य धृतराष्ट्रस्य पुत्रः । **आ० १०१** । ४६॥

कुण्डिनं । भीष्मकस्य काले विदर्भाणां राजधानी । **व० ५७** । २० ॥ **७१** । २ ॥ In Berar

Vidarbha desa. The ancient capital of Vidarbha. Kundinapura in Berar, Central India, is about forty miles east of Amraoti.

कुण्डी । क्षत्रियः । सौ० वं० धृतराष्ट्रस्य पुत्रः । **आ० ११ । ११ ॥**

कुण्डोदः । पर्वतः । **व० ८९ । २५ ॥**

१ **कुण्डोदरः** । क्षत्रियः । धृतराष्ट्रपुत्रः । **आ० ६८ । ९७ ॥**

२ **कुण्डोदरः** । सर्पः । **आ० ३५ । १६ ॥**

+ **कुतपः** । श्राद्धार्हः कालः । **आ० ८७ । ३१ ॥**

कुन्तयः । देशः । **भी० ९ । ४० ॥** An ancient town of Malwa, the birth place of Kunti. It was situated on the bank of a small river called Aswanadi.

कुन्तलाः । देशः । **भी० ९ । ५२ ॥** The ancient name of the Province in which Kurugode is situated. A portion of the Bellary District in the Madras Presidency.

कुन्तिभोजः । शूरराजस्य पितृष्वस्रीयपुत्रः । **आ० ६८ । १३१ ॥** अतिरथः । **उ० १७२ । २॥**

तस्य कथा । **व० ३०४ ॥**

तेन शूरराजपुत्र्या वसुदेवभगिन्याः पृथायाः दुहितृत्वेन स्वीकारः । **आ० ६८ । १३० ॥**

तस्य पुत्रा दश । अश्वत्थाम्ना हताः । **द्रो० १५७ । १८३ ॥**

तस्य वधो द्रोणेन । **क० ३ । २२ ॥**

कुन्ती । शूरराजस्य पुत्री । कुन्तिभोजस्य दत्तकपुत्री पृथा । पाण्डोर्भार्या । या यमानिलेन्द्रेभ्यो युधिष्ठिरभीमार्जुनाञ्जनयामास । श्रीकृष्णस्य पितृष्वसा। **आ० ६३ । ५९ ॥ ६८ । १२९ ॥**

तस्याः स्वसारः । (१) श्रुतदेवा कारूशस्य वृद्धशर्मणः पत्नी । तत्पुत्रो दन्तवक्रः । (२) श्रुतकीर्तिः केकयस्य धृष्टकेतोः पत्नी । तत्पुत्राः संतर्दनादयः पञ्च । तत्पुत्री श्रीकृष्णस्य भार्या भद्रा । (३) राजाधिदेवी । आवन्त्यस्य जयत्सेनस्य भार्या । तत्पुत्रौ विन्दानुविन्दौ । पुत्री श्रीकृष्णभार्या मित्रविन्दा । (४) श्रुतश्रवाः । चैद्यस्य दमघोषस्य पत्नी । तत्पुत्रः शिशुपालः । भा०९ । २४ ॥ विष्णु० ४ । १४ ॥ हरि० १ । ३४ ॥]

तस्याः सिद्ध्यंशत्वं । **आ० ६८ । १६० ॥**

तस्याः बाल्ये दुर्वाससो मन्त्रप्राप्तिः । **आ० ६८ । १३२ ॥ १२० ॥ १२८ ॥ व० ३०६ ॥** [देवीभा० २ । ६ ॥]

तस्याः मन्त्रपरीक्षार्थं सूर्याह्वानं । **आ० १२० । ९॥ व० ३०७ ॥**

तस्यां सूर्यात्कर्णोत्पत्तिः । **आ० ६४ । १४० ॥ ६८ । १३८ ॥ १२० । २८ ॥ व० ३०८–३०९ ॥**

तां प्रति एकचक्रानगरे ब्राह्मणेन बकासुरवृत्तान्तकथनं । **आ० १७४ ॥**

तस्याः सूर्योपस्थानं कुर्वतः कर्णस्य समीपगमनं । **उ० १४४ । २७ ॥**

तस्याः कर्णं प्रति तस्य स्वपुत्रत्वकथनं । **उ० १४५ । २ ॥**

तया विदुरं प्रति कर्णस्य स्वपुत्रत्वकथनं । **उ० १४४ । १९ ॥**

तया युधिष्ठिरं प्रति कर्णस्य स्वपुत्रत्वकथनं । **स्त्री० २७ । ७ ॥**

तस्याः समाश्वासनं श्रीकृष्णेन । **उ० ९० । ९१ ॥**

तस्या दावाग्निप्रवेशः । **आश्र० ३९ ॥**

कुन्दापरान्ताः । देशः । **भी० ९ । ४९ ॥**

कुपटः । दनुपुत्रः । **आ० ६६ । २६ ॥**

कुबेरः । (**वैश्रवणः**) । उत्तरदिगीश्वरो देवः । अस्य सोमइति मुख्यं नामधेयं । अतएव सौम्येति उत्तरदिशो नाम । तद्भार्या ऋद्धिः । **स० १० । ६ ॥**

तत्पुत्रो नलकूबरः । **स० १० । २० ॥** तद्भार्या भद्रा । **आ० २१६ । ६ ॥**

तस्योत्पत्तिः पुलस्त्यमहर्षेर्गोनाम्न्यां तत्पत्न्यां । व० २७५ । १२ ॥
तदागमनं पाण्डवसमीपे । व० १६२ । ३३ ॥
तदागमनमर्जुनसमीपे । व० ४१ । ७ ॥
तदागमनं भीमसेनसमीपे सौगन्धिकाहरणकाले । व० १५५ । २७ ॥
तस्यागस्त्यऋषितः मानुषात्क्लेशप्राप्तिप्रकारकशापप्राप्तिः। व० १६२ । ५९ ॥
तस्यावासः कैलासः । भी० ६ । ४१ ॥
तस्य राजधानी अलका । आ० ७९ । ९ ॥ व० १६३ । ११ ॥
तस्य मुचुकुन्देन सह क्षत्रधर्मविषये संवादः । शां० ७४ ॥
तत्सभावर्णनं । स० १० ॥

कुब्जावती । तीर्थं । व० ८२ । ४० ॥

१ **कुमारः** । स्कन्दः । श० ४५ । १ ॥

२ **कुमारः** । गरुडपुत्रः । उ० १०१ । १३ ॥

कुमारकः । सर्पः । आ० ५७ । १३ ॥

कुमारधारा । नदी । व० ८२ । १४८ ॥

कुमारविषयः । देशः । तस्य राजा श्रेणिमान् । स० ३१ । १ ॥

कुमाराः । देशः । स० ७८ । ८९ ॥

+ **कुमाराणां क्रीडा** । आ० १३७ । १४ ॥

कुमारिकातीर्थं । कन्यातीर्थशब्दं पश्यत । व० ८० । ८२ ॥

कुमारी । नदी । भी० ९ । ३६ ॥

१ **कुमुदः** । सर्पः । आ० ३५ । १५ ॥ उ० १०३ । १३ ॥

२ **कुमुदः** । दिग्गजः । उ० ९९ । ८ ॥

३ **कुमुदः** । पर्वतः । भी० १२ । १० ॥

४ **कुमुदः** । गरुडपुत्रः । उ० १०१ । १२ ॥

कुमुदाक्षः । सर्पः । आ० ३५ । १५ ॥

कुम्भः । प्रह्लादस्य पुत्रः । आ० ६६ । १९ ॥

कुम्भकर्णः। रावणभ्राता राक्षसः । विश्रवसः पुत्रः। तन्माता पुष्पोत्कटा । व० २७६ । ७ ॥ तस्य लक्ष्मणेन वधः । व० २८८ ॥

कुम्भकर्णाश्रमः । व० ८२ । १५६ ॥

+ **कुम्भकारः** । कुलालः । एकचक्रनगरे तस्माद्भीमस्य महत्तरपात्रलाभः । आ० १७१ । १८ ॥
तद्गृहे द्रौपदीस्वयंवरकाले पाण्डवानां वासः । आ० २०० । ६ ॥

कुम्भयोनिः । अगस्त्यशब्दं पश्यत । व० ९७ । ८ ॥

कुम्भरेताः । अग्निविशेषः । व० २२१ । १८ ॥

कुम्भीनसी । चित्ररथनाम्नो गन्धर्वस्य भार्या । आ० १८६ । ३४ ॥

कुरवः । धार्तराष्ट्राः । तेषां दुर्निमित्तप्रादुर्भावः । उ० ८४ ॥

कुरुः । क्षत्रियः। सो० वं० संवरणस्य पुत्रः । तन्माता तपती । तद्भार्या शुभाङ्गी । तत्पुत्रो विदूरथः । आ० ६३ । ४१ ॥
तस्यान्या भार्या वाहिनी । तत्पुत्राः अश्ववान् अभिष्यन्तः चैत्ररथः मुनिः जनमेजयश्च । अश्ववतोऽविक्षत् इति नामान्तरं । आ० १०१ । ३६ ॥ वि० ५३ । १४ ॥ [मत्स्य० ५० ॥]

कुरुक्षेत्रं । कुरुनामकेन राज्ञा निर्मितं सरस्वतीदृषद्वत्योरन्तरा विद्यमानं क्षेत्रं । आ० १०१ । ३८ ॥ व० ८३ । ९० ॥ A tract between the rivers Sarasvati and Dhrishadvati and it was named Brahmavarta in the period of Swayambhuva Manu and it is about 70 miles in length and 30 miles in width. It is also a Railway station 100 miles north of Delhi in the District of Karnal.
तस्य महिमा । व० ८१ । १ ॥ शा० ५४ ॥
तस्य द्वापरे पुण्यतमत्वं । व० ८३ । ९० ॥

कुरुजाङ्गलाः । कुरुदेशस्य पश्चिमतो विद्यमानो वनप्रचुरो देशः । **आ०** १०१ । ३७ ॥
A forest country situated in the north west of Hastinapura, the capital of the Kurus, north-east of Delhi, now entirely diluviated by the river Ganges.

कुरुतीर्थं । **व०** ८१ । १६६ ॥

कुरुपाञ्चालाः । देशः । **भी०** ९ । ३९ ॥

कुरुवृद्धः । भीष्मः । **भी०** ५२ । ५२ ॥

१ **कुलपतिः** । "एको दशसहस्राणि योऽन्नदानादिना भरेत् । स वै कुलपतिः" इत्युक्तलक्षणः शौनकऋषिः । **आ०** १ । ५ ॥

२ **कुलपतिः** । हिमवत्पार्श्वे ब्रह्माश्रमपदे विद्यमानः कश्चन ऋषिः । तस्य शूद्रस्य च कथा । **अनु०** ३१ । १३ ॥

कुलम्पुनः । तीर्थं । **व०** ८१ । १०४ ॥

कुलपर्वताः । महेन्द्रः मलयः सह्यः शुक्तिमान् ऋक्षवान् विन्ध्यः पारियात्रः इति सप्त । **भी०** ९ । ११ ॥

कुलिकः । सर्पः । **आ०** ६६ । ४१ ॥

कुलिङ्गः । दुर्योधनमन्त्री ब्राह्मणः । **आ०** ६१ । १०॥
अस्य कणिक इति नामान्तरं । **आ०** १५३ । २॥
विशेषं कणिकशब्दे पश्यत ।

कुलिङ्गाः । देशः । तद्विजयोऽर्जुनेन राजसूयार्थं । **स०** २७ । ९ ॥ अयं कुलिन्दादनन्य इति भाति ।

कुलिङ्गशकुनिः । (भूलिङ्गशकुनिः) । मा साहसमिति वदन्ती शकुन्तिका । **स०** ६७ । २८॥

कुलिन्दाः । केकयदेशस्य दक्षिणतः कुरुक्षेत्रस्योत्तरतः सरस्वतीतीरे विद्यमानो देशः । **स०** ७८ । ७९ ॥ **भी०** ९ । ६३ ॥ The District of Shaharnpur, north of Delhi.

कुवलाश्वः । क्षत्रियः । सू० वं० बृहदश्वस्य पुत्रः । तस्य धुन्धुमार इति नामान्तरं । **व०** २०४ । ३३ ॥ २०५ ॥ [ब्रह्म० ७ ॥ हरि० १ । ११ ॥ वायु० ८८ ॥ भा० ९ । ६ ॥]
तस्य पुत्राः दृढाश्वः कपिलाश्वः भद्राश्व इति त्रयः । **व०** २०७ । ३७ ॥

कुवीरा । नदी । **भी०** ९ । २७ ॥

कुशः । कुशिकशब्दं पश्यत ।

कुशचीरा । नदी । **भी०** ९ । २३ ॥

कुशद्वीपः । **भी०** १२ । ९ ॥

कुशधारा । नदी । **भी०** ९ । २४ ॥

कुशप्लवनतीर्थं । **व०** ८३ । ३७ ॥

कुशबिन्दवः । देशः । **भी०** ९ । ५६ ॥

कुशलः । क्रौञ्चद्वीपस्थो देशः । **भी०** २२ । २१ ॥

कुशस्थली । द्वारका । **स०** १४ । ५३ ॥
Dwaraka, the capital of the Krishna's kingdom in Guzerat.

कुशाम्बः । क्षत्रियः । सो० वं० पूरुकुलोत्पन्नस्य कृतिराजपुत्रस्य उपरिचरवसोः पुत्रः । अस्य मणिवाहन इति नामान्तरं । **आ०** ६४ । ४४ ॥

कुशिकः । सो० वं० पुरूरवोवंशोत्पन्नस्य जह्नोर्वंशे उत्पन्नस्य कुशस्य पुत्रः । तत्पुत्रो गाधिः । **अनु०** ७ । ५ ॥
तेन पुत्रार्थं तपश्चरणं । **शां०** ४८ । ३ ॥ [भा० ९ । १५ ॥ हरि० १ । २७ ॥]
तस्य गृहे च्यवनऋषेर्वासः । **अनु०** ८७ ॥

कुषिकः । क्षत्रियः । **स०** ८ । १० ॥

कुस्तुम्बुरुः । यक्षः । **स०** १० । १७ ॥

कुहनः । क्षत्रियः । जयद्रथभ्राता । **व०** २६६ । ११॥

कूर्चामुखः । विश्वामित्रर्षेः पुत्रः । **अनु०** ७ । ५३॥

कूर्मः । सर्पः । **आ०** ६६ । ४१ ॥

× **कूर्मावतारः** । श्रीमतो नारायणस्य । **आ०** १८ । १२ ॥ [पद्म० ६ । २५९ ॥ भा० ८ । ७॥]

+ **कूर्मव्यूहः** । कौरवाणां । **भी०** ८७ । ९ ॥

कूष्माण्डकः । सर्पः । **आ०** ३५ । ११ ॥

कृकणेयुः । क्षत्रियः । सो० वं० रौद्राश्वपुत्रः । **आ०** ८८ । ९ ॥

कृतक्षणः । वैदेहः । **स० ४** । ३३ ॥ ७८ । ३३ ॥
कृतं । देवयुगं । आदियुगं । तन्नामनिर्वचनं । **व० १५१** । १२ ॥
तस्य स्वभावः । **व० १९१** । २२ ॥ **१९४** । ७ ॥ **शां० ६९** । ८ ॥
+ **कृतघ्नः** । तस्य निन्दा । **शां० १६७** ॥
तस्य निष्कृतिर्नास्ति । **शां० २७७** । ११ ॥
तस्य प्रायश्चित्तं । **अनु० ३३** ॥
कृतवर्मा । क्षत्रियः । सो० वं० यदुवंशीयसात्वतकुलोत्पन्नस्य हृदिकस्य पुत्रः । अतिरथः । **उ० १६५** । २४ ॥
तस्योत्पत्तिः । **आ० ६४** । १४७ ॥ **स० ४** । ३६ ॥
तत्पराक्रमवर्णनं । **द्रो० ११४** ॥
तेन शिखण्डिपराजयः । **क० १७** । २१ ॥
तस्य पराजयः सात्यकिना । **द्रो० ११६** ॥ **श० २०** ॥
तस्य वधः सात्यकिना । **मौ० ४** । २९ ॥
कृतवीर्यः । क्षत्रियः । सो० वं० यदुवंश्यः । कार्तवीर्यार्जुनस्य पिता । **आ० १९४** । ११ ॥ **स० ८** । ९ ॥ [तस्य पिता धनकः । तस्य वंशः । **भा० ९** । २३ ॥]
कृतवेगः । क्षत्रियः । **स० ८** । ९ ॥
कृतश्रमः । ऋषिः । **स० ४** । २० ॥
कृतिः । क्षत्रियः । **स० ८** । ९ ॥
१ **कृत्या** । नदी । **भी० ९** । १८ ॥
२ + **कृत्या** । आभिचारप्रयोगनिर्मिता दुर्देवता ।
तया दुर्योधनस्य पाताललोकप्रापणं । **व० २५२** । २६ ॥
तस्याः सर्जनं च्यवनेनेन्द्रपीडनाय । **व० ११५** । १८ ॥
तस्या विभजनं सुरादिषु च्यवनेन । **व० १२६** । ९ ॥
तस्याः सर्जनं रैभ्येण यवक्रीतहननाय । **व० १३८** । ६ ॥
कृपः । गौतमकुलोत्पन्नस्य शरद्वतः जालवतीनाम्न्या अप्सरसो दर्शनस्रुताद्रेतसः शरस्तम्बे पतितात् जातः पुत्रः । तत्स्वसा द्रोणाचार्यभार्या कृपी । शान्तनुराजेन पोषितः । **आ० १४०** । २–२१ ॥ रथयूथपयूथपः । **उ० १६६** । २० ॥
तदुत्पत्तिः । **आ० ६४** । १४९ ॥ **१४०** । २ ॥ [भा० ९ । २१ ॥]
तस्य रुद्रगणांशत्वं । **आ० ६८** । ७७ ॥
तस्मात्कौरवाणां पाण्डवानां च धनुर्वेदप्राप्तिः । **आ० १३९** । ४१ ॥
तद्गर्हणं कर्णेन । **वि० ५०** । २ ॥
तेन कर्णगर्हणं । **वि० ४९** । १ ॥ **द्रो० १५९** । १३ ॥
तस्य पराजयोऽर्जुनेन । **द्रो० १४९** ॥
तेनार्जुनप्रशंसनं । **वि० ४९** । २० ॥
तज्जिह्वाच्छेदप्रतिज्ञा कर्णेन । **द्रो० १५९** । ५६ ॥
तेन धृष्टद्युम्नपराभवः । **क० १७** । १० ॥
तस्याश्वत्थाम्ना प्रसुप्तपाण्डुपाञ्चालमारणे विवादः । **सौ० ४** ॥
कृपी । **(गौतमी)** । शरद्वतो जालवतीनाम्न्या अप्सरसो दर्शनस्रुतात् शरस्तम्बे पतितात् रेतसो जाता पुत्री । कृपाचार्यस्य स्वसा । द्रोणाचार्यस्य भार्या । शान्तनुराजेन पोषिता । तत्पुत्रोऽश्वत्थामा **आ० १४०** । २–२१ ॥
[तस्या उत्पत्तिः । **भा० ९** । २१ ॥]
कृमिः । नदी । **भी० ९** । १७ ॥
१ **कृशः** । ऋषिः । शृङ्गिऋषेः सखा । **आ० ४०** । २९ ॥
२ **कृशः** । तनुनामा विप्रः । यो वीरद्युम्नं प्रति आशायाः कृशतरत्वमुपपादयामास । **शां० १२७** ॥
कृशकः । सर्पः । **उ० १०३** । १५ ॥
कृशाश्वः । क्षत्रियः । यमसभायां । **स० ८** । १७ ॥
श्रीकृष्णः । भगवान्नारायणः । सो० वं० यदुकुलोत्पन्नस्य वसुदेवस्य पुत्रत्वेनावतीर्णो वासुदेवश्च । तन्माता देवकी । तदवतारकथा । **आ० ६४** । १४१ ॥ **स० ५१** ॥ [भा० ३ । २ ॥ १० । ३ ॥ विष्णु० ५ । ३ ॥ ब्रह्म० १८०–२१२ ॥ पद्म० ४ । ६९ ॥ ६ । २७०–२७९ ॥ हरि० २ । ४ ॥ देवीभा० ४ । २३ ॥ लिङ्गपु० ६९ ॥]

[तस्य भार्याः। भीष्मकराजसुता रुक्मिणी ॥ २ सत्राजितः पुत्री सत्यभामा ॥ ३ कौसल्यस्य नग्नजितः पुत्री नीला (सत्या) ॥ ४ पितृष्वसुः श्रुतकीर्तेः पुत्री भद्रा। तत्पिता केकयो धृष्टकेतुः ॥ ५ पितृष्वसुः राजाधिदेव्याः पुत्री मित्रविन्दा ॥ तत्पिता आवन्त्यो जयत्सेनः ॥ ६ सूर्यपुत्री कालिन्दी ॥ ७ लक्ष्मणा (लक्षणा) मद्राधिपतेः सुता ॥ ८ जाम्बवती। जाम्बवत ऋक्षराजस्य दुहिता। भा० १० । ५६ ॥ १० । ५८ ॥ पुनरन्याः षोडशसहस्रसंख्याका महिष्यः अप्सरोंशाः नरकासुरपुरादाहृताः। भा० १० । ५९ ॥ विष्णु० ५ । २८ ॥]

[तस्य पत्नीभिर्द्रौपदीं प्रति स्वस्वोद्वाहकथावर्णनं। भा० १० । ८३ ॥]

तस्य श्रीमन्नारायणावतारत्वं। आ० ६८ । १५१॥ उ० ४९ ॥

तस्य जरासन्धेन सह द्वेषकारणं। स० २३ ॥

तस्य भगिनी यशोदापुत्री एकानङ्गा। स० ५९ । ९ ॥

[तस्य वैमात्रेयोऽग्रजो बलरामः। भा० ९ । २४ ॥]

तस्य सारथिर्दारुकः। व० २० । २४ ॥ अश्व० ११८ । ५२ ॥

तस्य शङ्खः पाञ्चजन्यः। भी० २५ । १५ ॥

तस्याश्वाः शैब्यसुग्रीवमेघपुष्पबलाहकाः। अश्व० ११८ । ५६ ॥

तस्य पाञ्चालकार्मुकानारोपणे कारणं। आ० २०६। २० ॥

तस्य पाञ्चालनगरे पाण्डवदिदृक्षया कुलालशालागमनं। आ० २६० । २२ ॥

तस्य सस्त्रीकस्य तादृशेनार्जुनेन सह यमुनायां जलक्रीडा। आ० २४८ ॥

तेन हसिते सति सत्यभामया तत्कारणप्रश्नः। आ० २३८ । १० ॥

तेन युधिष्ठिरराजसूये ब्राह्मणपादप्रक्षालनं। स० ३८। १२ ॥

तस्य युधिष्ठिरराजसूये सहदेवेनाग्रपूजाकरणं। स० ३९ । ४८ ॥

तन्महिमोक्तिर्भीष्माचार्येण। स० ४१ । ६ ॥ अनु० २५१–२५३ ॥

तस्य स्तुतिः। अर्जुनकृता। व० १२ । ११ ॥ द्रौपदीकृता। व० १२ । ५२ ॥ २६४ । ७ ॥ ब्रह्मर्षिकृता। इदमेव विश्वोपाख्यानं। भी० ६८ ॥ युधिष्ठिरकृता। शां० ४२ ॥ भीष्मकृता। शां० ४६ । ५० ॥ धृतराष्ट्रकृता उ० ७० ॥

तस्य सारतरत्वं। उ० ६७ ॥ अश्व० ११८ । ३७॥

तच्चरित्रकथनं विदुरेण धृतराष्ट्राय। उ० १३० । ५५ ॥ धृतराष्ट्रेण सभायां। द्रो० ११ ॥

तद्गुणानुकीर्तनं महेश्वरेण। तद्वंशकथनं च। अनु० २५१ ॥

तेन वाराणसीदाहः। स० ६१ । ११ ॥

तस्यागमनं काम्यकवने पाण्डवान्प्रति। व० १२ ॥

तेन द्रौपदीसमाश्वासनं। व० १२ । १३१ ॥

तस्य साल्वराजेन युद्धं। व० १४ ॥

तेन वनस्थां द्रौपदीं प्रत्यन्नयाचनं। तेनाक्षयपात्रकण्ठलग्नशाकपुलाकभक्षणे आकण्ठतृप्तस्य सशिष्यवर्गस्य दुर्वाससः पलायनं। व० २६३-२६४॥

तन्नामनिर्वचनं। उ० ६९ । ५ ॥ शां० ३५२ । १४॥

तेन भीमसेनमाहात्म्यकथनं। उ० ७६ ॥

तस्य सन्ध्यर्थं हास्तिनपुरगमनं। उ० ८२ ॥

तद्दर्शनार्थमृषीणामागमनं। उ० ८३ । २४ ॥

तस्य मार्गे शुभशकुनानि। उ० ८४ । ९ ॥

तस्य मार्गे तत्रतत्र निवासार्थं दुर्योधनेन सभानिर्माणं। उ० ८५ ॥

तेन विदुरगृहगमनं तदन्नभोजनं च। उ० ९१ । ४० ॥

तेनाह्निककरणं। उ० ९४ ॥ [भा० १० । ७० ॥]

तद्बन्धननिर्धारणं दुर्योधनेन। उ० १३० ॥

तेन विश्वरूपप्रदर्शनं धृतराष्ट्रसभायां। उ० १३१ ॥

समराङ्गणेऽर्जुनाय । भी० ३५ ॥ उदङ्काय । अश्व० ५५ ॥
तेन कर्णं स्वरथमारोप्य तेन सह तस्य पाण्डवपक्षप्रवेशे संभाषणं । उ० १३७ । २६ ॥
तेन भीष्मवधेच्छया चक्रायुधग्रहणं । भी० ५९ । ८८ ॥
तस्य भीष्मवधायाभियानं । भी० १०६ । ५५ ॥
तेन भगदत्तविसृष्टस्य वैष्णवास्त्रस्योरसा धारणं । द्रो० २९ । १८ ॥
तेन लाङ्गलायुधोद्यमनेन भीमसेनहननोद्यतस्य बलरामस्य सान्त्वनं । श० ६१ । ९ ॥
तेन दुर्योधनगर्हणं । दुर्योधनेन तद्गर्हणं च । श० ६२॥
तेन गान्धार्याः समाश्वासनं । श० ६४ ॥
तस्मै गान्धार्या "एवमेव तव कुलमपि नश्यतु" इति शापदानं । स्त्री० २५ । ३९ ॥
तेनाश्वत्थाम्ने शापदानं । सौ० १६ । ६ ॥
तेन कैलासभस्मीकरणं । अनु० २०३ । १८ ॥
तेन पुत्रार्थं शिवं प्रति तपश्चरणं । अनु० २०३ ॥ [शिवपु० उमासं० १]
तस्मै रुद्रेण वरदानं । अनु० ४६ ॥
तेनोदङ्कऋषिदर्शनं । अश्व० ५३ ॥
तेनोदङ्काय स्वमाहात्म्यकथनं । अश्व० ५४ ॥
तस्य रैवतकप्रवेशः । आ० २३९ ॥ अश्व० ५९ ॥
तेन प्रसवसमनंतरं मृतस्य परीक्षित उज्जीवनं । अश्व० ६६ । ६९ ॥
तस्य पादतले जरनाम्ना व्याधेन बाणेन वेधः । मौ० ५ । २२ ॥ [भा० ११ । ३१ ॥]
तेन दुर्वाससः परिचर्या । तदुच्छिष्टपायसेन स्वाङ्गविलेपनं च । अनु० २६४ ॥ मौ० ५ । १८ ॥
तेन बलरामेण धेनुकासुरघातनं । स० ५३ । १६॥ [भा० १० । १५ ॥ हरि० २ । ६३ ॥ विष्णु० ५ । ८ ॥]
तेन नरकासुरवधः । स० ५५ । ३४ । [भा० १० । ५९ ॥ हरि० २ । ६३ ॥ विष्णु० ५। २९ ॥]
तेन यमलार्जुनभङ्गः । स० ५२ । २८ ॥ [भा० १० । १० ॥ हरि० २।७॥ विष्णु० ५।६॥
तेन शकटासुरवधः । स० ५२ । १७ ॥ [भा० १० । ७ ॥ हरि० २ । ६ ॥ विष्णु० ५ । ६ ॥]
तेन बाणासुरपराजयः । स० ६० । ३१ ॥ [हरि० २ । ११८ ॥ भा० १० । ६३ ॥]
तेन सान्दीपिनेश्चतुष्षष्टिकलाभ्यासः । स० ५४ । १ ॥ [भा० १० । ४५ ॥ विष्णु० ५ । २१॥ हरि० २ । ३३ ॥]
चतुष्षष्टिकलानां नामानि । १ गीतं । २ वाद्यं । ३ नृत्यं । ४ नाट्यं । ५ आलेख्यं । ६ विशेषकच्छेद्यं । ७ तण्डुलकुसुमबलिविकाराः । ८ पुष्पास्तरणं । ९ दशनवसनाङ्गरागाः । १० मणिभूमिकाकर्म । ११ शयनरचनं । १२ उदकवाद्यमुदकघातः । १३ चित्रयोगाः । १४ माल्यग्रथनं । १५ शेखरापीडयोजनं । १६ नेपथ्ययोजनं । १७ कर्णपत्रभङ्गाः । १८ सुगन्धयुक्तिः । १९ भूषणयोजनं । २० ऐन्द्रजालं । २१ कौचुमारयोगाः । २२ हस्तलाघवं । २३ चित्रशाकापूपभक्ष्यविकाराः । २४ पानकरसरागासवयोजनं । २५ सूचीवापकर्म । २६ सूत्रक्रीडा । २७ वीणाडमरुकवाद्यानि । २८ प्रहेलिका । २९ प्रतिमाला । ३० दुर्वाचकयोगाः । ३१ पुस्तकवाचकं । ३२ नाटकाख्यायिकादर्शनं । ३३ काव्यसमस्यापूरणं । ३४ पट्टिकावेत्रबाणविकल्पाः । ३५ तर्ककर्माणि । ३६ तक्षणं । ३७ वास्तुविद्या । ३८ रूप्यरत्नपरीक्षा । ३९ धातुवादः । ४० मणिरागज्ञानं । ४१ आकरज्ञानं । ४२ वृक्षायुर्वेदयोगाः । ४३ मेषकुक्कुटलावकयुद्धविधिः । ४४ शुकशारिकाप्रलापनं । ४५ उत्सादनं । ४६ केशमार्जनकौशलं । ४७ अक्षरमुष्टिकाकथनं । ४८ म्लेच्छितकुतर्क-

विकल्पाः। ४९ देशभाषाज्ञानं। ५० पुष्पशकटिकानिर्मितिज्ञानं। ५१ यन्त्रमातृकाधारणमातृका। ५२ संवाच्यं। ५३ मानसीकाव्यक्रिया। ५४ अभिधानकोशः। ५५ छन्दोज्ञानं। ५६ क्रियाविकल्पाः। ५७ छलितकयोगाः। ५८ वस्त्रगोपनानि। ५९ द्यूतविशेषाः। ६० आकर्षक्रीडा। ६१ बालक्रीडनकानि। ६२ वैनायिकीनां ज्ञानं। ६३ वैजयिकीनां ज्ञानं। ६४ वैतालिकीनां ज्ञानं। इति चतुष्षष्टिः कलाः। ६४॥

तेन कालियमर्दनं। **स० ५३। १५॥** [भा० १०। १६॥ हरि० २। १२॥ विष्णु० ५। ७॥]

तेनारिष्टासुरवधः। **स० ५३। २८॥** [भा० १०। ३६॥ हरि० २। २१॥ विष्णु० ५। १४॥]

तेन कंसवधः। **स० ५३। ३३॥** [भा० १०। ४४॥ हरि० २। ३०॥ विष्णु० ५। २०॥]

तेन पूतनासंहारः। **स० ५२। २३॥** [भा० १०। ६॥ हरि० २। ६॥ विष्णु० ५। ५॥]

तेन चाणूरवधः। **स० ५३। ३०॥** [हरि० २। ३०॥ भा० १०। ४४॥ विष्णु० ५। २०॥]

तेन पारिजातहरणं। **स० ५७। ४१॥** [भा० १०। ५९॥ हरि० २। ६४॥ विष्णु० ५। ३०॥]

तेन गोवर्धनोद्धरणं। **स० ५३। २२॥** [भा० १०। २५॥ हरि० २। १५॥ विष्णु० ५। १०॥]

[तेन कुचेलायैश्वर्यदानं। भा० १०। ८०॥]

[तेन कुवलयापीडवधः। भा० १०। ४३॥ हरि० २। २९॥]

[तेन वृकासुरहननं। भा० १०। ८८]

तेन केशिनामकाश्वरूपदैत्यवधः। **स० ५३। २९॥** [भा० १०। ३७॥ हरि० २। २४॥ विष्णु० ५। १६॥]

७

[तेन तृणावर्तवधः। भा० १०। ७॥]

[तेन पौण्ड्रकवासुदेववधः। भा० १०। ६६॥]

[तेन सृगालवासुदेववधः। हरि० २। ४४॥]

[तेन बकासुरवधः। भा० १०। ११॥]

[तेन वत्सासुरवधः। भा० १०। ११॥]

[तेन मृतस्य ब्राह्मणपुत्रस्य श्वेतद्वीपादानयनं। भा० १०। ८९॥ हरि० २। ११३॥]

[तस्य रुक्मिण्या सह प्रेमकलहः। भा० १०। ६०॥]

[तेन गोमन्तपर्वतदाहः। हरि० २। ४२॥]

[तस्य पुत्राः। भा० १०। ६१॥]

[तत्पुत्राणां नामानि। भा० १०। ९०॥ हरि० २। १०३॥]

२ **कृष्णः**। वेदव्यासः। **आ० ११५। ७॥**

३ **कृष्णः**। अर्जुनः। **वि० ४३। ४१॥**

कृष्णद्वैपयानः। व्यासः। **आ० १। १६॥**

कृष्णवेणा। कृष्णा नदी। **भी० ९। २८॥**

कृष्णवेणी। कृष्णा नदी। **स० ९। १६॥**

कृष्णा। नदी। **भी० ९। ३३॥**

केकयः। सूतराज्याधिपो रथकारः। मालव्या भर्ता। तत्पुत्राः कीचकादयः। तस्य द्वितीया भार्या मालव्याः स्वसा। तत्पुत्री विराटभार्या सुदेष्णा। **वि० २१। १३॥**

+ **केकयराजोपाख्यानं**। राज्ञा ब्राह्मणरक्षणविषये। **शां० ७७॥**

१ **केकयाः**। क्षत्रियाः। पाण्डवपक्षीयाः। **उ० १७१। १४॥**

२ **केकयाः**। क्षत्रियाः। दुर्योधनपक्षीयाः। **उ० १९५। ५॥**

३ **केकयाः**। देशः। **भी० ९। ४८॥** The country between the Beas and the Sutlej. It was the kingdom of the father of Kaikeyi one of the wives of Dasaratha.

केतवः। ऋषयः। **शां० १९। १६॥**

१ **केतुमान्**। क्षत्रियः। **स० ४। २३॥**

२ **केतुमान्** । दनुपुत्रोऽसुरः । **आ०** ६५।२४ ॥

३ **केतुमान्** । निषादः । एकलव्यपुत्रः । **भी०** ५४ । ५ ॥ भीमेन हतः । **भी०** ५४ । ७७ ॥

केतुमालः । खण्डः । **स०** २९ । ३९ ॥ **भी०** ६ । ३१ ॥

तस्य सुकृतिनां सुखभोगस्थानत्वं । **अनु०** २४० ॥

केतुमाला । नदी । **व०** ८७ । १४ ॥

केतुवर्मा । त्रैगर्तः । **अश्व०** ७४ । १४ ॥

केदारतीर्थं । गङ्गाद्वारमारभ्य तमसानदीपर्यन्तं विद्यमानं तीर्थं । **व०** ८१ । ७२ ॥ Kedarinath. A sacred stream called Kaliganga has its rise here. It is about 146 miles north of Hardwar and is very near to Badarinath.

केरलः । केरलदेशाधिपः । **वि०** ५३ । १५ ॥

केरलाः । देशः । **स०** ३२ । ७३ ॥ **भी०** ९ । ५८ ॥ The Malabar coast. It comprises Malabar, Travancore, and Kanara.

केशवः । श्रीकृष्णः । तन्नामनिर्वचनं । **शां०** ३५० । ४८ ॥

+ **केशवादिद्वादशभगवद्रूपाणि** । **अनु०** १७१ ॥ **अश्व०** ११४ ॥

१ **केशिनी** । क्षत्रियकुमारी । तस्याः स्वयंवरे ब्राह्मणक्षत्रिययोः श्रेष्ठत्वविषये सुधन्वविरोचनयोर्विवादः । **उ०** ३५ ॥

२ **केशिनी** । दमयन्त्या दूती । **व०** ७२ । ६ ॥

३ **केशिनी** । अप्सराः । **आ०** ६६ । ५० ॥

४ **केशिनी** । सुहोत्रपुत्रस्याजमीढस्य भार्या । तत्पुत्रो जह्नुः । **आ०** १०१ । २० ॥

१ **केशी** । दनुपुत्रोऽसुरः । **आ०** ६६ । २३ ॥ **व०** २२५ । ८ ॥

२ **केशी** । अश्वरूपी असुरः । श्रीकृष्णेन हतः । **स०** ५३ । २९ ॥

केसरः । पर्वतः । **भी०** ११ । २३ ॥

१ **कैकयी** । सू० वं० दशरथभार्या । भरतस्य माता । **व०** २७५ । ८ ॥ **स०** ५० । ९ ॥

२ **कैकयी** । विराटराजभार्या सुदेष्णा । **वि०** १४ । ६ ॥

कैटभः । असुरः । मधोर्भ्राता । विष्णुना हतः । **व०** २०३ ॥

कैतवः । शकुनिः । **स०** ८५ । १० ॥

कैरातपर्व । **व०** ३८–४१ ॥

कैलासः । पर्वतः । रुद्रस्यावासभूतः । **भी०** ६ । ४१ ॥

तत्र पाण्डवानां गमनं । **व०** १४१ । ११ ॥

तत्र श्रीकृष्णेन तपश्चरणं । **अनु०** २०३ । १ ॥

तत्र सकृष्णस्यार्जुनस्य गमनं । **द्रो०** ८० ॥

कैलासकः । सर्पः । **उ०** १०३ । ११ ॥

कोकबकाः । देशः । **भी०** ९ । ६१ ॥

कोकामुखं । तीर्थं । **व०** ८२ । १५७ ॥ तस्य वराहक्षेत्रमिति नामान्तरं ।

कोङ्कणाः । देशः । **भी०** ९ । ६० ॥

कोटरकः । सर्पः । **आ०** ३५ । ८ ॥ **उ०** १०३ । १२ ॥

कोटिकः । क्षत्रियः । **कोटिकास्यः** । जयद्रथस्य प्रेष्यः । शिबिवंशजः । सुरथस्य पुत्रः । **व०** २६६ । ६ ॥ २६७ । ४ ॥ **व०** २७२ । २४॥

तस्य द्रौपद्या संवादः । **व०** २६६ । १ ॥

कोटितीर्थं । **व०** ८० । ५० ॥ ८१ । १६ ॥ ८२ । ७६ ॥ ८३ । ६१ ॥ A tank situated in Kalinjar in the District of Bundelkhand. 2. A sacred tank in Gokarna. 3. In Muttra.

कोटिशः । सर्पः । **आ०** ५७ । ५ ॥

कोपः । क्रोधशब्दं पश्यत ।

कोपवेगः । ऋषिः । **स०** ४ । २२ ॥

कोमलकः । **आ०** ५७ । १७ ॥

कोलगिरिः । **स०** ३२ । ७७ ॥

कोलाहलः । पर्वतः । **आ०** ६४ । ४८ ॥

The range hills near Chanderi, which separates Málwa from Bundelkhand, Central India.

कोल्लः । पर्वतः । **अश्व०** ८४ । ११ ॥

× **कोशवृद्धेरवश्यकर्तव्यत्वं** । **शां०** १३०॥

कोशेश्वरः । तीर्थविशेषः । **व०** ८१ । ५७ ॥

कोषा । नदी । **भी०** ९ । ३४ ॥

कोसला । नदी । **व०** ८३ । ११ ॥

कोसलाः । देशः । **भी०** ९ । ४१ ॥ Ajodhya in Oudh. This was divided into two Provinces by the river Saraju, Uttara and Dakshina Kosala.

कोहलः । जनमेजयस्य सर्पसत्रे सदस्य ऋषिः । **आ०** ५३ । ९ ॥

कौकुट्टकाः । देशः । **भी०** ९ । ६० ॥

कौणकुत्स्यः । ऋषिः । **आ०** ८ । २५ ॥

कौणपः । सर्पः । **आ०** ५७ । ६ ॥

कौणपाशनः । सर्पः । **आ०** ३५ । १४ ॥

कौण्डिन्यः । ऋषिः । **स०** ४ । २२ ॥

कौत्सः । ऋषिः । भगीरथस्य जामाता । तद्भार्या हंसी । **अनु०** २०० । २६ ॥

कौमोदकी । श्रीकृष्णस्य गदा । **आ०** २५१ । २८॥

कौरव्यः । सर्पः । **आ०** ३५ । १३ ॥ **उ०** १०३ । १५ ॥

१ **कौशिकः** । कश्चन ऋषिः । यः क्रूरदृष्ट्या बलाकां पातयामास । **व०** २०९ । १ ॥

२ **कौशिकः** । **स०** ४ । १८ ॥

३ **कौशिकः** । ब्राह्मणः । यः सत्यवचनेन महान्तमनर्थमाप । **क०** ७२ । ४७ ॥

४ **कौशिकः** । जरासन्धस्य सेनापतिः । **स०** २२ । ४२ ॥

५ **कौशिकः** । विश्वामित्रः ।

कौशिकी । नदी । विश्वामित्रभगिनी । या नदी बभूव । **आ०** २३५ । ७ ॥ **व०** ८२ । १४३ ॥ १११ । १ ॥ **भी०** ९ । १८ ॥ **अनु०** ६ । १० ॥ The river Kusi is a large tributary of the Ganges from the north. Its confluence with the Ganges in Bengal is called Kausiki Tirtha.

कौसल्यः । क्षेमदर्शी । तस्य कालकवृक्षीयेण संवादः । **शां०** १०४ ॥

१ **कौसल्या** । अम्बिका । विचित्रवीर्यभार्या । तत्पुत्रो धृतराष्ट्रः । **आ०** ११५ । १८ ॥

२ **कौसल्या** । कोसलदेशाधिपस्य भानुमतो राज्ञः कन्या । दशरथभार्या । तत्पुत्रो रामचन्द्रः । **व०** २७५ । ८ ॥

३ **कौसल्या** । सो० वं० पूरोर्भार्या । तत्पुत्रो जनमेजयः । **आ०** ६३ । ८ ॥

कौसवी । द्रुपदराजस्य भार्या । तस्याः सौत्रामणीति नामान्तरं । **आ०** १४९ । ४९ ॥

कौस्तुभः । श्रीमन्नारायणेनोरसा ध्रियमाणो मणिः । **आ०** १८ । ५० ॥

१ **क्रतुः** । ब्रह्मणो मानसः पुत्रः । **आ०** ६६ । १० ॥ ६७ । ४ ॥ **स०** ११ । १९ ॥

तस्य पुत्राः सूर्यानुचरा वालखिल्याः । **आ०** ६७ । ९ ॥ [भा० ४ । १ ॥]

[तस्य भार्या क्रिया । भा० ४ । १ ॥ तस्य भार्या संनतिः । विष्णु० १ । १० ॥]

२ **क्रतुः** । पाञ्चालः । क्षत्रियः । कर्णेन हतः । **क०** ५१ । ४६ ॥

क्रथकैशिकाः । देशः । विदर्भदेशान्तर्गतः । **स०** १४ । २१ ॥ In Berar, once the capital of Vidarbha.

१ **क्रथनः** । अमृतरक्षको देवः । **आ०** ३२ । १८॥

२ **क्रथनः** । असुरः । **स०** ९ । १७ ॥

३ **क्रथनः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **आ०** १३१ । ११ ॥

क्रमजित् । क्षत्रियः । **स०** ४ । ३४ ॥

१ **क्राथः** । क्षत्रियः । **आ०** ६८ । ४० ॥

२ **क्राथः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । भीमसेनेन हतः । **क०** ४६ । १७ ॥

+ **क्रिमिः** । अलर्कनामा । तेन कर्णस्योरुभेदनं । **शां०** ३ । १३ ॥

तस्मै कस्मै चनान्यस्मै व्यासेन राज्यदानं । **अनु०** १८० ॥

क्रिया । दक्षप्रजापतिपुत्री । धर्मस्य पत्नी । **आ०** ६७ । १४ ॥

क्रूरा । क्रोधाशब्दं पश्यत ।

+ **क्रोधः** । कोपः । तस्य गर्हणं । **आ०** ४२ । ७ ॥ ७३ । ५ ॥ **व०** २९ । ३ ॥ **अनु०** १३ । ५ ॥

क्रोधवशः । इन्द्रजितोऽनुयायी राक्षसः । **व०** २८६ । २ ॥

क्रोधवशा । मृग्यादीनां माता । क्रोधाशब्दं पश्यत ।

क्रोधवशाः । क्रोधायाः पुत्राः काश्यपेया राक्षससौगन्धिकवनरक्षिणः । **व०** १५४ । ११ ॥

तेषां भीमसेनेन वधः । **व०** १५५ । २१ ॥

१ **क्रोधहन्ता** । कालापुत्रोऽसुरः । **आ०** ६६ । ३५

२ **क्रोधहन्ता** । क्षत्रियः । पाण्डवपक्षीयो रथसत्तमः । **उ०** १७१ । अयमेव सेनाबिन्दुरिति भाति ।

क्रोधा । दक्षप्रजापतिपुत्री कश्यपभार्या । तस्याः क्रोधवशेति नामान्तरं । तत्पुत्राः क्रोधवशाः । **आ०** ६६ । १२ ॥

तत्पुत्र्यो नव । मृगी मृगमन्दा हरी भद्रमनाः मातङ्गी शार्दूली श्वेता सुरभिः सुरसा चेति । **आ०** ६७ । ६० ॥

क्रौञ्चः । पर्वतः । **भी०** १२ । ७ ॥ [मैनाकस्य पुत्रः । हरि० १ । १८ ॥]

तद्दारणं सुब्रह्मण्येन । **श०** ४७ । ८४ ॥

क्रौञ्चद्वीपः । **भी०** १२ । ७ ॥

क्रौञ्चव्यूहः । पाण्डवानां । **भी०** ५० । ४० ॥ कौरवाणां । **भी०** ७५ । १५ ॥

क्षत्ता । विदुरः । **आ०** २ । १४६ ॥

क्षत्रञ्जयः । क्षत्रियः । धृष्टद्युम्नस्य पुत्रः । **द्रो०** १० । ५३ ॥ द्रोणेन हतः । **द्रो०** १५६ । १४ ॥

१ **क्षत्रदेवः** । क्षत्रियः । शिखण्डिनः पुत्रः । रथोत्तमः । **उ०** १७१ । १० ॥ **भी०** ९३ । १४ ॥ **द्रो०** २३ । ७ ॥ दुर्योधनपुत्रेण लक्ष्मणेन हतः । **क०** ३ । २६ ॥

क्षत्रधर्मा । (**क्षत्रवर्मा**) । धृष्टद्युम्नस्य पुत्रः । अर्धरथः । **उ०** १७१ । ७ ॥ द्रोणाचार्येण हतः । **द्रो०** १२५ । ६७ ॥

क्षत्रियः । द्वितीयो वर्णः । तस्य ब्राह्मणवर्णादुत्पत्तिः । **आ०** ६५ । ५ ॥

तस्य लक्षणं । **शां०** १८७ । ५ ॥

तस्य महिमा । **व०** १९७ ॥

तस्य धर्माः । **शां०** २७ ॥

तत्रानेकेषां नामानि । **आ०** १ । २५० ॥ युधिष्ठिरसभाप्रवेशे । **स०** ४ । २७ ॥ यमसभायां । **स०** ८ । ८ ॥ द्रौपदीस्वयंवरे । **आ०** २०१ । प्रातस्सायंस्मरणीयाः । **अनु०** २७१ । ४८ ॥

तस्य हृदयं क्षुरसदृशं नवनीतसदृशी वाक् । **आ०** ३ । १२३ ॥

क्षमा । गुणः । तस्या आवश्यकत्वं । **आ०** ४२ । ९ ॥

तस्याः प्रशंसनं । **व०** २९ । ३७ ॥

+ **क्षरत्वं जगतः** । **शां०** ३०८ ॥

क्षीरवती । नदी । **व०** ८२ । ६८ ॥

क्षीरोदः । क्षीरसमुद्रः । **भी०** ११ । १० ॥

तस्य मथनममृतार्थं । **आ०** १८ ॥ [भा० ८ । ६ ॥ रा० १ । ४५ ॥ विष्णु० १ । ९ ॥ पद्मपु० ३ । ९ ॥ ६ । २६० ॥]

क्षुपः । क्षत्रियः । **स०** ८ । १३ ॥ **अनु०** १७७ । ७३ ॥

+ क्षेत्रमहिमा । आ० २३४ ॥ व० ७९-८२ ॥ अनु० ६४ ॥ १७० ॥
+ क्षेत्रक्षेत्रज्ञसम्बन्धकथनं । अश्व० ५० ॥
१ **क्षेमकः** । क्षत्रियः । स० ४ । २७ ॥
२ **क्षेमकः** । सर्पः । आ० ३५ । ११ ॥
क्षेमङ्कर । क्षत्रियः । त्रिगर्तः । व० २६६ । ७ ॥
क्षेमदर्शी । क्षत्रियः । कौसल्यनृपसुतः । तस्य कालकवृक्षीयेण सह संवादः । शां० १०४ ॥
१ **क्षेमधूर्त्तिः** । साल्वस्य सचिवः सेनापतिश्च । व० १६ । ११ ॥
तस्य साम्बेन पराजयः । व० १६ । १६ ॥
तस्य दुर्योधनपक्षं प्रविष्टस्य बृहत्क्षत्रेण वधः । द्रो० १०७ । १-८ ॥
२ **क्षेमधूर्त्तिः** । क्षत्रियः । करूशाधिपतिः । भीमसेनेन हतः । क० ९ । ३२-४५ ॥
३ **क्षेमधूर्त्तिः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । आ० ६८ । १०० ॥
४ **क्षेमधूर्त्तिः** । क्षत्रियः । बृहन्तस्य भ्राता । तस्य सात्यकिना सह युद्धं । द्रो० २५ । ४८ ॥
क्षेमशर्मा । क्षत्रियः । दुर्योधनपक्षीयः । द्रो० २० । ७ ॥
क्षेमा । अप्सराः । आ० १३२ । ४४ ॥

ख.

खगमः । विप्रः । यस्तार्णसर्पेणात्मानं भीषितवन्तं सखखं सहस्रपादमृषिं त्वं डुण्डुभो भवेति शशाप । आ० ११ । १ ॥
+[**खगोलवर्णनं** । भा० ५ । २१ ॥ वायु० ५१-५३ ॥ विष्णु० २ । ८-१२ ॥ शिवपु० उमासं १९ ॥]
+ **खड्गः** । असिः । तदुत्पत्तिकथा । शां० १६४ ॥
तद्युद्धे चतुर्दशमण्डलानि । क० १६ । ३१ ॥
खड्गी । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । भीमेन हतः । क० ८८ । १९ ॥
खनकः । विदुरसुहृत् । यो वारणावते लाक्षागृहे पाण्डवानां बहिर्गमनाय प्रच्छन्नां सुरङ्गां चकार । आ० १५९ । १ ॥
खनीनेत्रः । क्षत्रियः । सू० वं० इक्ष्वाकुवंश्यस्य विविंशस्य पुत्रः । तत्पुत्रः सुवर्चाः । अश्व० ४।७॥
१ **खरः** । राक्षसः । राकायाः पुत्रः । शूर्पणखाया दूषणस्य च साक्षाद्भ्राता । व० २७६ । ८ ॥
तस्य वधः श्रीरामेण । व० २७८ । ५० ॥
२ **खरः** । दूषणभ्रातुरन्यो राक्षसः । व० २८६ । २ ॥
खर्वटाः । देशः । स० ७८ । ५७ ॥
खलुः । नदी । भी० ९ । २८ ॥
खषाः । देशः । स० ७८ । ७९ ॥
खाण्डवं । सरस्वतीदृषद्वत्योः पूर्वस्यां दिशि विद्यमानं वनं । तद्दाहः । आ० २५०-२६० ॥
तद्दाहः पञ्चदशदिनानि । आ० २५४ । ४६ ॥
एकविंशतिदिनानि । आ० २६० । १५ ॥
तद्दाहसमये तक्षकस्य कुरुक्षेत्रे स्थितिः । आ० २५४ । १७ ॥
तद्दाहसमयेऽर्जुनस्येन्द्रेण सह युद्धं । आ० २५३ ॥
खाण्डवदाहपर्व । आ० २४८-२५३ ॥
खाण्डवप्रस्थः । इन्द्रप्रस्थः । आ० ६१ । ४७ ॥ २२७ । ४५ ॥
खाशीराः । देशः । भी० ९ । ६८ ॥

ग.

गगनमूर्धा । असुरः । दनुपुत्रः । आ० ६६ । २४ ॥
गङ्गा । नदी । तदभिमानिदेवता च । आ ६३।५०॥ भी० ६ । ४५ ॥ ९ । १४ ॥
तस्याः भूमौ वसेति शापदानं । आ० १०२।४ ॥
तस्याः शान्तनुना विवाहः । आ० १०४ ॥
तया पुत्रसप्तकहननं । आ० १०५ ॥
तया शान्तनुं त्यक्त्वा शिशुं भीष्ममादाय स्वलोकगमनं । आ० १०६ । ४८ ॥
तस्याः भूमौ नदीरूपेणावतरणं । व० १०९ । ८॥ [रा० १ । ४३॥ भा० ९ । ९॥ मार्कण्डेय० ५३॥]
तस्या भगीरथपुत्रीत्वं । द्रो० ६० । ८ ॥

तस्याः कलियुगे पुण्यतमत्वं । **व० ८३ । ९०** ॥
तस्या आगमनं परशुरामेण सह युध्यतो भीष्मस्य सकाशे । **उ० १८२ । १५** ॥
तस्याः भीष्ममरणदुःखितायाः श्रीकृष्णेन समाश्वासनं । **अनु० २७४ । २०** ॥
तन्महिमा । **अनु० ६५** ॥ [भा० ५ । १७ ॥]
गङ्गाद्वारं । हरिद्वारनामकं क्षेत्रं । तस्य मायापुरीत्यपि नाम । तत्र प्रतीपेन तपश्चरणं । तत्र गङ्गाया आगमनं च । **आ० १०३ । १** ॥ Hardwar–this is also called Mayapuri.
तत्र भरद्वाजाद्द्रोणोत्पत्तिः । **आ० १४० । ३४** ॥
तत्र नागकन्यया स्नानार्थं गङ्गायामवतीर्णस्यार्जुनस्य स्वलोकं प्रति नयनं । **आ० २३४ । ६–२०** ॥
गङ्गाह्रदः । तीर्थं । **व० ८१ । १७६** ॥
१ **गजः** । वानरः । **व० २८४ । ३** ॥
२ **गजः** । क्षत्रियः । शकुनेर्भ्राता । इरावता हतः । **भी० ९० । ३०** ॥
+ **गजः** । हस्ती । तज्जातेरुत्पत्तिः । **आ० ६७। ६६**॥
+ **गजकच्छपोपाख्यानं** । **आ० २९ । १३**॥ **अनु० २५ । १६** ॥
गजकर्णः । यक्षः । **स० १० । १७** ॥
गणवृद्धिप्रकारः । **शां० १०७ । १०** ॥
गणेशः । उमापुत्रो हेरम्बः । तस्य भारतलेखनाय वेदव्याससमीपे आगमनं । **आ० १ । ११२** ॥
[तस्योत्पत्तिः । लिङ्गपु० १०५ ॥ ब्रह्मवै० गणपतिखं० ८ ॥]
गण्डकः । देशः । पाञ्चालदेशात्पूर्वतो विद्यमानः । **स० ३० । ४** ॥
गण्डकण्डूः । यक्षः । **स० १० । १६** ॥
गण्डा । **(चण्डा)** । पशुसखस्य भार्या । **अनु० १४१ । ५** ॥
तन्नामनिर्वचनं । **अनु० १४२ । ४१** ॥
गदः । श्रीकृष्णस्य वैमात्रेयो भ्राता । **आ० २०१ । १७** ॥ **२३९ । १०** ॥ **स० ४ । ३६** ॥
[वसुदेवस्य पुत्रः । तन्माता रोहिणी । अयं बलरामस्य सगर्भ्यः । भा० ९ । २४ ॥]
तस्य मरणं । **मौ० ४ । ४६** ॥
+ **गदायुद्धं** । भीमदुर्योधनयोः । **श० ३३ । ५८** ॥ भीमजरासन्धयोः । **स० २४** ॥ तत्प्रकाराः । **स० २४ । १३** ॥
१ **गन्धमादनः** । बदरिकाश्रमसमीपस्थः पर्वतः । **भी० ६ । ३४** ॥
तत्रार्जुनेन गमनं । तत्रस्थानां पराजयश्च । **स० २९ । ३८** ॥
तत्र पाण्डवानां गमनं । **व० १४३ । २३** ॥
तत्र सौगन्धिकपुष्पहरणार्थं भीमसेनस्य गमनं । **व० १५३ । ३२** ॥
२ **गन्धमादनः** । वानरः । **व० २८४ । ५** ॥
A part of the Rudra-Himalaya. The range of Gandhamadana commences at a short distance to the north-east of Badarikashrama.
+ **गन्धर्वाः** । देवयोनिविशेषाः । तेषां नामानि । **आ० ६६ । ४७** ॥
गन्धर्वी । अश्वानां माता । **आ० ६७ । ६८** ॥
गन्धवती । सत्यवती । **आ० ६४ । १२४** ॥
१ **गयः** । क्षत्रियः । अधूर्तरजसः पुत्रः । **स० ८ । १८** ॥ **श० ३९ । २०** ॥
तस्य यज्ञः । **व० ९३ । २०** ॥ **१२२** ॥
तस्य चरित्रं । **द्रो० ६६** ॥ **शां० २८ । १११**॥
२ **गयः** । क्षत्रियः । सो० वं० आयोः पुत्रः । **६९ । २८** ॥
३ **गयः** । पर्वतः । **व० ८५ । ८** ॥
गया । क्षेत्रं । **आ० २३५ । ७** ॥ **व० २८।८१**॥
[तन्माहात्म्यं । वायुपु० १०६ ॥]
गयाशिरः । गयास्थः प्रदेशविशेषः । **व० ८६ । ११** ॥
गरिष्ठः । ऋषिः । इन्द्रसभायां । **स० ७ । १३**॥
गरुडः । कश्यपपुत्रः । तन्माता विनता । **आ०**

२३ । ५ ॥ ६६ । ४० ॥ **स०** ९ । १५ ॥ ५६ । ३३ ॥ **उ०** ११२ ॥
तदुत्पत्तिः । **आ०** २३ । ५ ॥ **अनु०** ११ ॥
वालखिल्यतपसस्तदुत्पत्तिकारणत्वं । **आ०** ३१ ॥
तस्य पक्षीन्द्रत्वेऽभिषेकः । **आ०** ३१ । ३८ ॥
तस्य स्तुतिः देवैः कृता । **आ०** २३ । १५ ॥
तस्य जातमात्रस्य मातुरन्तिकगमनं । **आ०** २५ । १ ॥
तेन सर्पाणां वहनं । **आ०** २५ । ५ ॥
तेन अमृताहरणार्थं गमनसमये मार्गे निषादानां भक्षणं । **आ०** २८ । १९ ॥
तन्नामनिर्वचनं । **आ०** ३० । ७ ॥
तेनामृतसमीपेऽग्निदर्शनं । **आ०** ३२ । २२ ॥ **अनु०** २७ ॥
तेनामृतसमीपे चक्रदर्शनं । **आ०** ३३ । २ ॥
तेन विष्णोर्वाहनत्वेन ध्वजत्वेन च भवनं । **आ०** ३३ । १८ ॥
तेनामृतहरणं । **आ०** ३४ ॥ **अनु०** २८ ॥
तस्य सुपर्ण इति नामप्राप्तिः । **आ०** ३३ । २४ ॥
तस्येन्द्रेण वज्रायुधप्रहारः । **आ०** ३३ । १९ ॥
तस्य पुत्राः । सुमुखः सुनामा सुनेत्रः सुवर्चाः सुरुक् सुबलश्च । तथा सुवर्णचूडादयश्चानेके । **उ०** १०१ । २ ॥
तदंसे विष्णुना स्वबाहुनिक्षेपणेन तद्दर्पखण्डनं । **उ०** १०५ । २० ॥
तेन गालववहनं । **उ०** १०७ ॥
तस्य शाण्डिल्या अध्यापनात्पक्षहानिः । **उ०** ११३ ॥
तस्य कश्यपेन सह नारायणमहिमविषये संवादः । **अनु०** ४० ॥
तस्य मुनिगणेन सह नारायणमहिमविषये संवादः । **अनु०** ४१–४२ ॥
तस्य बदरिकाश्रमगमनं । **अनु०** ४१ ॥
तदुपाख्यानं परशुरामप्रोक्तं । **अनु०** १९ ॥
गरुडव्यूहः । कौरवाणां । भीष्मेण रचितः । **भी०** ५६ । २ ॥
गर्दभिः । गार्दभिशब्दं पश्यत ।
गर्गः । ऋषिः । **अनु०** ४९ । ३८ ॥ [यादवानां पुरोहितः । भा० १० । ८ ॥ दिवोदासस्य पौत्रः प्रतर्दनस्य पुत्रः। तद्भ्राता वत्सः। वायु०९२॥]
गर्गस्रोतः । तीर्थं । **श०** ३८ । १३ ॥
गर्दभीमतङ्गोपाख्यानं । **अनु०** ३ ॥
गर्भः । तस्योत्पत्तिप्रकारः । **आ०** ८४ । ९ ॥ [भा० ३ । ३१ ॥]
तत्प्रवेशो जीवस्य । **अश्व०** १९ ॥ **स्त्री०** ४ ॥ **अनु०** २२८ ॥ [भा० ३ । ३१ ॥ मार्कण्डे० ११ ॥ विष्णु० ६ । ५ ॥]
तन्नाशकाः ग्रहाः । **व०** २३० । २८ ॥
गवयः । वानरः । **व०** २८४ । ३ ॥
गवल्गणः । धृतराष्ट्रस्य सूतो मन्त्री च । तत्पुत्रः सञ्जयः । **आ०** ६४ । १३९ ॥
१ **गवाक्षः** । क्षत्रियः । शकुनिभ्राता । इरावता हतः । **भी०** ९० । ३०–४९ ॥ भीमसेनेन हतः । **द्रो०** १५८ । २३ ॥
२ **गवाक्षः** । गोलाङ्गूलो वानरः । **व०** २८४ । ४ ॥
गविजातः । ऋषिः । यश्च्यवनऋषिसदृशं मूल्यं गौरिति नहुषायाकथयत् । **अनु०** ८६ । २२ ॥
गाङ्गेयः । गङ्गापुत्रो भीष्मः । **आ०** १०७ । ९६ ॥
गाण्डिवं । **गाण्डीवं** । अर्जुनस्य धनुः । **आ०** २५१ । २० ॥
तन्नामनिर्वचनं । **उ०** ९८ । १९ ॥
तेनार्जुनेन रुद्रशिरसि प्रहारः । **व०** ३९ । ४८ ॥
तस्य समुद्रे प्रक्षेपः । **महा०** १ ॥
गाधिः । **गाधी** । क्षत्रियः । सो० वं० कान्यकुब्जदेशाधिपतिः । जह्नुवंशोत्पन्नस्य कुशिकस्य पुत्रः । तन्माता पुरुकुत्सस्य पुत्री । तत्पुत्रो विश्वामित्रः । **आ०** १९१ । ३ ॥ [भा० ९ । १५ ॥ हरि० १ । २७ ॥]
तस्य पुत्री सत्यवती । ऋचीकभार्या । **व०** ११६ ॥ **शां०** ४८ ॥ **अनु०** ७ ॥
गान्धर्वग्रहः । **व०** २३० । ३९ ॥
गान्धारराजः । शकुनिः । **स०** ८३ । १३ ॥

१ **गान्धाराः** । सिन्धुनदीसमीपस्थो देशः । **भी०** ९ । ५३ ॥ तस्य राजधानी तक्षशिला पुष्करावती च । The country of Gandhara lies along the Kabul river between the Kunar and the Indus. Its capital was Purushapura now called Peshawar.

२ **गान्धाराः** । शकुन्यादयः ।

गान्धारी । सुबलस्य पुत्री । धृतराष्ट्रभार्या । तत्पुत्राः दुर्योधनादयः शतं । पुत्री दुश्शला । एतेषां नामानि धृतराष्ट्रशब्दे द्रष्टव्यानि । **आ०** ६३ । ५८ ॥

तस्या भ्रातरः शकुन्यादयस्त्रयोदश । तेषां नामानि शकुनिशब्दे द्रष्टव्यानि ।

तस्याः स्वसारः धृतराष्ट्रस्यैव भार्या दश । सत्यव्रता सत्यसेना सुदेष्णा संहिता तेजश्श्रवा सुश्रवा निकृतिः शुभा शम्बठा दशार्णा इति । **आ०** ११९ । २२ ॥

तस्या धर्महन्तृदेवतांशत्वं । **आ०** ६४ । १५३ ॥

तस्या विवाहः । **आ०** ११९ ॥

तस्या गर्भोत्पत्तिः । **आ०** १२६ । १२ ॥

तया कुन्त्याः पुत्रोत्पत्तिश्रवणेन स्वोदरघातः । **आ०** १२९ । २५ ॥

तस्याः दुर्योधनवधं शोचन्त्याः श्रीकृष्णेन समाश्वासनं । **श०** ६४ ॥

तया श्रीकृष्णं प्रति स्वपुत्रादिशवप्रदर्शनं । **स्त्री०** १८-२५ ॥

तया "इत आरभ्य षट्त्रिंशे वर्षे तव ज्ञातयो विनश्यन्त्विति श्रीकृष्णाय शापदानं । **स्त्री०** २५ । ३९ ॥

तस्या भीमसेनेन सह विवादः । दुर्योधनवधस्य युक्तायुक्तताविषये । **स्त्री०** १४ ॥

तद्दृष्टिपातेन युधिष्ठिरस्य कुनखीभावः । **स्त्री०** १५ । ७ ॥

तया पट्टवस्त्रेण स्वनेत्रपिधानं । **स्त्री०** १५ । ७ ॥

तया द्रौपदीसमाश्वासनं । **स्त्री०** १५ । १७ ॥

तस्या व्यासप्रसादाद्दिव्यचक्षुःप्राप्तिः । **स्त्री०** १६ । ३ ॥

तस्या दुर्योधनशवालिङ्गनेन परिदेवनं । **स्त्री०** १७ ॥

तस्या मृतबन्धुदर्शनेन श्रीकृष्णसमीपे परिदेवनं । **स्त्री०** १७—२५ ॥

तस्या धृतराष्ट्रेण सह तपोवनगमनं । **आश्र०** १७ ॥

तस्यास्तपोवने दावाग्नौ प्रवेशः । **आश्र०** ३९ ॥

२ **गान्धारी** । अजमीढस्य तृतीया भार्या । **आ०** ६३ । ३९ ॥

गायत्री । देवता तदभिमन्यमानो मन्त्रश्च । तज्जपमहिमा । **अश्व०** ९९ ॥ ११५ । १८ ॥

१ **गार्ग्यः** । ऋषिः । [वेणुहोत्रस्य पुत्रः । वायु० ९२ ॥] तेन धर्मरहस्यकथनं । **अनु०** १९० । ९ ॥

तत्पुत्रहिंसनेन जनमेजयस्य ब्रह्महत्याप्राप्तिः । **शां०** १५१ ॥ [हरि० १ । ३० ॥]

२ **गार्ग्यः** । विश्वामित्रऋषेः पुत्रः । **अनु०** ७ । ५५ ॥

गार्दभिः । विश्वामित्रऋषेः पुत्रः । **अनु०** ७ । ५९ ॥

गार्हस्थ्यं । गृहस्थशब्दं पश्यत ।

१ **गालवः** । विश्वमित्रशिष्य ऋषिः । **उ०** १०६ ॥ इन्द्रसभायां । **स०** ७ । १० ॥ युधिष्ठिरसभायां । **स०** ४ । २१ ॥

तदुपाख्यानं । **उ०** १०६—११९ ॥

तस्य विश्वामित्राय दातव्यैकतश्श्यामकर्णहयरूपगुरुदक्षिणार्जनार्थं गरुडमारुह्य नानादेशगमनं । **उ०** १०७ ॥

तस्य ययातिसमीपगमनं । **उ०** ११४ ॥

तस्य पुत्रः वृद्धकन्याजानिः शृङ्गवान् । **श०** ५३ ॥

तस्य नारदेन सह श्रेयस्साधनविषये संवादः । **शां०** २९३ ॥

तेन महादेवकथाकथनं । **अनु०** ४९ । ५२ ॥

तत्कृतः पुष्करास्तेयशपथः । **अनु०** १४३ । ३७ ॥

२ **गालवः** । विश्वामित्रपुत्रः । **अनु०** ७ । ५२ ॥ [हरि० १ । १२ ॥ वायु० ८८ ॥ ब्रह्म० ७॥] पूर्वोक्तोप्ययमेवेति भाति ।

गालवाः। तन्नामकदेशाधिपा राजानः। **स० ३७।** १४ ॥
गावल्गणिः। धृतराष्ट्रमन्त्री सञ्जयः। **आ० १।** २४७ ॥
गिरिका। उपरिचरवसुभार्या। शुक्तिमतीनद्यां कोलाहलनामकात्पर्वतादुत्पन्ना। **आ० ६४।** ५०॥
तत्पुत्राः बृहद्रथादयः। **आ० ६४।** ४३ ॥
गिरिकुञ्जः। तीर्थं। **व० ८०।** ८७ ॥
गिरिगह्वराः। देशविशेषः। **भी० ९।** ६८॥
गिरिव्रजः। मगधदेशस्था जरासन्धपुरी। **स० २१।** १८ ॥ २५। ४२ ॥ Rajgir in Behar, the ancient capital of Magadha.
गीता। भगवद्गीता। **भी० २५—४२** ॥
गुडाकेशः। पाण्डुपुत्रोऽर्जुनः। **आ० १५१।** ९॥
गुणकेशी। मातलिपुत्री। तस्या भ्राता गोमुखः। तन्माता सुधर्मा। तद्भर्ता सुमुखो नागः। **उ० ९७॥**
+ **गुणत्रयनिरूपणं**। **शां० २१४** ॥
गुणमुख्या। अप्सराः। **आ० १२२।** ४३ ॥
गुणावरा। अप्सराः। **आ० १२२।** ४३ ॥
गुप्तकः। क्षत्रियः। जयद्रथभ्राता। **व० २६६।** ११ ॥
गुरुः। विद्योपदेष्टा। तन्महिमा। **उ० ४४।** ८ ॥ **शां० १०८** ॥
तल्लक्षणं। **अश्व० ११०।** ५७ ॥
तत्पूजा। **अनु० २३३** ॥
+ **गुरुतल्पप्रायश्चित्तं**। **शां० १६३।** ४९ ॥
गुरुभारः। गरुडपुत्रः। **उ० १०१।** १३ ॥
+ **गुरुशिष्यसंवादः**। **अश्व० ३६** ॥
गुह्यकास्त्रं। परशुरामेण प्रयुक्तं। **उ० १८०।** ११॥
गृत्समदः। ब्राह्मणः। वीतहव्यस्य ब्राह्मणत्वप्राप्त्यनन्तरं जातः पुत्रः। तत्पुत्रः सावैनसः। **अनु० ८।** ५९ ॥ ४९। १९ ॥
+ **गृध्रः**। पक्षिविशेषः। तज्जातेः भास्यास्सकाशादुत्पत्तिः। **आ० ६७।** ५१ ॥
गृध्रकूटः। पर्वतः। **शां० १८।** ८८ ॥
गृध्रवटः। क्षेत्रं। **व० ८२।** ९० ॥
+ **गृध्रजंबुकसंवादः**। मृतब्राह्मणबालकस्य पुनरुज्जीवनविषये। **शां० १५२** ॥
गृध्रराजः। जटायुः। **व० २८०।** १ ॥
गृहपतिः। अग्निविशेषः। **व० २२४।** ४ ॥
गृहस्थः। द्वितीयाश्रमी। तद्धर्मनिरूपणं। **आ० ८९।** ३ ॥ **शां० १८९** ॥ २४९ ॥
तद्धर्मप्रशंसा। **शां० ११।** १३ ॥ **अनु० २** ॥ १५४ ॥ २११ ॥
१ **गो**। (**गौः**)। पुलस्त्यऋषेर्भार्या। तत्पुत्रो विश्रवाः। **व० २७५।** १२ ॥
२ **गो**। (**गौः**)। गोत्वजातिविशिष्टा। तासामुत्पत्तिः। **आ० ६७।** ६८ ॥ **अनु० ११८** ॥
तासां मधुपर्के समनुज्ञानं। **आ० ६०।** १४ ॥
तासां प्रशंसा। **अनु० १२४** ॥ १९६ ॥
तासां शृङ्गप्राप्तिः। **अनु० ११६।** १३ ॥
तद्दानफलं। **अनु० १०६-१०९** ॥ २३५। ३१-५० ॥ **अश्व० १०२** ॥
तद्दानविधिः। **अनु० १११** ॥
ताभ्यो ग्रासदानस्य फलं। **अश्व० १०९** ॥
+ **गोकपिलासंवादः**। **शां० २७४-२७६** ॥
गोकर्णं। क्षेत्रं। **व० ८३।** २४ ॥ **व० ८६।** १५ ॥ २७८। ६२ ॥ **अनु० ४९।** ६ ॥ A town in the Province of North-Kanara, thirty miles from Goa.
तत्रार्जुनस्य तीर्थयात्रायां गमनं। **आ० २३७।** ३७ ॥
+ **गोग्रहणपर्व**। **वि० २९—७३** ॥
+ **गोचारिणः**। ऋषयः। **अनु० ४५।** ४१ ॥
गोदावरी। नदी। **आ० २३५।** १३ ॥ **स० ९।** २४ ॥ **व० ८३।** ३४ ॥ **भी० ९।** १४ ॥
गोधाः। देशः। **भी० ९।** ४२ ॥
१ **गोपतिः**। देवगन्धर्वः। मुनिनाम्न्याः कश्यपभार्यायाः पुत्रः। **आ० ६६।** ४२ ॥

२ **गोपतिः** । पाण्डवपक्षीयः पाञ्चाल्यः । **द्रो० २३ । ५१** ॥

३ **गोपतिः** । क्षत्रियः । शिबिपुत्रः । **शां० ४८ । ८५** ॥ श्रीकृष्णेन हतः । **व० १२ । ३४** ॥

४ **गोपतिः** । अग्निविशेषः । तस्य विश्वभुगिति नामान्तरं । **व० २२१ । २७** ॥

गोपराष्ट्राः । देशः । **भी० ९ । ४४** ॥

गोपालकक्षः । देशः । भीमसेनेन विजितः । **स० ३१ । ३** ॥

गोप्रतारं । सरयूसंबन्धितीर्थं । **व० ८२ । ७०** ॥ Gopratara–a place of pilgrimage on the bank of the Saraju at Fyzabad.

गोमती । नदी । **स० ९ । २७** ॥ **व० ८२ । ७२** ॥ **भी० ९ । १८** ॥ The river Gomti in Oudh.

गोमतीगङ्गासङ्गमः । तीर्थं । **व० ८२ । ८०** ॥

१ **गोमन्तः** । क्रौञ्चद्वीपस्थः पर्वतः । **भी० १२ । ८** ॥

२ **गोमन्तः** । द्वारकासमीपे विद्यमानः पर्वतः । **स० १४ । ५७** ॥ An isolated mountain on the northernside of the western ghats.

[तमारूढयोः श्रीकृष्णरामयोः दाहनार्थं जरासन्धेन गोमन्तस्य दाहः । हरि० २ । ४२ ॥]

गोमन्ताः । देशः । **भी० ९ । ४३** ॥

गोमुखः । मातलेः पुत्रः । इन्द्रपुत्रस्य जयन्तस्य सारथिः । **उ० १०० । १८** ॥

गोरथः । मगधदेशस्थः पर्वतः । **स० २० । ३०** ॥

+ **गोलाङ्गूलः** । वानरजातिविशेषः । तेषां हर्योः उत्पत्तिः । **आ० ६७ । ६४** ॥

गोलोकः । ब्रह्मलोकादुपरितनो लोकः । **अनु० ११७** ॥

१ **गोवर्धनः** । पर्वतः । तदुद्धरणं श्रीकृष्णेन । **स० ५३ । २४** ॥ [भा० १० । २५ ॥ हरि० २ । १८ ॥ विष्णु० ५ । ११ ॥]

२ **गोवर्धनः** । बाह्लीकदेशस्थो वटवृक्षः । **क० ३७ । १८** ॥

गोवासनः । शैब्यः । क्षत्रियः । दुर्योधनपक्षीयः । **द्रो० ९५ । ३९** ॥

गोविततः । यज्ञः । अश्वमेधप्रभेदः । **आ० १०१ । ५** ॥

१ **गोविन्दः** । पर्वतः । **भी० १२ । १९** ॥

२ **गोविन्दः** । श्रीकृष्णः । तन्नामनिर्वचनं । **उ० ६९ । १३** । **शां० ३५२ । ५** ॥

गोवृषध्वजः । कृपाचार्यः । **द्रो० १०५ । १४** ॥

गोव्रतिनः । गोव्रतवन्त ऋषयः । **उ० ९९।१४**॥

गोशृङ्गः । निषादभूमिसमीपस्थः पर्वतः । **स० ३२ । ५** ॥ तस्य राजा श्रेणिमान् ॥

गौः । गोशब्दं पश्यत ॥

१ **गौतमः** । *उचथ्यपुत्रस्य दीर्घतमसः पुत्रः । तन्माता प्रद्वेषी । **आ० ११३ । २४** ॥ **स० ४ । २३** ॥ **११ । १९** ॥

तस्य पत्नी अहल्या । **अश्व० ५६ । २६** ॥

तस्यात्रिणा सह ब्राह्मणमाहात्म्यविषये संवादः । **व० १८८** ॥

तस्याङ्गिरसा सह नदीमाहात्म्यविषये संवादः । **अनु० ६४** ॥

तन्नामनिर्वचनं । **अनु० १४२ । ३३** ॥

तस्य शिष्यः जामाता च उदङ्कः । **अश्व० ५६** ॥

तस्य यमेन सह मातापित्रोः परिचर्यया तदृणापनोदनविषये संवादः । **शां० १२९** ॥

[तेनानावृष्टिकालेऽन्नदानादिना ब्राह्मणरक्षणं । तस्य गोहत्याप्राप्तिः । तेन ब्राह्मणेभ्यः शापदानं । देवीभा० १२ । ९ ॥ शिवपु० कोटिरुद्रसं० २५–२७ ॥]

---

* दीर्घतमस एव गौतम इति नाम । तत्पुत्रत्वादहल्यापतेरपि गौतम इत्यमुख्यं नामेति संप्रदायविदः ।

२ **गौतमः** । मध्यदेशीयः कश्चन ब्राह्मणः । कृतघ्नमित्रद्रोहिदृष्टान्ततया तत्कथा । **शां०** १६७ ॥ १७२ ॥

तेन राजधर्मनामकबकपक्षिहननं । **शां०** १७१ ॥

३ **गौतमः** । कश्चन ब्राह्मणः । तस्य धृतराष्ट्ररूपिणेन्द्रेण सह हस्तिविषये विवादः । **अनु०** १५९॥

४ **गौतमः** । एकतद्वितत्रितानां पिता । **श०** ३७ । ९ ॥

५ **गौतमः** । गोतमगोत्रोत्पन्नो मेधातिथिः । तत्पुत्रः चिरकारी । **शां०** २७२ । ९ ॥

६ **गौतमः** । दीर्घतमाः । **स०** २१ । ५ ॥

१ **गौतमी** । स्थविरा ब्राह्मणी । तस्या लुब्धकेन संवादः । **अनु०** १ । १८ ॥

२ **गौतमी** । द्रोणाचार्यभार्या कृपी । **आ०** १४० । ४९ ॥

३ **गौतमी** । काचन देवता ब्रह्मसभायां । **स०** ११ । ४० ॥

गौरकाः । गौरनामकदेशस्था जनाः । **स०**७८।८९॥

गौरपृष्ठः । क्षत्रियः । यमसभायां । **स०** ८ । २१ ॥

गौरमुखः । शमीकशिष्यः ऋषिः । **आ०** ४२ । १४ ॥ ५० । १३ ॥

गौरवाहनः । क्षत्रियः । **स०** ३७ । १५ ॥

गौरशिराः । ऋषिः । **स०** ७ । ११ ॥

गौराश्वः । क्षत्रियः । यमसभायां । **स०** ८ । १८ ॥

१ **गौरी** । पार्वती ।

२ **गौरी** । वारुणीदेवी । **स०** ९ । ७ ॥

३ **गौरी** । नदी । **भी०** ९ । २५ ॥ A tributary of the Kabul river.

+ **ग्रन्थग्रन्थिः** । व्यासेन गणेशलेखने विलम्बजननाय महाभारते ग्रथिताः कठिनश्लोकाः । **आ०** १ । ११६ ॥

ग्रन्थिकः । नकुलस्य विराटनगरे नाम । **वि०** १२ । १० ॥

+ **ग्रहभेदाः** । **व०** २३० ॥

ग्रहाः । सूर्यादयो नव । **स०** ११ । २९ ॥

तेषां गतिप्रकारवर्णनं । **व०** १६४ । २६ ॥ [भा० ५ । २२ ॥]

तेषां मण्डलप्रमाणवर्णनं । **भी०** १२ । ३९–४७ ॥

ग्राहः । नक्रः । तेन द्रोणाचार्यग्रहणं । अर्जुनेन तद्धननं च । **आ०** १४३ । १२ ॥ तद्रूपाणामप्सरसामर्जुनेन नारीतीर्थादुद्धरणं । **आ०** २३७॥

घ.

घटजानुकः । ऋषिः । **स०** ४ । १९ ॥

घटसृञ्जयाः । देशः । **भी०** ९ । ६३ ॥

घटोत्कचः । भीमसेनपुत्रः । भैमसेनिः । हैडिम्बः । राक्षसः । तन्माता हिडिम्बा । **आ०** ६१ । २६ ॥ ६३ । ७२ ॥ ६४ । १६६ ॥ रथयूथपयूथपः । **उ०** १७२ । ६ ॥

तन्नामनिर्वचनं । **आ०** १६९ । १३ ॥

तस्य भीष्मेण सह तेनाम्बां ग्राहयितुं युद्धं । **उ० १७९—१८५ ॥**

तस्य पराजयो भीष्मेण । **उ० १८५ । ८ ॥**

तस्मिन्कर्णस्य शस्त्रविद्याभ्यासः । **क० ३६ । ५ ॥**

तेन कर्णाय शापदानं । **क० ३६ । १० ॥ शां० ३ । १ ॥ ३० ॥**

तेन कार्तवीर्यार्जुनबाहुच्छेदः । **शां० ४८ । ४७ ॥**

तस्य कर्णोत्सङ्गे शिरोनिधाय शयनं । **शां० ३ । ५ ॥**

तस्य वसिष्ठेन संवादः । **अनु० १३० । ३८ ॥**

+ परशुरामास्त्रप्रयोगः । कर्णेन । **क० ६७ । ४८ ॥**

परान्ताः । देशः । **भी० ९ । ४७ ॥**

परावसुः । रैभ्यऋषिपुत्रः अर्वावसोर्भ्राता । **व० १३७ । १३ ॥** विश्वामित्रस्य पौत्रः । **शां० ४८ । ५७ ॥**

तद्भार्योपभोगो बलात्कारेण यवक्रीतेन । **व० १३८ । २ ॥**

तेन बृहद्द्युम्नराजस्य याजनं । **व० १४० । २ ॥**

१ पराशरः । शक्तेः पुत्रः । वसिष्ठस्य पौत्रः । तन्माता अदृश्यन्ती । तस्योत्पत्तिः । **आ० १९४ । १ ॥ स० ७ । १० ॥**

तन्नामनिर्वचनं । **आ० १९४ । ३ ॥**

तस्मात्सत्यवत्यां व्यासोत्पत्तिः । **आ० ६४ । १२६ ॥** अधिकपाठे ५० ॥ ११४ । ३४ ॥

तेन रुद्रमाहात्म्यकथनं । **अनु० ४९ । ४० ॥**

तेन स्वपितरं शक्तिऋषिं राक्षसहतं ज्ञात्वा लोकविनाशाय यत्नः । **आ० १९४ । ९ ॥**

तेन वसिष्ठवचनाल्लोकविनाशनयत्नान्निवृत्य राक्षसनाशाय यज्ञारम्भः । **आ० १९७ । १ ॥** [विष्णु० १ । १ ॥ लिङ्गपु० ६४ ॥]

तस्य वचनं । **अनु० १४६—१५२ ॥**

तस्य जनकेन संवादः । इयमेव पराशरगीता । **शां० २९६–३०४ ॥**

२ पराशरः । सर्पः । **आ० ५७ । १९ ॥**

१ परिक्षित् । (परीक्षित्) । क्षत्रियः । सो० वं० अनश्रुषः पुत्रः । तन्माता अमृता । तद्भार्या सुवेषा । तत्पुत्रो भीमसेनः । **आ० ६३ । ४४ ॥**

२ परिक्षित् । क्षत्रियः । सो० वं० अविक्षतः पुत्रः । तद्भ्रातरः शबलाश्वादयः । तत्पुत्राः कक्षसेनादयः । **आ० १०१ । ४० ॥**

३ परिक्षित् । क्षत्रियः । सू० वं० तत्पुत्राः शलो दलो बलश्चेति त्रयः । सुशोभनानाम्न्यां मण्डूककन्यायां जाताः । **व० १९५ । ३८ ॥**

४ परिक्षित् । क्षत्रियः । सो० वं० अर्जुनपुत्रस्याभिमन्योः पुत्रः । तन्माता विराटराजदुहिता उत्तरा । **आ० ६३ । ८२ ॥** कृपाचार्यस्य शिष्यः । **आ० ४९ । १३ ॥**

तस्य मातृगर्भे प्रयुक्तेनाश्वत्थाम्नो ब्रह्मास्त्रेण मृतस्य श्रीकृष्णेनोज्जीवनं । **अश्व० ६९ । २५ ॥**

तस्योत्पत्तिः । **आ० ६८ । १३३ ॥** [भा० १ । १२ ॥]

तन्नामनिर्वचनं । **आ० ६३ । ८५ ॥**

तद्भार्या भद्रवती । तत्पुत्राः जनमेजयः श्रुतसेनः उग्रसेनः भीमसेन इति चत्वारः । **आ० ३ । १ ॥ ६३ । ८६ ॥**

तस्य राज्याभिषेकः । **महा० १ । ७ ॥**

तस्य मृगयागमनं । **आ० ४० । ११ ॥ ४९ । २२ ॥**

तेन शमीकऋषेः स्कन्धे स्वधनुष्कोट्या मृतसर्पप्रक्षेपणं । **आ० ४९ । ३० ॥**

तस्य शमीकर्षिपुत्रेण शृङ्गिणा तक्षकदंशनशापदानं । **आ० ४१ । १२ ॥ ५० । ८ ॥** [भा० १ । १८ ॥]

[तस्य कथा । भा० १ । १६—१९ ॥]

तस्य विषपरिजिहीर्षया कश्यपऋषेर्गमनं । **आ० ४२ । ३४ ॥ ५१ । १७ ॥**

तस्य तक्षकेण दंशनं । **आ० ४३ । ३६ ॥ ५१ । २९ ॥** [भा० १२ । ६ ॥ देवीभा० २ । १० ॥]

परिप्लवतीर्थं । व० ८१ । १२ ॥

परिबर्हः । गरुडपुत्रः । **उ० १०१ । १३ ॥**

परिश्रवाः । क्षत्रियः । सो० वं० भीमसेनस्य पुत्रः । तन्माता सुकुमारी । तद्भार्या शैब्या सुन्दरी । तत्पुत्राः देवापिः शान्तनुः बाह्लीकश्चेति त्रयः । अस्य प्रतीप इत्यपि नाम । **आ० ६३ । ४७ ॥** तस्य गङ्गया सह विवाहविषये विवादः । **आ० १०३ ॥**

पर्जन्यः । देवगन्धर्वः । **आ० ६६ । ४४ ॥**

पर्णजङ्घः । विश्वामित्रपुत्रः । **अनु० १७ । ५२ ॥**

१ पर्णादः । ऋषिः । **स० ४ । १९ ॥**

२ पर्णादः । ब्राह्मणः । दमयन्त्या दूतः । **व० ६८ । १ ॥**

पर्णाशा । काचन नदी । **स० ९ । २५ ॥ भी० ९ । ३१ ॥** तस्याः शीततोयेति नामान्तरं । तस्यां वरुणाज्जातः पुत्रः श्रुतायुधः । सः श्रीकृष्णं प्रति प्रयुक्तया तत्पराक्रमसहनाक्षमतया प्रतिनिवृत्तया स्वगदयैव हतः । **द्रो० ९२ । ४४॥** The river Banas in Rajputana; a tributary of the Chambal.

पर्वणः । राक्षसः । **व० २८६ । २ ॥**

पर्वतः । नारदस्य भागिनेयः **शां० २९ । २६ ॥ स० ४ । २१ ॥ ७ । १० ॥ १० । २७ ॥**

तेन नारदाय वानरमुखप्राप्तिशापदानं । **शां० २९ । २५ ॥**

तत्कृतः पुष्करास्तेयशपथः । **अनु० १४३ । ३४॥**

+ पर्वतानां नामानि । भी० ६ । ९ ॥ अनु० २७१ । ३० ॥

पर्वसङ्ग्रहः । आ० २ । ४१ ॥

पर्वसङ्ग्रहपर्व । आ० २ ॥

पवित्रपाणिः । ब्रह्मर्षिः । **स० ४ । २१ ॥ ७ । १२ ॥**

पवित्रा । नदी । **भी ९ । २१ ॥**

पशुसखः । सप्तर्षिभृत्यः कश्चन शूद्रः । तत्पत्नी गण्डा । **अनु० १४१ । ५ ॥**

तन्नामनिर्वचनं । **अनु० १४२ । ४३ ॥**

तत्कृतः पुष्करास्तेयशपथः । **अनु० १४३ । ४० ॥**

× पश्चात्तापः । अनुतापः । तस्य पापपरिहारकत्वं । **अनु० १७४ । ४ ॥**

+ पश्चिमदिग्वर्णनं । उ० ११० ॥

+ पश्चिमदिग्विजयः । नकुलेन । **स० ३५ ॥**

पह्लवाः । देशः । **भी० ९ । ६८ ॥**

पांसुराष्ट्राः । देशः । तदधिपतिर्वसुदानः । **स० ७८ । १०६ ॥**

पाञ्चजन्यः । श्रीकृष्णस्य शङ्खः । **उ० १५१ । ७० ॥ भी० २५ । १५ ॥**

पाञ्चरात्रं । पञ्चरात्रशब्दं पश्यत ।

पाञ्चालः । द्रुपदः । तत्पुत्रो धृष्टद्युम्नश्च ।

पाञ्चालाः । पञ्चालशब्दं पश्यत ।

पाञ्चाल्यः । आरुणिनामा ऋषिः । **आ० ३ । २७ ॥**

पाटलावती । नदी । अनूपदेशस्य समीपे पारियात्रपर्वतादुत्पन्ना चर्मण्वत्या उपनदी । **भी० ९ । २२ ॥** The Kali-Scind, a branch of the Chambal.

पाणिखातं । तीर्थं । **व० ८१ । ८९** ॥
पाण्डरः । सर्पः । **आ० ५७ । ११** ॥
पाण्डवाः । क्षत्रियाः । सो० वं० पाण्डुराजपुत्राः । तेषु युधिष्ठिरः भीमसेनः अर्जुनः इतित्रयः कुन्त्यां यमानिलेन्द्रेभ्यो जाताः । नकुलः सहदेवः इति द्वौ माद्र्यां अश्विनोर्जातौ ।
तेषामुत्पत्तिः । **आ० ६३ । ६४ ॥ ६४ । १५८** ॥
तेषां देवांशत्वं । **आ० ६८ । ११०** ॥
तेषां नामकरणं । **आ० १३३ । २१** ॥
तेषामुपनयनं । **आ० १३३ । ४६** ॥
तेषां शुकनामकऋषितो धनुर्विद्याभ्यासः । **आ० १३३ । ५१** ॥
तत्पितृमरणं । **आ० १३४ । २६** ॥
तेषामायुष्यकथनं । **आ० १३४ । २** ॥
तेषां हास्तिनपुरगमनं । **आ० १३४ । २** ॥
तेषां धृतराष्ट्राज्ञया वारणावतगमनं । **आ० १५५ । २२** ॥
तेषां जतुगृहे वासः । **आ० १५९ । १७** ॥
तेषां जतुगृहान्निर्गतानां रात्रौ गङ्गोत्तरणं । **आ० १६१ । २२** ॥
तेषां हिडिम्बवनगमनं । **आ० १६३ । १९** ॥
तेषां शालिहोत्राश्रमे निवासः । तत्र व्यासागमनं च । **आ० १६८ । ३२ ॥ १७० । १** ॥
तेषामेकचक्रानगरगमनं । **आ० १७० । ११** ॥
तेषां ब्राह्मणवचनात् द्रौपदीस्वयंवरार्थं गमनं । **आ० १८३ । १२** ॥
तैर्मध्येमार्गे गन्धर्वचोदनया उत्कोचकतीर्थे धौम्यस्य पौरोहित्येन वरणं । **आ० १९९ । ८** ॥
तेषां द्रुपदनगरे कुम्भकारगृहे निवासः । **आ० २०० । ६** ॥
तेषां द्रौपदीपाणिग्रहणं । **आ० २१५** ॥
तेषां समातृभार्याणां इन्द्रप्रस्थगमनं । **आ० २२७ । १९** ॥
तेषां समीपे द्रौपदीविषये समयकरणचोदनार्थं नारदस्यागमनं । **आ० २२८ । ९** ॥
तैर्द्रौपदीविषये समयकरणं । **आ० २३२ । २८** ॥
तेषां सामवेदित्वं । **स० १०२ । २२** ॥
तेषां द्यूतजितानां वनगमनकाले चेष्टाविशेषाः । **स० १०२ । ४** ॥
तेषां काम्यकवने वासः । **व० ५ । ४** ॥
तेषां द्वैतवने प्रवेशः । **व० २४ । १०** ॥
तेषां लोमशेन कैलासगिरिगमनचोदना । **व० १४१ । ११** ॥
तेषां बदरिकाश्रमगमनं । **व० १४७ । १५** ॥
तैर्गन्धर्वबद्धस्य दुर्योधनस्य मोचनं । **व० २४७ । १५** ॥
तेषां गन्धमादनपर्वतगमनं । **व० १५९ । ४३** ॥
तेषामज्ञातवासार्थं विराटनगरगमनं । **वि० ६** ॥
तेषां श्मशानवृक्षे धनुषां निक्षेपः । **वि० ७ । ४०** ॥
तेषामज्ञातवासे क्रमेण प्रसिद्धनामानि । **वि० २ । २३ ॥ ३ । ८ ॥ ४४ ॥ ४ । ३ ॥ ५ ॥ १५** ॥
तेषामज्ञातवासे गूढनामानि । **वि० २७ । ६६** ॥
तेषां रथाश्वध्वजवर्णनं । **उ० ५६** ॥
तेषां कुरुक्षेत्रगमनं । **उ० १५१ । ५०** ॥
तत्सेनायां रथातिरथसङ्ख्यानं । **उ० १६९** ॥
तेषां प्रशंसा कर्णेन । **द्रो० २२ । १८** ॥
तत्सेनायां निहतानां नामानि । **क० ३** ॥
तेषां दुर्योधनवधानन्तरं ओघवतीतीरे उपवेशनं । **श० ६३ । ४७** ॥
तद्वधप्रतिज्ञा अश्वत्थाम्ना दुर्योधनस्य भग्नसक्थिकस्य समीपे । **श० ६६ । ३२** ॥
तानुद्दिश्याश्वत्थाम्ना ऐषीकास्त्रप्रयोगः । **सौ० १३ । २०** ॥
तेषां राज्यशासनप्रकारः । **अश्व० १५** ॥
तेषां महाप्रस्थानगमनं । **महा० १ । २४** ॥
तेषां स्वर्गे सुखेन वासः । **स्वर्गा० ३** ॥
+ पाण्डवप्रवेशपर्व । **वि० १—१४** ॥
१ पाण्डुः । क्षत्रियः । सो० वं० विचित्रवीर्य

भार्यायामम्बालिकायां व्यासाज्जातः । आ० १ । १३० ॥ स० ८ । २५ ॥ वि० ५३ । १७ ॥
तस्योत्पत्तिः । आ० ६३ । ५७ ॥ ६४ । १५५ ॥
तस्य राज्याभिषेकः । आ० ११८ । ३० ॥
तस्य दिग्विजयः । आ० १२२ । २१ ॥
तस्य कुन्त्या विवाहः । आ० १२१ । ९ ॥
तस्य माद्र्या विवाहः । आ० १२२ । १८ ॥
तस्य मृगयार्थं वनगमनं । आ० १२३ । ७ ॥
तस्य किन्दमऋषिणा शापदानं । आ० ६३ । ६१ ॥ १२३ । ३४—३८ ॥
तस्य माद्रीसंगमेन मरणं । आ० ६३ । ६७ ॥ १३४ । २६ ॥
तदस्थिसंस्कारः पाण्डवैः । आ० १३६ । ५ ॥
२ पाण्डुः । क्षत्रियः । सो० वं० तृतीयस्य जनमेजयस्य पुत्रः । तद्भ्रातरो धृतराष्ट्रादयः सप्त । आ० १०१ । ४४ ॥
पाण्डुराष्ट्राः । देशः । पाण्ड्यदेशस्य नामान्तरं । भी० ९ । ४४ ॥ Pandya—the modern districts of Tinnevelly and Madura in South India. Its capitals at different periods were Uragapura now called Negapatam and Madura.
पाण्ड्यः । चित्राङ्गदायाः पिता । द्रविडेश्वरः । अश्वत्थाम्ना हतः । अस्य प्रवीरः चित्रवाहनः मलयध्वज इति च नामान्तराणि । क० ५६ । ४५ ॥
तस्य युद्धं । क० ५५ । ६० ॥
पाण्ड्याः । पाण्डुराष्ट्रशब्दं पश्यत ।
+ पाताललोकवर्णनं । उ० ९९ । [भा० ५ । २४ ॥ देवीभा० ८ । १९–२० ॥]
+ पात्रापात्रलक्षणं । अनु० ७२ ॥ शां० ३५ । ३६ ॥
+ पापं । तत्फलभोगः । व० १८६ । १८ ॥ अनु० २२०—२२३ ॥

तस्य प्रायश्चित्तं । शां० ३३ ॥ ३४ ॥ १६३ । ४६ ॥ अनु० १७४ ॥
तत्कर्मणः फलं बालस्य द्वादशवर्षपर्यन्तं नास्ति । आ० ११७ । १५ ॥
पापहरा । नदी । भी० ९ । २२ ॥
पारदाः । देशः । स० ७८ । ७९ ॥
पारसिकाः । देशः । भी० ९ । ६६ ॥
पारावतः । सर्पः । आ० ५७ । ११ ॥
पारावताश्वः । धृष्टद्युम्नः । भी० ६१ । १६ ॥
पाराशर्यः । व्यासः ।
पारिजातः । देवतरुः । कल्पवृक्षः । क्षीरसमुद्रादुत्पन्नः । आ० १८ । ५१ ॥
तस्यापहारः श्रीकृष्णेन । स० ५७ । ४१ ॥ [भा० १० । ५९ ॥ हरि० २ । ६४ ॥]
१ पारियात्रः । कुलपर्वतः । भी० ९ । ११ ॥ Pariyatra, the western part of Vindhya range extending from the source of the Nerbada to the Gulf of Cambay. It included the Aravali mountains.
२ पारियात्रः । सर्पः । आ० ५७ । ११ ॥
पार्थः । अर्जुनः । वि० ४३ । २१ ॥
पालः । सर्पः । आ० ५७ । ५ ॥
+ पालाशविधिः । अश्व० ११८ । २—६ ॥
पावकः । अग्निविशेषः । व० २२४ । १ ॥
पावनी । नदी । भी० ६ । ४९ ॥ The river Iravadi in Burma.
पाशाशिनी । नदी । भी० ९ । २२ ॥
पाशिवाटाः । देशः । भी० ९ । ६४ ॥
पाशी । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० १३१ । ८ ॥ क० ४६ । ७ ॥
+ पाशुपतास्त्रं । रुद्रदेवताकमस्त्रं । तत्प्राप्तिरर्जुनस्य । व० ४० । ८—२१ ॥ १६८ । ४६ ॥ द्रो० ८१ । १८ ॥
पिङ्गतीर्थं । व० ८० । ५९ ॥
पिङ्गलः । सर्पसत्रे सदस्यः । आ० ५३ । ६ ॥

पिङ्गलकः । यक्षः । **स० १० । १८ ॥**
पिङ्गला । वेश्या । **शां० १७३ । ५८ ॥** [भा० ११ । ८ ॥]
पिच्छलः । सर्पः । **आ० ५७ । ६ ॥**
पिच्छिला । नदी । **भी० ९ । २९ ॥**
पिञ्जरकः । सर्पः । **आ० ३५ । ६ ॥ उ० १०३ । ११ ॥**
पिञ्जला । नदी । **भी० ९ । २७ ॥**
पिठरः । असुरः । **स० ९ । १७ ॥**
पिठरकः । सर्पः । **आ० ३५ । १४ ॥ ५७ । १५ ॥**
+ **पिण्डदानं** । पितृभ्यः । **अनु० १८८ । २३ ॥** मध्यमपिण्डस्य पत्न्या भोजने पुत्रोत्पत्तिः । **अनु० १८८ । ३८ ॥** पिण्डत्रयस्य प्रयोजनं । **अनु० १८८ । २५ ॥**
पिण्डसेक्ता । सर्पः । **आ० ५७ । ८ ॥**
पिण्डारः । सर्पः । **आ० ३५ । ११ ॥ ५७ । १७ ॥**
१ **पिण्डारकः** । सर्पः । **आ० ३५ । ११ ॥ ५७ । १७ ॥**
२ **पिण्डारकः** । क्षत्रियः । यादवः । **आ० २०१ । २० ॥**
पिण्डारकं । तीर्थं । **व० ८० । ६६ ॥ ८६ । २१ ॥**
पितरः । अग्निष्वात्तादयः **स० ८ । ३० ॥** [हरि० १ । १८ ॥ मत्स्य० १३–१५ ॥]
तेषां पिण्डसंज्ञाप्राप्तिः । **शां० ३५५ । २० ॥**
तद्व्रणापनोदनं । **शां० १२९ । १० ॥**
पितामहः । भीष्मः । **भी० १०७ । ५१ ॥**
पिनाकी । एकादशरुद्रेष्वन्यतमः । **आ० ६७ । २ ॥**
पिप्पलादः । ऋषिः । दधीचपुत्रः । **शां० ४६ । १० ॥**
पिशङ्गः । सर्पः । **आ० ५७ । १७ ॥**
+ **पिशाचादिपीडापरिहारोपायः** । **अनु० १९४ ॥**
पिशाची । **व० २३० । २८ ॥**
पुच्छाण्डकः । सर्पः । **आ० ५७ । ८ ॥**
पुञ्जिकस्थला । अप्सराः । **आ० १३२ । ४६॥ स० १० । ११ ॥**
१ **पुण्डरीकः** । क्षत्रियः । यमसभायां । **स० ८ । १४ ॥**
२ **पुण्डरीकः** । ब्राह्मणः । तस्य नारदेन सह नारायणस्य सर्वोत्तमत्वे संवादः । **अनु० १८६ । ३ ॥**
पुण्डरीकतीर्थं । **व० ८१ । ८३ ॥**
पुण्डरीका । अप्सराः । **आ० १३२ । ४५ ॥ वि० १४ । ३२ ॥**
पुण्डरीकाक्षः । श्रीकृष्णः । तन्नामनिर्वचनं । **उ० ६९ । ६ ॥**
पुण्ड्रः । क्षत्रियः । बलिनामकस्य राज्ञो भार्यायां सुदेष्णायां दीर्घतमसो जातः पुत्रः । तद्भ्रातरः अङ्गादयः । **आ० ११३ । ५३ ॥**
+ **पुण्यं** । सुकृतं । तत्फलभोगः । **व० १८६ ॥**
+ **पुत्राणां प्रभेदः** । **आ० १२६ । ३० ॥ अनु० ८४ ॥** तन्नामनिर्वचनं । **आ० ७९ । २६ ॥ ९८ । २० ॥ २५५ । १४ ॥**
+ **पुत्र्या दायविभागः** । **अनु० ८० । ११ ॥**
+ **पुनर्द्यूतं** । पाण्डवानां । **स० ९८ । ६ ॥**
+ **पुनःस्वयंवरः** । दमयन्त्याः । **व० ६८ । २५॥**
पुरन्दरः । इन्द्रः ।
पुरमालिनी । नदी । **भी० ९ । २१ ॥**
+ **पुरलक्षणं** । **शां० ८६ ॥**
+ **पुराणं** । ऋषिप्रोक्तः वेदार्थनिर्णायको ग्रन्थविशेषः । **आ० १ । २३ ॥** [तेच अष्टादश । तेषां नामानि ग्रन्थसङ्ख्या च । भा० १२ । १३॥ मत्स्य० ५३ ॥ देवीभा० १ । ३ ॥]
पुरावती । नदी । **भी० ९ । २४ ॥**

पुरुः । क्षत्रियः । **स० ४ । ३३ ॥**
पुरुकुत्सः । क्षत्रियः । सू० वं० । **स० ८ । १३॥** तत्पुत्रः । अनरण्यः । **अनु० १७७ । ६६ ॥** [अयं मान्धातुः पुत्रः । तन्माता बिन्दुमती । भा० ९ । ६ ॥]
पुरुजित् । क्षत्रियः । कुन्तिभोजस्य पुत्रः । पृथाया भ्राता । अतिरथः । **उ० १७२ । २ ॥ भी० २५ । ५ ॥** द्रोणेन हतः । **क० ३ । २२ ॥**
पुरुमित्रः । क्षत्रियः । दुर्योधनपक्षीयः । **भी० ५७ । ३१ ॥**
पुरुमीढः । क्षत्रियः । सो० वं० भुमन्युपुत्रस्य सुहोत्रस्य पुत्रः । **आ० १०१ । १८ ॥**
+ **पुरुषशब्दनिर्वचनं** । **शां० २१२ । ५२ ॥**
पुरुषोत्तमः । श्रीकृष्णः । तन्नामनिर्वचनं । **उ० ६९ । ११ ॥**
पुरूरवाः । क्षत्रियः । सोमपुत्रस्य बुधस्य पुत्रः । इलायां जातः । तत्पुत्राः आयुः धीमान् अमावसुः दृढायुः वनायुः शतायुश्च उर्वश्यां जाताः । **आ० ६९ । २१—२७ ॥** तेषु मुख्य आयुः । **आ० ६३ । ५ ॥**
[तस्य कथा । भा० ९ । १४ ॥ हरि० १ । २६ ॥ मत्स्य० २४ ॥ वायु० ९१ ॥ देवीभा० १ । १३ ॥]
[तस्य वंशः । भा० ९ । १५ ॥ हरि० १ । २७ ॥ वायु० ९१ ॥ मत्स्य० १२ ॥]
तत्कृतः पुष्करास्तेयशपथः । **अनु० १४३ । २२ ॥**
पुरोचनः । दुर्योधनमन्त्री । तेन जतुगृहनिर्माणं । **आ० १५६ । ३ ॥**
तस्य जतुगृहे दाहः । **आ० १६० । ६ ॥**
पुरोहितः । उपाध्यायः । तस्य राज्ञश्च कथा । **अनु० ३१ । ४६ ॥**
तस्य लक्षणं । **शां० ७३ । २ ॥**
पुलस्त्यः । ब्रह्मणो मानसः पुत्रः । **आ० ६६ । १० ॥**
[तद्भार्या कर्दमप्रजापतिसुता हविर्भुक् । तत्पुत्रः अगस्त्यः । तस्य इडिविलायां जातः पुत्रः कुबेरः । केशिन्यां जाताः पुत्राः रावणादयः । **भा० ४ । १ ॥**]
[तस्य भार्या प्रीतिः । तत्पुत्रो दम्भोलिः । विष्णु० १ । १० ॥]
तस्य भार्या सन्ध्या । **उ० ११७ । ११ ॥** अन्या तद्भार्या प्रतीच्या । **उ० ११७ । १६ ॥**
तस्य भीष्मेण संवादः । **व० ७९ । १५ ॥**
तत्प्रार्थनया राक्षसवधार्थं पराशरेणारब्धस्य यज्ञस्य समापनं । **आ० १९७ । २२ ॥**
तस्य पुत्राः । **आ० ६७ । ७ ॥**
पुलस्त्येन तीर्थमहिमानुवर्णनं । **व० ८० ॥**
पुलहः । ब्रह्मणो मानसः पुत्रः । **आ० ६६ । १० ॥ ६७ । ४ ॥ स० ७ । १७ ॥ ११ । १८ ॥**
तस्य पुत्राः । **आ० ६७ । ८ ॥**
पुलिनः । अमृतरक्षको देवः । **आ० ३२ । १९ ॥**
पुलिन्दाः । देशः । **भी० ९ । ३९ ॥** This included the western portion of Bundelkhand and the district of Sagar.
१ **पुलोमा** । दनुपुत्रः । **आ० ६६ । २२ ॥**
२ **पुलोमा** । राक्षसः । तेन भृगुपत्न्याः पुलोमाया अपहारः । **आ० ५ । १५ ॥**
३ **पुलोमा** । भृगोः पत्नी । **आ० ५ । १३ ॥** तत्पुत्रश्च्यवनः । **आ० ६ । २ ॥**
४ **पुलोमा** । दैत्यस्त्री । तत्पुत्राः पौलोमाः । **व० १७५ । ७ ॥**
१ **पुष्करः** । वरुणस्य पुत्रः । तद्भार्या सोमस्य पुत्री ज्योत्स्नाकाली । **उ० ९८ । १२ ॥**
२ **पुष्करः** । पर्वतः । **भी० १२ । २४ ॥**
३ **पुष्करः** । नलराजस्य ज्ञातिः । **व० ५६ । ७ ॥**
तेन नलस्य द्यूते पराजयः । **व० ५६ । १० ॥**
तस्य नलेन पराजयः । **व० ७८ । १९ ॥**
४ **पुष्करः** । क्षेत्रं । **व० ८० । २० ॥** तस्य

त्रेतायां पुण्यतमत्वं । व० ८३ । ९० ॥ अनु० ६४ । ९ ॥ The Pushkar, a lake six miles from Ajmer. It is called also Pokhra.

पुष्करमालिनी । सत्यनामकस्योञ्छवृत्तेर्भार्या । **शां० २७८ । ६ ॥**

पुष्करिणी । भुमन्योर्भार्या । **आ० १०१ । १३ ॥**

पुष्टिः । दक्षप्रजापतिपुत्री । धर्मप्रजापतेर्भार्या । **आ० ६७ । १४ ॥**

पुष्टिपतिः । अग्निविशेषः । **व० २२३ । १ ॥**

पुष्पकं । कुबेरस्य विमानं । **स० ५० । २६ ॥** तस्य रावणेनापहारः । **व० २७६ । ३४ ॥** तस्य कुबेरं प्रति रामेण प्रेषणं । **व० २९२ । ७० ॥**

पुष्पवती । नदी । **व० ८३ । १२ ॥**

पुष्पाननः । यक्षः । **स० १० । १८ ॥**

पुष्पोत्कटा । रावणकुम्भकर्णयोर्माता । **व० २७६ । ७ ॥**

पुंश्चली । कुलटा । तत्त्वापादकानि कर्माणि । **अनु० २२२ । १ ॥**

पुंस्त्वं । पुंसो भावः । तस्य कर्मायत्तत्वं । **अनु० २२६ । ४ ॥**

पूजनी । शकुन्तिका । तस्याः ब्रह्मदत्तेन संवादः । **शां० १३९ ॥** [हरि० १ । २० ॥]

पूतना । स्कन्दमातृगणेऽन्यतमा । **व० २३० । २७ ॥**
[तस्या वधः श्रीकृष्णेन । भा० १० । ६ ॥ हरि० २ । ६ ॥ विष्णु० ५ । ५ ॥]

१ **पूरुः** । क्षत्रियः । सो० वं० ययातिपुत्रः । तन्माता शर्मिष्ठा । तत्पुत्रो जनमेजयः । तद्भार्या कौसल्या । **आ० ६३ । ८ ॥ स० ८ । ८ ॥** तद्भार्या पौष्टी । तत्पुत्राः प्रवीरः ईश्वरः रौद्राश्वः । तेषु प्रवीरो वंशकृत् । **आ० ८८ । ४ ॥** तस्य राज्याभिषेकः । **आ० ६९ । ५८ ॥ ७९ । ३८ ॥**
[तस्य वंशः । भा० ९ । २० ॥ हरि० १ । ३१ । विष्णु० ४ । १९ ॥]

२ **पूरुः** । अर्जुनस्य सारथिः । **स० ३६ । ३० ॥**

१ **पूर्णः** । सर्पः । **आ० ५७ । ५ ॥**

२ **पूर्णः** । प्राधापुत्रः । **आ० ६६ । ४६ ॥**

पूर्णभद्रः । सर्पः । **आ० ३५ । १२ ॥**

पूर्णाङ्गदः । सर्पः । **आ० ५७ । १६ ॥**

पूर्णायुः । प्राधापुत्रः । **आ० ६६ । ४६ ॥**

पूर्णमुखः । सर्पः । **आ० ५७ । १६ ॥**

पूर्वचित्तिः । अप्सराः । **आ० १२२ । ४७ ॥**

पूर्वदिग्वर्णनं । **उ० १०८ ॥**

पूर्वाभिरामा । नदी । **भी० ९ । २२ ॥**

+ **पूर्वेन्द्राः** । **आ० २१४ । २७ ॥**

पूषा । द्वादशादित्येष्वन्यतमः । **आ० ६६ । १५ ॥**

पृथा । कुन्तीशब्दं पश्यत ।

पृथाश्वः । राजर्षिः । **स० ८ । १३ ॥**

पृथिवी । भूमिः । तस्याः काश्यपीत्वं । **अनु० २५९ । ५–७ ॥** विशेषो भूमिशब्दे द्रष्टव्यः ।

पृथिवीञ्जयः । असुरः । **स० ९ । १६ ॥**

पृथिवीतीर्थं । **व० ८१ । १३ ॥**

+ **पृथिवीवासुदेवसंवादः** । ब्राह्मणमाहात्म्यविषये । **अनु० ६९ । १९ ॥** गृहस्थधर्मविषये । **अनु० १५४ ॥**

१ **पृथुः** । क्षत्रियः । यादवः । **आ० २०१ । १८ ॥ २३९ । १० ॥**

२ **पृथुः** । अष्टवसुष्वन्यतमः । **आ० १०६ । ११ ॥**

३ **पृथुः** । वेनराजस्य पुत्रः । **शां० ५८ । १०७ ॥**
[तद्भार्या अर्चिः । तत्पुत्रोऽन्तर्धानः । भा० ४ । १५ ॥ अत्रैव तद्वंशोपि द्रष्टव्यः ।]
[तच्चरित्रं । भा० ४ । १३ ॥ हरि० १ । २ ॥ विष्णु० १ । १३ ॥ वायु० ६२ ॥ मत्स्य० १० ॥ पद्म० १ । २७ ॥]

तस्य कथा। **द्रो० ६९। शां० २८।** १३७॥ **५८।** १२२॥

[तत्पौत्रः प्राचीनबर्हिः। भा० ४। २४॥ हरि० १। २॥ विष्णु० १। १४॥]

४ **पृथुः।** क्षत्रियः। सू० वं० अनेनसः पुत्रः। **व० २०५।** २॥

पृथुलाक्षः। अङ्गवंश्यः क्षत्रियः। तत्पुत्रः चम्पः। **स० ८।** १०॥

पृथुवेगः। क्षत्रियः। **स० ८।** १२॥

पृथुश्रवाः। क्षत्रियः। **स० ८।** १२॥

पृथूदकं। तीर्थं। **व० ८१।** १४२॥ **शा० ४०।** ३३॥ Pehoa where the celebrated Brahma-yoni tirtha is situated. It is fourteen miles to the west of Thaneswara.

पृश्निगर्भः। विष्णुः। तन्नामनिर्वचनं। **शा० ३५१।** ४६॥

पृषतः। क्षत्रियः। पाञ्चालदेशाधिपतिः। द्रुपदस्य पिता। **आ० १८०।** ६॥

[सः सोमकराजस्य पुत्रः। हरि० १। ३२॥ भा० ९। २२॥]

पृषदश्वः। क्षत्रियः। **स० ८।** १३॥

१ **पृषध्रः।** क्षत्रियः। वैवस्वतमनुपुत्रः। **आ० ६९।** १९॥

२ **पृषध्रः।** पाण्डवपक्षीयः क्षत्रियः। अश्वत्थाम्ना हतः। **द्रो० १५७।** १८३॥

पैङ्ग्यः। ऋषिः। **स० ४।** २३॥

पैलः। पिलिऋषेर्गोत्रापत्यं ऋषिः। **आ० ६४।** अधिकपाठे ८१॥ **स० ४।** १७॥ **शां० ४६।** ७॥

पोतकः। सर्पः। **उ० १०३।** ११॥

पौण्ड्रः। भीमसेनस्य शङ्खः। **भी० २५।** १५॥

पौण्ड्रकः। वसुदेवपुत्रः। **आ० २०१।** १२॥ **स० १४।** २०॥ **३१।** २२॥

[तस्य वधः श्रीकृष्णेन। **भा० १०।** ६६॥]

पौदन्यः। देशः। **आ० १९३।** ४९॥

पौरवः। क्षत्रियः। रथोदारः। **आ० ६८।** २८॥ **उ० १६७।** १९॥ **भी० ११६।** १५॥ **द्रो० ३७।** ६॥ २०१। ८२॥

तस्य वधोऽभिमन्युना। **द्रो० १४।** ६२॥

+ **पौरानुगमनं।** वनं गच्छतां पाण्डवानां। **व० २।** १०॥

पौलोमतीर्थं। आ० २३६। ३॥

पौलोमपर्व। आ० ४—१२॥

पौलोमाः। पुलोमायाः पुत्राः। ते चार्जुनेन हताः। **व० १७५।** १२-६३॥

पौष्टी। पूरोर्भार्या। **आ० ८८।** ४॥

पौष्यः। सू० वं० ध्रुवसन्धिनामा क्षत्रियः। तस्य कथा। **आ० ३।** ८२॥

तद्भार्यया उत्तङ्कऋषये स्वधृतदिव्यकुण्डलदानं। **आ० ३।** १११॥

पौष्यपर्व। आ० ३॥

प्रकालनः। सर्पः। **आ० ५७।** ६॥

प्रकाशः। ब्राह्मणः। तत्पिता तमः। तत्पुत्रो वागिन्द्रः। **अनु० ८।** ६३॥

प्रघसः। राक्षसः। **व० २८६।** २॥

प्रचेतसः। तेषां भार्या वार्क्षी। **आ० २११।** १५॥ [पृथुवंश्यस्य प्राचीनबर्हिषः पुत्राः। तन्माता शतद्रुती। भा० ४। २४॥]

[तेषां भार्या। वार्क्षी मारिषा। तत्पुत्रो दक्षप्रजापतिः। भा० ४। ३०॥]

प्रचेताः। वरुणः। **स० ७।** १६॥

+ **प्रजागरपर्व। उ० ३३—४०॥**

प्रजापतिः। ब्रह्मा। तस्य स्थाणुना संवादः। **शां० २६२॥**

तेन देवऋष्यसुरप्रभृतिभ्यः शिष्येभ्यः तत्तद्योग्यतानुगुणनानार्थप्रतिपादकवाक्यप्रयोगेण तत्त्वोपदेशः। **अश्व० २७॥** [इयं कथा छान्दोग्येऽष्टमाध्याये प्रसिद्धा।]

प्रज्ञा । बुद्धिः । तस्याः सुखसाधनत्वं । **शां० १७८॥**

प्रज्ञाचक्षुः । धृतराष्ट्रः । **आ० १ । १७० ॥ ६८ । ८४ ॥**

प्रज्ञानास्त्रं । **व० २९० । ५ ॥**

प्रणिधिः । अग्निविशेषः । **व० २२२ । ९ ॥**

प्रतर्दनः । काशीशः । दिवोदासस्य पुत्रः । ययातेर्दौहित्रः । तन्माता माधवी । **उ० ११७ । १८ ॥ अनु० ३७१ । ५७ ॥ स० ८ । १० ॥ व० २०१ । २ ॥**

तस्य ययातिना सह संवादः । **आ० ८६ । १४ ॥**

तस्य वीतहव्येन सह युद्धं । **अनु० ८ । ४१ ॥**

प्रतापः । क्षत्रियः । जयद्रथस्य भ्राता । **व० २६६ । ११ ॥**

प्रतिग्रहः । तस्य निन्द्यत्वं । **अनु० १४१ । १—२९ ॥**

+ प्रतिज्ञापर्व । द्रो० ७२—८४ ॥

प्रतिमत्स्याः । देशः । **भी० ९ । ५२ ॥**

प्रतिविन्ध्यः । क्षत्रियः । सो० वं० युधिष्ठिरपुत्रः । तन्माता द्रौपदी । **आ० ६३ । १४ ॥ ६४ । १६५ ॥ ६८ । १२८ ॥**

तन्नामनिर्वचनं । **आ० २४७ । ७७ ॥**

तस्य वधोऽश्वत्थाम्ना । **सौ० ८ । ६० ॥**

प्रतिश्रवाः । द्वितीयं प्रतीपशब्दं पश्यत । **आ० ६३ । ४६ ॥**

+ प्रतिश्रुतार्थाप्रदाने दोषः । अनु० ३१ ॥

प्रतिष्ठानं । हास्तिनपुरसमीपस्थं नगरं । अस्य वर्धमानपुरमित्यपि नाम । **आ० ९६ । ४६ ॥**

Bithoor, where the remains of a fort which is said to have been the fort of Raja Uttanapada still exist.

प्रतिस्मृतिः । काचन विद्या । व्यासेन युधिष्ठिरायोपदिष्टा । **व० ३६ । ३०—३८ ॥**

तदुपदेशो युधिष्ठिरेणार्जुनाय । **व० ३७ । १७ ॥**

प्रतीच्या । पुलस्त्यभार्या । **उ० ११७ । १६ ॥**

१ **प्रतीपः** । क्षत्रियः । सो० वं० षष्ठस्य धृतराष्ट्रस्य पुत्रः । तत्पुत्राः देवापिः शन्तनुः बाह्लीकश्चेति त्रयः । **आ० १०१ । ४८ ॥**

२ **प्रतीपः** । क्षत्रियः । सो० वं० भीमसेनस्य पुत्रः । तन्माता सुकुमारी । तस्य परिश्रवा इति नामान्तरं । तद्भार्या शैब्या सुनन्दी । तत्पुत्राः देवापिः शन्तनुः बाह्लिकश्चेति । **आ० ६३ । ४६ ॥** तस्य कथा । **आ० १०२—१०३ ॥**

प्रत्यग्रहः । उपरिचरवसुपुत्रः । **आ० ६४ । ४४ ॥**

प्रत्युत्पन्नमतिः । मत्स्यः । **शां० १३७ । १ ॥**

प्रत्यूषः । अष्टवसुष्वन्यतमः । प्रभातायाः पुत्रः । **आ० ६७ । १८ ॥** तत्पुत्रो देवलः । **आ० ६७ । २६ ॥**

प्रथमदिवसयुद्धारम्भः । **भी० ४४ ॥** तत्समाप्तिः । **भी० ४९ ॥**

प्रद्युम्नः । क्षत्रियः । श्रीकृष्णस्य पुत्रो रौक्मिणेयः । सनत्कुमारांशः । **आ० ६८ । १५२ ॥**

[तस्योत्पत्तिः । भा० १० । ५५ ॥]

[तस्य भार्या रुक्मिपुत्री रुक्मवती । तत्पुत्रोऽनिरुद्धः । भा० १० । ६१ ॥]

[तस्यान्या भार्या पूर्वदेहे रतिः शापात् शम्बरासुरभार्यात्वेन प्रसिद्धिं गता मायावती । भा० १० । ५५ ॥ विष्णु० ५ । २७ ॥ हरि० २ । १०४ ॥]

[तेन शम्बरासुरवधः । भा० १० । ५५ ॥ हरि० २ । १०७ ॥]

तस्य पुत्रोऽनिरुद्धः । **स० ६० । ८ ॥**

तस्य सारथिः दारुकपुत्रः । **व० १८ । ३ ॥**

तस्य वधः । **मौ० ४ ॥**

प्रद्योतः । यक्षः । **स० १० । १६ ॥**

प्रद्वेषी । दीर्घतमस ऋषेः पत्नी । तत्पुत्रा गौतमादयः । **आ० ११३ । ३२ ॥**

प्रधानः। राजर्षिः। तत्पुत्री सुलभा। **शां०** ३२५। १८३॥

प्रभङ्करः। क्षत्रियः। जयद्रथभ्राता। **व०** २६६। ११॥

प्रभञ्जनः। क्षत्रियः। मणलूरेश्वरस्य मूलपुरुषः। **आ०** २३५। २१॥

१ **प्रभा**। देवमाता। **स०** ११। ४१॥

२ **प्रभा**। अप्सराः। **अनु०** ५०। ४८॥

प्रभाता। प्रत्यूषप्रभासयोर्माता। **आ०** ६७। २०॥

१ **प्रभावती**। देवशर्मपत्न्या रुच्या ज्येष्ठा भगिनी। अङ्गेश्वरस्य चतुर्थस्य चित्ररथस्य भार्या। **अनु०** ७७। ८॥

२ **प्रभावती**। स्वयंप्रभाशब्दं पश्यत। **व०** २८३। ४१॥

१ **प्रभासः**। अष्टवसुष्वन्यतमः। तद्भार्या बृहस्पतिभगिनी। तत्पुत्रो विश्वकर्मा। **आ०** ६७। २७॥

२ **प्रभासः**। तीर्थं। **व०** ११९। १५॥ ८०। ६०॥ **श०** ३६। ३४॥ Somnath in Guzerat. A sacred place of pilgrimage to the Hindus, the celebrated temple of Somnath.

तत्र श्रीकृष्णस्य गमनं। **आ०** २३८। २२॥ **व०** ११९। १५॥

तत्रार्जुनस्य तीर्थयात्रार्थं गमनं। **आ०** २३८। २॥ तत्र वृष्णीनां गमनं। **मौ०** ४। १०॥

तत्र वनवासे पाण्डवानां गमनं। **व०** ११९। १५॥

प्रमतकः। जनमेजयस्य सर्पसत्रे सदस्यः। **आ०** ५३। ७॥

प्रमतिः। ऋषिः। च्यवनस्य पुत्रः। तन्माता सुकन्या। तत्पुत्रो रुरुः घृताच्यां जातः। **आ०** ८। ११॥ ५८। ३१॥

स वागिन्द्रस्य पुत्रः। **अनु०** ८। ६४॥

प्रमथः। क्षत्रियः। सो० वं० धृतराष्ट्रस्य पुत्रः। **आ०** १३१। १३॥

+ **प्रमथगणः**। रुद्रस्य स्कन्दस्य च पार्षदाः। तेषामुपद्रवकारणं तत्परिहारोपायश्च। **अनु०** १९४॥

प्रमद्वरा। प्रमतिपुत्रस्य रुरोर्भार्या। मेनकायां विश्वावसोर्जाता। तस्याः पोषकः पिता स्थूलकेशः ऋषिः। **आ०** ८। २॥ **अनु०** ८। ६५॥ तन्नामनिर्वचनं। **आ०** ८। १३॥

प्रमाणः। वटवृक्षः। तत्र पाण्डवानां गमनं। **व०** १। ४१॥

प्रमाणकोटिः। गङ्गास्थो ह्रदः। तत्र भीमसेनस्य दुर्योधनादिभिः पातनं। **आ०** ६१। १२॥ १३७। ४०॥ १३८। २१॥

प्रमाथिनी। अप्सराः। **आ०** १२२। ४५॥

प्रमाथी। क्षत्रियः। सो० वं० धृतराष्ट्रस्य पुत्रः। **आ०** १३१। १३॥ तस्य भीमसेनेन वधः। **द्रो०** १५८। १९॥

प्रमोदः। सर्पः। **आ०** ५७। ११॥

प्रम्लोचा। अप्सराः। **आ०** १२२। ४७॥ **स०** १०। १२॥

प्रयागः। क्षेत्रं। **व०** ८३। ६९॥ Allahabad

प्रयुतः। देवगन्धर्वः। **आ०** ६६। ४३॥

प्ररुजः। अमृतरक्षको देवः। तेन सह गरुडस्य युद्धं। **आ०** ३२। १९॥

प्रलम्बः। दानवः। **आ०** ६६। २९॥ **स०** ५१। ७॥

[तस्य वधो बलरामेण। भा० १०। १८॥ हरि० २। १४॥ विष्णु० ५। ९॥]

+ **प्रलयवर्णनं**। **व०** १९१। ६५॥ **शां०** ३१७॥ **अनु०** ३९। १-१८॥ [भा० १२। ४॥]

प्रवरा। नदी। **भी०** ९। २३॥

प्रवालकः। यक्षः। **स०** १०। १८॥

१ **प्रवीरः**। क्षत्रियः। पाण्ड्यराजः। चित्राङ्गदायाः पिता। अस्य मलयध्वज इति चित्रवाहन इति

च नामान्तरे । अश्वत्थाम्ना हतः । **क० ५६ । १—४४ ॥**

२ **प्रवीरः** । सो० वं० पूरोः पुत्रः । तत्पत्नी शूरसेनी । तत्पुत्रो मनस्युः । **आ० ८८ । ४ ॥**

प्रशमी । अप्सराः । **अनु० ५० । ४८ ॥**

१ **प्रसेनजित्** । क्षत्रियः । तत्पुत्री जमदग्नि-ऋषिपत्नी रेणुका । **व० ११७ । २ ॥** अस्य रेणुरिति नामान्तरं ।

२ **प्रसेनजित्** । क्षत्रियः । यादवः । **स० १४ । ६४ ॥** अयं सत्राजितो भ्राता । तस्य प्रसेन इत्यपि नाम ।

प्रस्थलः । देशः । **द्रो० १७ । १९ ॥**

प्रस्वापनास्त्रं । भीष्मस्य । **उ० १८४ । २३ ॥**

प्रहस्तः । रावणमन्त्री । विभीषणेन हतः । **व० २८७ । १-४ ॥**

प्रहासः । सर्पः । **आ० ५७ । १६ ॥**

प्रह्रादः । प्रह्लादशब्दं पश्यत ।

प्रह्लादः । हिरण्यकशिपोः पुत्रः । तत्पुत्राः विरोचनः कुम्भः निकुम्भश्च । **आ० ६६ । १९ ॥ स० ११ । १९ ॥** [भा० ७ । ४ ॥ तत्पुत्री विश्वरूपाचार्यस्य माता रचना । भा० ६। ६ ॥ तस्याः विरोचनेत्यपि नाम । वायु० ८४॥]

तस्य भ्रातरः संह्लादः अनुह्लादः शिबिः बाष्कलश्च । **आ० ६६ । १८ ॥** [तन्माता कयाधूः । भा० ६ । १८ ॥]

तस्य हंसेन संवादः । **उ० ३५ । ३२ ॥**

तस्य महाबलिना संवादः । **व० २८ ॥**

तस्येन्द्रेण संवादः । **शां० १२४ । १९ ॥ २२९ ॥**

तस्य आजगरेण ऋषिणा संवादः । **शां० १७७ ।** [भा० ७ । १३ ॥]

[तस्य चरित्रं । भा० ७ । ४—८ । विष्णु० १ । १७ ॥]

प्रह्लादाः । देशः । **भी० ९ । ४६ ॥**

प्राकोटकाः । जनाः । **स० ३२ । १४ ॥**

प्राग्ज्योतिषं । पुरं । तस्य राजा नरकासुरपुत्रो भगदत्तः । **स० २७ । १६ ॥ ५५ । ३२ ॥**

Kamrup or Kamakshya in Assam.

प्राचीनबर्हिः । क्षत्रियः । अत्रिवंशसमुद्भवः । तत्पुत्राः दश प्रचेतसः । **शां० २०७ । ६ ॥**

[अयं पृथुराजस्य प्रपौत्रः। अन्तर्धानस्य (हविर्धानस्य) पुत्रः । तद्भार्या शतद्रुती । भा० ४ । २४ ॥ हरि० १ । २ ॥ विष्णु० १ । १४ ॥]

[तस्मै नारदेन अजामिलोपाख्यानकथनं । भा० ४ । २५—२९ ॥]

प्राचीन्वान् । क्षत्रियः । सो० वं० पूरोः पुत्रस्य जनमेजयस्य पुत्रः । तद्भार्या आश्माकी । तत्पुत्रः शर्यातिः । **आ० ६३ । १० ॥**

प्राचीसरस्वती । नदी । **श० ३८ । ३६ ॥**

प्राचेतसः । प्राचीनबर्हिषः पुत्रा दश । तेषां पुत्रो दक्षः । **आ० ६९ । ७-८ ॥ शां० २०७।६॥**

तद्भार्या वार्क्षी मारिषानाम्नी । **आ० २११ । १५ ॥** [भा० ४ । ३० ॥]

प्राच्याः । देशः । **भी० ९ । ५८ ॥**

\+ **प्राणापानादीनां स्वस्वश्रैष्ठ्ये विवादः । अश्व० २४ ॥** तेषां कार्यविशेषाः । **शां० १३ ॥**

प्रातः । सर्पः । **आ० ५७ । १३ ॥**

प्रातिकामी । दुर्योधनस्य सूतपुत्रः । **स० ८९ । १४ ॥** तस्य वधः । **श० ३३ । ४९ ॥**

प्रातिपेयः । शान्तनुः । **आ० १४० । १८ ॥**

प्राद्युम्निः । अनिरुद्धः । **स० ६० । ३६ ॥**

प्राधा । दक्षप्रजापतिपुत्री । तत्पुत्राः दश । सिद्धः पूर्णः बर्हिः पूर्णायुः ब्रह्मचारी रतिगुणः सुपर्णः विश्वायुः भानुः सुचन्द्रश्चेति । तत्पुत्र्यः अष्टौ । अनवद्या मनुः वंशा असुरा मार्गणप्रिया अरूपा सुभगा भासी इति । **आ० ६६ । ४६ ॥**

प्राप्तिः । शमस्य भार्या । **आ० ६७ । ३३ ॥**

\+ **प्रायश्चित्तार्हाणि पापानि । शां० ३३ । ३४ ॥ १६३ । २६ ॥ अनु० १९९ ॥**

प्रावरकः । देशः । **भी० १२ । २२ ॥**
प्रावारकर्णः । उलूकराजः । **व० २०२ । ४ ॥**
प्रावृषेयाः । देशः । **भी० ९ । ५० ॥**
प्राप्तिः । जरासन्धपुत्री कंसस्य भार्या । **स० १४ । ३२ ॥**
प्रियदर्शनः । क्षत्रियः । द्रुपदस्य पुत्रः । कर्णेन हतः । **आ० २१८ । ३१ ॥**
प्रोष्ठाः । देशः । **भी० ९ । ६१ ॥**
प्लक्षजाता । नदी । **आ० १८६ । २० ॥**
प्लक्षा । नदी । **व० ८२ । ६ ॥**
प्लक्षावतरणं । तीर्थं । **व० ८८ । ४ ॥**

फ.

फलकक्षः । यक्षः । **स० १० । १७ ॥**
फलकीवनं । **व० ८१ । ८६ ॥**
फलोदकः । यक्षः । **स० १० । १७ ॥**
फल्गुः । गयाक्षेत्रस्था नदी । **व० ८२ । ९७ ॥ ८५ । १२ ॥**
फल्गुनः । अर्जुनः । **वि० ४३ । २१ ॥** तन्नामनिर्वचनं । **वि० ४३ । ३४ ॥**
फेनपः । भार्गववंश्यः सुमित्रापरनामा मुनिः । त्रिशिखरगिरिनिवासी । **अनु० १२० ॥**
फेनपाः । गोफेनाहारा ऋषयः । **उ० १०२ । ५॥ अनु० ४५ । ४१ ॥**

ब.

१ **बकः** । रावणज्ञाती राक्षसः । एकचक्रानगरस्थवेत्रकीयवननिवासी । **आ० १७४ । ५ ॥**
तस्य भ्राता अलायुधः घटोत्कचेन हतः । **द्रो० १७९ । ३७ ॥**
तस्य भीमसेनेन वधः । **आ० ६१ । २९ ॥ १७७ । ८३ ॥**
२ **बकः** । ऋषिः । दाल्भ्यस्य भ्राता । **स० ४ । १७ ॥ व० २६ । ५ ॥ १९६ । ४ ॥** कचिद्बकदाल्भ्याविति द्विवचनेन गृहीतत्वात् भ्राताविति कचिद्बको दाल्भ्य इति सामानाधिकरण्येन गृहीतत्वात् दल्भपुत्रो बक इति च भाति ॥
तस्य प्राणिनां सुखदुःखविषये इन्द्रेण सह संवादः । **व० १९६ ॥**
तेन धृतराष्ट्रनाम्नः पाञ्चालराजस्य राज्यविनाशार्थं मृतपशुमांसैर्होमकरणं । **श० ४२ । २० ॥**
३ **बकः** । धर्मराजनामकः पक्षी । **शां० १६८ । १८ ॥**
बकनखः । ऋषिः । विश्वामित्रपुत्रः । **अनु० ७ । ५८ ॥**
+ **बकवधपर्व** । **आ० १७१—१७८ ॥**
बडबाग्निः । बृहस्पतेः पुत्रोऽग्निविशेषः । तस्य ऊर्ध्वभाक् इति नामान्तरं । **व० २२१ । २८ ॥**
बदरपाचनं । तीर्थविशेषः । **श० ४९ । १ ॥**
बदरिकातीर्थं । **व० ८३ । १३ ॥**
बदरी । नरनारायणावासभूतो हिमवत्पर्वतस्थ आश्रमः । तत्र पाण्डवानां गमनं । **व० १४७ । १५ ॥** Badarinath. The temple of Naranarayana is built on the bank of the Bishen-Ganga (Alakananda). It was the hermitage of the celebrated Rishi Vyasa.
तत्र गरुडस्य गमनं । **अनु० ४१ । ३ ॥**
बदरीकाननं । **व० ८१ । १७९ ॥**
बन्धकी । तत्स्वरूपनिरूपणं कुन्त्या । **आ० १३२ । ६४ ॥**
१ **बभ्रुः** । क्षत्रियः । अक्रूरः । यादवः । **आ० २३९ । १० ॥ स० १४ । ६३ ॥**
तद्भार्यापहारः शिशुपालेन । **स० ६८ । १८ ॥**
२ **बभ्रुः** । क्षत्रियः । विराटराजस्य पुत्रः । **उ० ५७ । ३३ ॥**
३ **बभ्रुः** । ऋषिः । विश्वामित्रस्य पुत्रः । **अनु० ७ । ५० ॥**
बभ्रुमाली । ऋषिः । **स० ४ । २२ ॥**

बभ्रुवाहनः । क्षत्रियः । अर्जुनस्य पुत्रः । तन्माता चित्राङ्गदा । सः पुत्रिकापुत्रधर्मेण मातामहस्य चित्रवाहनस्य पुत्रोऽभूत् । तस्य राजधानी मणलूरपुरं । **आ० ६३ । ८१ ॥ २३७ । ३४ ॥**

तेन राजसूयार्थं सहदेवाय करदानं । **स० ३२ । २८ ॥**

तस्यार्जुनेन सह युद्धं । अर्जुनहननं च । **अश्व० ७९ । ३५ ॥**

तस्य युधिष्ठिरकृताश्वमेधार्थं हास्तिनपुरागमनं । **अश्व० ८९ । १ ॥**

बर्बराः । देशः । **स० ७८ । ९९ ॥ भी० ९ । ५७ ॥**

बर्हिः । प्राधायाः पुत्रः । **आ० ६६ । ४६ ॥**

बर्हिषदः । पितरः । **आ० ६४ । ९३ ॥ स० ८ । ३० ॥** [हरि० १ । १८ ॥]

१ **बलः** । क्षत्रियः । सू० वं० तृतीयस्य परिक्षितः पुत्रः । मण्डूककन्यायां सुशोभनायामुत्पन्नः । तद्भ्रातरौ शलो दलश्च । **व० १९५ । ३८ ॥**

२ **बलः** । बलरामः ।

बलदः । अग्निविशेषः । **व० २२३ । १० ॥**

बलदेवः । बलरामः ।

बलरामः । वसुदेवपुत्रः । तन्माता रोहिणी ॥ शेषावतारः । श्रीकृष्णस्य वैमात्रेयो भ्राता । **आ० ६८ । १५२ ॥**

तेन धेनुकासुरवधः । **स० ५३ । १६ ॥**

तस्य दुर्योधनं प्रति वचनं । **उ० ७ । २८ ॥**

तस्य तीर्थयात्रा । स्वकृतरोमहर्षणवधप्रायश्चित्ततया । **उ० १५७ । ३५ ॥** [भा० १० । ७८–७९ ॥]

तत्तीर्थयात्राप्रकारः । **श० ३५ । २१ ॥**

तस्य तीर्थयात्रायाः प्रतिनिवृत्तस्य गदायुद्धारम्भसमये आगमनं । **श० ३४ । २ ॥** [भा० १० । ७९ ॥]

तस्य द्वारकागमनं । **श० ६१ । ३८ ॥**

तेन भीमसेनहननोद्योगः । श्रीकृष्णेन सान्त्वनं च । **श० ६१ । ९–२१ ॥**

तेन धर्मविशेषकथनं । **अनु० १८९ । १६ ॥**

तेन सर्पशरीरग्रहणेन समुद्रे प्रवेशः । **मौ० ५ । १३ ॥**

[तस्य भार्या रैवतापरनाम्नः ककुद्मिनः पुत्री रेवती । तस्या विवाहः । भा० ९ । ३ ॥ ब्रह्म० ७ ॥]

[तस्य श्रीकृष्णे कोपाद्विदेहपुरगमनं । तत्र दुर्योधनस्य गदाविद्याभ्यासः । विष्णु० ४ । १३ ॥ भा० १० । ५७ ॥]

[तेन रोमहर्षणस्य हननं । भा० १० । ७८ ॥]

[तेन प्रलम्बासुरवधः । भा० १० । १८ ॥ विष्णु० ५ । ९ ॥ हरि० २ । १४ ॥]

[तेन इल्वलपुत्रस्य बल्वलस्य वधः । भा० १० । ७९ ॥]

[तेन रुक्मिणो वधः । भा० १० । ६१ ॥ हरि० २ । ६१ ॥]

[तस्य भूपरित्यागः । भा० ११ । ३० ॥]

बलवर्धनः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **आ० १३१ । ७ ॥**

बलाकः । लुब्धकः । तस्यान्धनामकदुष्टश्वापदहननात्स्वर्गप्राप्तिः । **क० ७२ । ३८ ॥**

+ **बलाका** । पक्षिविशेषः । तस्याः पातनं कौशिकेन स्वक्रूरदृष्टिप्रेक्षणेन । **व० २०९ । ५ ॥**

बलाकाश्वः । सिन्धुद्वीपपुत्रः । तत्पुत्रः कुशिकः । **अनु० ७ । ४ ॥**

बलाकी । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ० ६८ । ९८ ॥ १३१ । ७ ॥ २०१ । २ ॥**

१ **बलानीकः** । क्षत्रियः । द्रुपदराजपुत्रः । अश्वत्थाम्ना हतः । **द्रो० १५७ । १८१ ॥**

२ **बलानीकः** । क्षत्रियः । विराटभ्राता । **द्रो० १५९ । ४१ ॥**

१ **बलाहकः** । नागः । **स० ९ । १० ॥**

२ **बलाहकः** । क्षत्रियः । जयद्रथभ्राता । **व० २६६ । १३** ॥

३ **बलाहकः** । श्रीकृष्णस्याश्वः । **अश्व० ११८ । ५६** ॥

१ **बलिः** । [क्षत्रियः । शिबिराजपुत्रः । भा० ९ । २३ ॥ हरि० १ । ३१ ॥] तद्भार्या सुदेष्णा । तत्पुत्रा दीर्घतमसऋषेर्जाताः अङ्ग वङ्ग कलिङ्ग पुण्ड्र सुह्माः । **आ० ११३ । ४२** ॥

२ **बलिः** । असुरः । महाबलिः । विरोचनपुत्रः । तत्पुत्रो बाणः । **आ० ६६ । २०** ॥ **स० ९ । १६** ॥ [तस्य इन्द्रसेन इति नामान्तरं । भा० ८ ॥ २२ ॥]

[तत्पत्नी विन्ध्यावलिः । भा० ८ । २० ॥]

[तेन नर्मदाया उत्तरतटे भृगुकच्छे यज्ञकरणं । तत्र वामनस्य गमनं । भा० ८ । १८ ॥]

तस्य निग्रहो भगवता वामनेन । **स० ४७ । २८** ॥

[तस्य भगवदाज्ञया पाताललोकगमनं । भा० ८ । २२ ॥]

तस्य प्रह्लादेन सह संवादः क्षमायाः श्रेष्ठत्वे । **व० २८** ॥

तस्य धूपदीपादिदानविषये शुक्राचार्येण संवादः । **अनु० १५५ । १०—६६** ॥

तेन गर्दभरूपग्रहणं तदानीं इन्द्रेण संवादश्च । **शां० २३० । १३** ॥

३ **बलिः** । ऋषिः । **स० ४ । १६** ॥

+ **बलिप्रदानं** । **अनु० १५६ । ७** ॥

बलिवाकः । ऋषिः । **स० ४ । २०** ॥

बल्लवाः । (**बलवाः**) । देशः । **भी० ९ । ६२** ॥

बहिर्गिरिः । पर्वतः । **स० २८ । ३** ॥

बहुबाद्याः । देशः । **भी० ९ । ५५** ॥

बहुला । नदी । **भी० ९ । २७** ॥

बह्वाशी । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **आ० ६८ । १०२** ॥ **१३१ । ११** ॥ भीमसेनेन हतः । **भी० ८८ । २९** ॥

बाणः । महाबलिपुत्रो रुद्रस्यानुचरोऽसुरः । तस्य महाकाल इति नामान्तरं । **आ० ६६ । २१** ॥

[तस्य पुत्री उषा । (ऊषा) । तस्याः कथा । भा० १० । ६२ ॥ हरि० २ । ११८ ॥ विष्णु० ५ । ३२ ॥]

बाभ्रवायणिः । ऋषिः । विश्वामित्रपुत्रः । **अनु० ७ । ५७** ॥

बार्हद्रथः । क्षत्रियः । जरासन्धः । **स० १९ । १९** ॥

+ **बार्हस्पत्यव्यूहः** । दाशरथिरामस्य । **व० २८६ । ७** ॥ कौरवाणां । **क० ४१ । ३९** ॥

+ **बालः** । माणवकः । तस्य द्वादशवर्षपर्यन्तं चतुर्दशवर्षपर्यन्तं वा पापलेपो नास्ति । **आ० ११७ । १५—१८** ॥

बालधिः । ऋषिः । तेन मरणरहितपुत्रोत्पत्त्यर्थं तपश्चरणं । मेधाविनामकपुत्रोत्पत्तिश्च । **व० १३७ । ४५** ॥

बाष्कलः । असुरः । हिरण्यकशिपुपुत्रः । **आ० ६६ । १८** ॥

१ **बाहुः** । क्षत्रियः पाण्डवपक्षीयः । **उ० ४ । २२** ॥

२ **बाहुः** । क्षत्रियः । सुन्दरवंशीयः । **उ० ७३ । १५** ॥

३ **बाहुः** । क्षत्रियः । सू० वं० सगरस्य पिता । **शां० ५६ । ८** ॥ [भा० ९ । ८ ॥ हरि० १ । १४ ॥]

१ **बाहुकः** । नलराजस्य ऋतुपर्णनगरे नामधेयं । **व० ६४ । २** ॥ **७३ । २** ॥

२ **बाहुकः** । क्षत्रियः । यादवः । **व० १२१ । २०** ॥

बाहुका । (**बाहुदा**) । परिक्षितो भार्या । अस्याः

सुवेषेति नामान्तरं। तत्पुत्रो भीमसेनः। आ० ६३। ४५॥

बाहुदा। हिमवतः पार्श्वे विद्यमाना नदी। आ० १९। ९४॥ व० ८२। ६७॥ भी० ९। १४॥ The river Dhabala, now called Dhumela or Burha-Rapti, a feeder of the Rapti in Oudh. The severed arm of Rishi Likhita grew when he bathed in the river: hence the river is called Bahuda.

बाहुशाली। क्षत्रियः। सो० वं० धृतराष्ट्रपुत्रः। आ० २०१। ३॥

बाह्यकर्णः। सर्पः। आ० ३५। ९॥

बाह्यकुण्डः। सर्पः। उ० १०३। १०॥

१ **बाह्लीकः**। क्षत्रियः। प्रतीपपुत्रः। २०१। २१॥ अतिरथः। उ० १६७। २८॥ सः पुत्रिकापुत्रधर्मेण मातामहस्य पुत्रः।

[तस्य पुत्रः सोमदत्तः। भा० ९। २२॥]

तस्य वधो भीमसेनेन। द्रो० १५८। १५॥

२ **बाह्लीकः**। क्षत्रियः। सो० वं० जनमेजयस्य पुत्रः। आ० १०१। ४४॥ स० ८। १६॥

बाह्लीकाः। विपाशाशतद्रोर्नद्योर्मध्ये केकयदेशस्य पूर्वभागे विद्यमानो देशः। भी० ९। ४७॥ A country between the Beas and the Sutlej, north-east of Kakaya.

तेषां निन्दा। क० ३७। १५॥ शां० ३३६। २६—२७॥

बिन्दुसरः। यत्र भगीरथेन गङ्गावतारणार्थं तपस्तप्तं तत्सरः। स० ३। ११॥ भी० ६। ४४॥ A sacred pool two miles of Gangotri in the Rudra-Himalaya, where Bhagiratha is said to have performed asceticism to bring down the Goddess Ganga from Heaven.

तत्र मयस्य गमनं। स० ३। १०॥

बिल्वकः। सर्पः। आ० ३५। १२॥

बिल्वजेता। सर्पः। आ० ५७। ९॥

बिल्वपत्रः। सर्पः। उ० १०३। १४॥

+ **बिसस्तैन्योपाख्यानं**। अनु० १४१—१४२॥

बीभत्सुः। क्षत्रियः। प्रथममर्जुनशब्दं पश्यत। तन्नामनिर्वचनं। वि० ४३। २१॥

+ **बुद्धाबुद्धस्वरूपकथनं**। शां० ३१३॥

बुद्बुदकं। तीर्थं। आ० ११०। ३१॥

बुद्बुदा। अप्सराः। आ० २३६। २०॥ स० १०। १३॥

बुधः। चन्द्रपुत्रो ग्रहः। स० ११। २९॥

[तन्माता बृहस्पतिभार्या तारा। भा० ९। १४॥ हरि० १। २५॥ पद्म० ५। १२॥ ब्रह्म० ९॥ वायु० ९०॥ देवीभा० १। ११॥]

[तस्मात्पुरूरवस उत्पत्तिः। भा० ९। १॥ देवीभा० १। १२॥]

+ १ **बुद्धिः**। प्रज्ञा। तद्गुणनिरूपणं। शां० २६१। १०॥

तस्याः श्रैष्ठ्यं। उ० ३३। ५०॥

२ **बुद्धिः**। धर्मस्य पत्नी। दक्षप्रजापतिपुत्री। आ० ६७। १५॥

१ **बृन्दारकः**। क्षत्रियः। सो० वं० धृतराष्ट्रपुत्रः। आ० १३१। ८॥

२ **बृन्दारकः**। क्षत्रियः। कौरवपक्षीयः। अभिमन्युना हतः। द्रो० ४७। १२॥

बृहज्ज्योतिः। ऋषिः। अङ्गिरसः पुत्रः। व० २२१। २॥

बृहत्कीर्तिः। ऋषिः। अङ्गिरसः पुत्रः। व० २२१। २॥

बृहत्केतुः। क्षत्रियः। आ० १। २६२॥

१ **बृहत्क्षत्रः**। केकयाधिपतिः क्षत्रियः। आ० २०१। २१॥ द्रो० ३२। ६५॥ द्रोणेन हतः। द्रो० १२५। २२॥

तेन क्षेमधूर्तिवधः । द्रो० १०७ । ५ ॥
२ **बृहत्क्षत्रः** । क्षत्रियः । निषधदेशाधिपतिः । दुर्योधनपक्षीयः । धृष्टद्युम्नेन हतः । द्रो० ३२ । ६५ ॥
१ **बृहदश्वः** । इक्ष्वाकुवंश्यः क्षत्रियः । तत्पुत्रः कुवलाश्वः । व० २०५ । ४ ॥
२ **बृहदश्वः** । ऋषिः । तेन पाण्डवेभ्योऽनेकेतिहासकथनं । व० ४९–७७ ॥
तेन युधिष्ठिरायाक्षहृदयविद्यादानं । व० ७७ । ४९ ॥
बृहदुक्थः । अग्निविशेषः । व० २२२ । १८ ॥
बृहद्गर्भः । क्षत्रियः । शिबिपुत्रः । तं शिबिः कस्यचिद्ब्राह्मणस्यार्थे प्रमापयित्वा तन्मांसं पक्त्वा तस्मै निवेदितवान् । व० २०१ । १८ ॥
बृहद्गुरुः । क्षत्रियः । आ० १ । २५८ ॥
बृहद्द्युम्नः । क्षत्रियः । सोर्वावसुपरावसू याजनार्थं वरयामास । व० १४० । १ ॥
बृहद्ध्वनी । नदी । भी० ९ । ३२ ॥
१ **बृहद्बलः** । सू० वं० दुर्योधनपक्षीयः क्षत्रियः । स० ३१ । १ ॥ उ० ४ । २२ ॥ भी० ५६ । ९ ॥ ११६ । ३० ॥ द्रो० ३७ । ५ ॥ रथसत्तमः । उ० १६६ । १८ ॥ अभिमन्युना हतः । द्रो० ४७ । २४ ॥ तत्पुत्रो बृहद्रणः । [भा० ९ । १२ ॥]
२ **बृहद्बलः** । क्षत्रियः । शकुनिभ्राता । आ० २०१ । ५ ॥
बृहद्ब्रह्मा । ऋषिः । अङ्गिरसः पुत्रः । व० २२१ । २ ॥
१ **बृहद्भानुः** । देवविशेषः । दिवः पुत्रः । आ० १ । ५५ ॥
२ **बृहद्भानुः** । अग्निविशेषः । व० २२३ । ८ ॥
बृहद्भासः । ऋषिः । अङ्गिरसः पुत्रः । व० २२१ । २ ॥
बृहद्भासा । सोमपुत्री । भानुनामकाग्नेर्भार्या । व० २२३ । ९ ॥

१ **बृहद्रथः** । क्षत्रियः । सो० वं० उपरिचरवसुपुत्रः । आ० ६४ । ४३ ॥ तद्भार्ये काशिराजसुते । तत्पुत्रो जरासन्धः । आ० ६८ । १९ ॥ २०१ । २१ ॥ स० ८ । १० ॥ १७ । १३ ॥
तस्य स्वर्गगमनं । स० १९ । २० ॥
[तस्य वंशः । भा० ९ । २२ ॥]
२ **बृहद्रथः** । द्वितीयमङ्गशब्दं पश्यत ॥
३ **बृहद्रथः** । क्षत्रियः । कौसल्यः । दुर्योधनपक्षीयः । उ० १९५ । १० ॥
बृहद्वती । नदी । भी० ९ । ३० ॥
बृहन् । अग्निविशेषः । व० २२२ । ७ ॥
बृहन्तः । क्षत्रियः । उलूकदेशाधिपतिः । पाण्डवपक्षीयः । आ० २०१ । ७ ॥ स० २८ । ७ ॥ उ० ४ । १३ ॥ दुःशासनेन हतः । क० ३ । १२ ॥
तस्य भ्राता क्षेमधूर्तिः । द्रो० २५ । ४८ ॥
बृहन्नला । विराटनगरेऽज्ञातवासं कुर्वतः क्लीबवेषस्यार्जुनस्य नामधेयं । वि० ३ । ४४ ॥
तया विपरीतं कवचधारणं । वि० ३८ । ६२ ॥
तया उत्तरकुमारस्य सारथ्यकरणं । वि० ३८ । ६७ ॥
बृहन्मनाः । ऋषिः । अङ्गिरसः पुत्रः । वि० २२१ । २ ॥
बृहन्मन्त्रः । ऋषिः । अङ्गिरसः पुत्रः । व० २२१ । २ ॥
बृहस्पतिः । ऋषिः । अङ्गिरसः पुत्रः । देवगुरुः । आ० ६७ । २६ ॥ ३० । ३८ ॥ स० ११ । २९ ॥ अश्व० ५ । ४ ॥
तस्य देवैर्गुरुत्वेन वरणं । व० २२० । २० ॥
तस्याग्नित्वप्राप्तिः । व० २२१ । २ ॥
तद्भगिनी ब्रह्मवादिनी । प्रभासस्य भार्या । आ० ६७ । २६ ॥
[तस्य भार्या तारा । तस्यां बुधश्चन्द्राज्जातः । भा० ९ ।

१४ ॥ हरि० १ । २५ ॥ पद्म० ५ । १२ ॥ ब्रह्म० ९ ॥]

तस्य भार्या चान्द्रमसी। (चन्द्रमसाऽऽक्रान्तत्वाचान्द्रमसी तारेति नीलकण्ठाचार्यः)। ताराया एव शुभेत्यपि नामेति भाति । तस्यां बृहस्पतेर्जाताः पुत्राः षडग्नयः । शंयुः निश्च्यवनः विश्वजित् विश्वभुक् बडबाग्निः स्विष्टकृत् इति । सप्तमी स्वाहा। **व० २२१ । ९ ॥**

तेन स्वयवीर्योभ्रातुरुचथ्यस्य भार्यायाः पूर्वमेवोचथ्याद्धृतगर्भाया ममताया धर्षणं । **आ० ११३ । १० ॥ शां० ३५० । ५० ॥** [तत्र जातः पुत्रो भरद्वाजः । भा० ९ । २० ॥ मत्स्य० ४९ ॥]

तेन नहुषकृतनिर्बन्धभीतायाः शच्याः संरक्षणं । **उ० ११ । २३ ॥**

तेन वसुमनसं प्रति राजगुणानुवर्णनं। **शां० ६७ ॥**

तस्येन्द्रेण संवादः । **शां० ८४। १०३ ॥**

तेन उपरिचरवसोर्याजनं । **शां० ३४४ । ५ ॥**

तेन युधिष्ठिरं प्रति धर्मोपदेशः । **अनु० १७३ । ११ ॥**

बृहस्पतिनीतिः । व० ३२ ॥

बैदः । धौम्यस्य शिष्यः ऋषिः । **आ० ३ । ७८ ॥**

बोधाः । देशः । **भी० ९ । ३९ ॥**

बोध्यः । ऋषिः । **शां० १७६ । ५७ ॥**

ब्रध्नश्वः । क्षत्रियः । तत्सकाशं प्रत्यगस्त्यस्य धनार्जनार्थं श्रुतर्वणा सह गमनं । **व० ९६ । ७ ॥**

१ **ब्रह्मचारी** । प्रथमाश्रमः । तद्धर्माः । **आ० ८५ । २ ॥ शां० १८९ । ८ ॥ अश्व० ४६ । ७ ॥**

२ **ब्रह्मचारी** । प्राधापुत्रो देवगन्धर्वः । **आ० ६६ । ४७ ॥**

३ **ब्रह्मचारी** । स्कन्दः । **व० २३३ । ८ ॥**

ब्रह्मतीर्थं । व० ८० । ८१ ॥

१ **ब्रह्मदत्तः** । सो० वं० पूरुकुलोत्पन्नः काम्पिल्यवासी क्षत्रियः । **स० ८ । २३ ॥**

तस्य स्वपुत्रस्य चक्षुषी भेदितवत्या पूजिनीनाम्न्या पक्षिण्या सह संवादः । **शां० १३९ ॥**

[तस्य भार्या देवलपुत्री सन्नतिः । हरि० १ । २३ ॥]

[तस्य पिता अणुहः । अणुहस्य नीप इति नामान्तरं । तस्य माता शुक्राचार्यपुत्री कृत्वी । तत्पुत्रः सार्वभौमः । (सर्वसेनः) यस्य चक्षुषी पूजिन्या निर्भिन्ने । हरि० १ । १९–२० ॥ मत्स्य० २०–२१ ॥]

२ **ब्रह्मदत्तः** । साल्वशब्दं पश्यत ।

ब्रह्मवेध्या । (ब्रह्मबोध्या) । नदी । **भी० ९ । ३० ॥**

ब्रह्मशिरोस्त्रं । ब्रह्मास्त्रं । तद्विषये नियमाः । **आ० १५१ । १२ ॥**

तस्य प्रयोगः प्रतिसंहारश्चार्जुनेन । **द्रो० २०२ । ३६ ॥ सौ० १४ । १५ ॥**

तस्य प्रयोगोऽश्वत्थाम्ना । **सौ० १३ । १८ ॥**

ब्रह्मसरः । तीर्थं । **व० ८२ । ८४ ॥ ९३ । ११ ॥**

+ **ब्रह्महत्या** । तस्याः स्वरूपवर्णनं । **शां० २८८ । १२ ॥**

सा इन्द्रस्य । **उ० ९ । ४८ ॥ १० । ४६ ॥ शां० २८८ । १२ ॥** [भा० ६ । ८ ॥]

सा परिक्षित्पुत्रस्य जनमेजयस्य । **शां० १४९ । ३॥**

सा वैशंपायनस्य । **अनु० ९ । ३९ ॥**

[सा याज्ञवल्क्यस्य । भा० १२ । ६]

तस्या विभागः स्त्र्यादिषु ब्रह्मणा । **शां० २२८ । ३१ ॥**

तस्याः प्रायश्चित्तं । **शां० १६३ । ४६ ॥**

तत्सदृशानि पातकानि । **अनु० ९० । २९ ॥**

ब्रह्मा । चतुर्मुखः । पितामहः । पद्मभूः । तदुत्पत्तिः। **आ० १ । ४५ ॥ व० २७३ । ४५ ॥ शां० ३५७ । २१ ॥** [भा० ३ । ८ ॥]

तस्यागमनं भारतग्रन्थनिर्माणकाले व्यासं प्रति । **आ० १ । ८१ ॥**

तस्य मानसाः षट् पुत्राः । मरीचिः अत्रिः अङ्गिराः

पुलस्त्यः पुलहः क्रतुः इति । आ० ६६ । १० ॥ ६७ । ४ ॥ [भा० ३ । १२ ॥]
तत्कृता व्यासप्रशंसा । आ० १ । ९६ ॥
तत्कृता भारतप्रशंसा । आ० १ । ९८ ॥
तेन रुद्रस्य सारथ्यकरणं । क० ३७ । १९ ॥
तदादिभिर्देवैः सीताया निर्दुष्टत्वकथनं । व० २९२। १७–४२ ॥
तस्य रेतसो रुद्रकृतयज्ञाग्नौ हुतात् भृग्वङ्गिरःप्रभृतीनामृषीणामुत्पत्तिः । अनु० १३२ । १३ ॥
तत्सभावर्णनं । स० ११ ॥ शेषं प्रजापतिशब्दे पश्यत ॥
अश्व० १०७ । २ ॥
ब्रह्माण्डसृष्टिः । शां० ३१६ ॥
ब्रह्मावर्त । क्षेत्रं । सरस्वतीदृषद्वत्योर्मध्ये विद्यमानं । व० ८१ । ५३ ॥ ८२ । ४३ ॥
. **ब्रह्मास्त्रं** । ब्रह्मशिरोस्त्रशब्दं पश्यत ।
ब्राह्मणः । प्रथमो वर्णः ।
तस्य लक्षणं । व० १८२ । २१ ॥ २०९ । ३४ ॥ शां० ६१ ॥ १८७ ॥
तस्य हृदयं नवनीतसदृशं क्षुरसदृशी वाक् । आ० ३ । १२३ ॥
तन्महिमा । व० १८७—१८८ ॥ १९९ ॥ २१४ ॥ शां० ७२ ॥ ३५१ ॥ अनु० ६८—७१ ॥ ९४ । ९६ ॥ २५६–२५७ ॥ अश्व० ९८–९९ ॥ [भा० ३ । १६ ॥]
तस्यावध्यत्वं । आ० २८ । ४—२ ॥ २०४ । १० ॥
तत्पादप्रक्षालनफलं । व० २०३ । ६६ ॥
तत्सदृशं मूल्यं गौः । अनु० ८६ । २४ ॥
तस्यादण्ड्यत्वं । अनु० २१९ । ८ ॥
तस्य पूज्यत्वं । अनु० २५६ ॥
तस्य राक्षसेन संवादः । अनु० १८७ ॥
तस्य जनकेन संवादः । अश्व० ३३ ॥
तस्य गवां तस्करैर्हरणं । आ० २२३ । ५ ॥

+ **ब्राह्मणदंपतीसंवादः** । अश्व० २१ ॥
ब्राह्मणस्वं । (ब्रह्मस्वं) । तदपहारस्यानर्थहेतुत्वं । अनु० १०५ ॥ १५८ ॥
ब्राह्मणी । नदी । भी० ९ । ३३ ॥
ब्राह्मण्यं । जातिविशेषः । तस्य श्रैष्ठ्यं । शां० ७२ । ५ ॥ अनु० ३ । ६ ॥ तस्य कर्माधीनत्वं । अनु० २१७ । ३ ॥

भ.

+ **भक्ष्याभक्ष्यविवेकः** । शां० ३५ । २१ ॥
१ **भगः** । एकादशरुद्रेष्वन्यतमः । आ० ६७ । ३ ॥
२ **भगः** । द्वादशादित्येष्वन्यतमः । आ० ६६ । १५ ॥
भगदत्तः । नरकासुरपुत्रः । प्राग्ज्योतिषाधिपतिः । द्रो० २९ । १ ॥ स० १० । ३० ॥ १४ । १५ ॥ २७ । १६ ॥ आ० २१ । १२ ॥
तत्पुत्रौ कृतप्रज्ञो वज्रदत्त(यज्ञदत्त)श्च ।
तत्पराजयोऽर्जुनेन । स० २७ । २१ ॥
तत्पराजयः कर्णेन । व० २५५ । ४ ॥
तस्य दुर्योधनपक्षीयत्वं । उ० १९ । १६ ॥
तस्य युद्धं । भी० ६४ । ४३ ॥ ९५ । २५ ॥
तस्य भीमेन सह युद्धं । द्रो० २६ । १९ ॥
तस्यार्जुनेन सह युद्धं । द्रो० २८ । १४ ॥
तेन वैष्णवास्त्रप्रयोगः । द्रो० २९ । १७ ॥
तस्य वधोऽर्जुनेन । द्रो० २९ । ५४ ॥
तत्पराक्रमवर्णनं । द्रो० २६ ॥
तत्पुत्रस्य कृतप्रज्ञस्य वधो नकुलेन । क० २ । ३१ ॥
तत्पुत्रेण यज्ञदत्तेन (वज्रदत्तेन) सहार्जुनस्य युद्धं । अश्व० ७५ ॥
+**भगलिङ्गसृष्टिः** । अनु० ५८ । ३ ॥
भगवान् । श्रीमान्नारायणः ।
तज्ज्ञानस्य साधनं । उ० ६८ । १ ॥
तस्य नाम्नां निर्वचनं । उ० ६९ । ३ ॥
तद्भक्तलक्षणं । अश्व० ११८ । ७ ॥

तन्महिमवर्णनं । **शां० २११ ॥ ३५४ । १ ॥**
[भा० ३ । १५ ॥ ४ । ७ ॥ ४ । २४ ॥]

तदनुस्मृतिप्रकारः । **शां० २१० ॥**

[तद्ध्यानपद्धतिः । भा० ३ । २८ ॥]

+ भगवद्गीता । भी० २५—४२ ॥

+ भगवद्गीतापर्व । भी० १३—४२ ॥

+ भगवद्यानपर्व । उ० ७१ ॥

भगीरथः । इक्ष्वाकुवंश्यस्य दिलीपस्य पुत्रः । **व० १०७ । ४३ ॥ आ० २०१ । २१ ॥ स० ८ । १२ ॥ वि० ५३ । १६ ॥**

तस्य पुत्री हंसी । जामाता कौत्सः । **अनु० २०० । २६ ॥**

तेन गङ्गावतारणं । **व० १०८ । १६ ॥**

तच्चरित्रं । नारदेन सृञ्जयायोक्तं । **द्रो० ६० ॥** श्रीकृष्णेन युधिष्ठिरायोक्तं । **शां० २८ । ६३ ॥**
[वायु० ८८ ॥]

तस्य धर्मविषये ब्रह्मणा सह संवादः । **अनु० १६० ॥**

[तस्य वंशः । हरि० १ । १५ ॥]

भङ्गः । सर्पः । **आ० ५७ । ९ ॥**

१ भङ्गकारः । क्षत्रियः । अविक्षितः पुत्रः । **आ० १०१ । ४१ ॥**

२ भङ्गकारः । क्षत्रियः । यादवः । **आ० २३९ । ११ ॥**

भङ्गास्वनः । भाङ्गास्वनशब्दं पश्यत ।

भद्रः । क्षत्रियः । चैद्यः । कर्णेन हतः । **क० ५१ । ४९ ॥**

भद्रकर्णेश्वरः । तीर्थं । **व० ८२ । ३९ ॥**

भद्रमनाः । क्रोधायाः पुत्री । तत्पुत्र ऐरावतो नागः । **आ० ६७ । ६० ॥**

भद्रवटः । कैलासपर्वतस्थो वटवृक्षः । **व० २३२ । १ ॥ ८० । ५१ ॥**

भद्रवती । परीक्षितो भार्या । तत्पुत्रो जनमेजयः । **आ० ६३ । ८६ ॥**

१ भद्रा । उचथ्यभार्या सोमस्य पुत्री । तस्या वरुणेनापहारः । **अनु० २५९ । १० ॥**

२ भद्रा । कुबेरभार्या । **आ० २१६ । ६ ॥**

३ भद्रा । व्युषिताश्वभार्या । **आ० १२७ । १७ ॥**

४ भद्रा । वसुदेवभार्या । **मौ० ८ । १८ ॥**

१ भद्राश्वः । खण्डः । **भी० ६ । १३ ॥ ७ । १४ ॥**

तस्य सुकृतिनां भोगस्थानत्वं । **अनु० २४० । ५ ॥**

२ भद्राश्वः । कुवलाश्वपुत्रः । **व० २०७ । ३७ ॥**

१ भरतः । शंयुनामकाग्नेर्द्वितीयः पुत्रः । अग्निविशेषः । **व० २२१ । १४ ॥**

२ भरतः । क्षत्रियः । सो० वं० दुष्यन्तपुत्रः । तन्माता शकुन्तला । तस्य तिस्रो भार्याः । तासु सुन्दा मुख्या । तत्पुत्रो भुमन्युः । **आ० ६३ । ३४ ॥ ८८ । १८ ॥ वि० ५३ । १४ ॥**

[तेन स्वपुत्राणां स्वाननुरूपत्वकथनेन तद्भार्याभिः स्वपुत्रेषु हतेषु वंशे वितथे जाते देवैस्तस्मै भरद्वाजस्य पुत्रत्वेन दाने तेन भरद्वाजस्य वितथ इति भुमन्युरिति च नाम कृत्वा पुत्रत्वेन स्वीकारः । भा० ९ । २० ॥]

तस्योत्पत्तिः । **आ० ९५ । १० ॥**

तस्य सर्वदमन इति नामप्राप्तिः । **आ० ९५ । ३३ ॥**

तस्य राज्याभिषेकः । **आ० १०० । ६९ ॥**

तस्य चरित्रं । **आ० १०१ ॥ द्रो० ६८ ॥ शां० २८ । ४५ ॥**

३ भरतः । दशरथपुत्रः । तन्माता कैकयी । **व० २७५ । ७ ॥**

१ भरद्वाजः । शंयुनामकाग्निपुत्रः कश्यनाग्निः । तद्भार्या वीरा । तत्पुत्रो वीरः । **व० २२१ । १३ ॥**

२ भरद्वाजः । आ० ८ । २५ ॥ १०१ । १० ॥ १८६ । २९ ॥ [उचथ्यभार्यायां ममतानाम्न्यां बृहस्पतितो जातः । भा० ९ । २० ॥ विष्णु० ४ । १९ ॥ मत्स्य० ४९ ॥]

तस्य पुत्रो द्रोणाचार्यः। घृताचीदर्शनक्षुभिताद्द्रोणपात्रे विधृतात्तद्रेतसो जातः। **आ** ६४। १४८॥ १४०। ३८॥ १८०। ४॥

तन्नामनिर्वचनं। **अनु०** १४२। ३१॥

तं प्रति भृगुणा जगत्सृष्टिप्रकारकथनं। **शां०** १८०। ११॥

तेन दिवोदासस्य पुत्रकामेष्ट्या याजनं। **अनु०** ८। २४॥

तत्कृतः पुष्करास्तेये शपथः। **अनु०** १४३। ३५॥

३ **भरद्वाजः**। कश्चन ऋषिः। तत्पुत्रो यवक्रीतः। तस्य कथा। **व०** १३७—१४०॥ तस्यान्यः पुत्रोऽग्निवेश्यः। **आ०** १४०। ४२॥

तस्य रैभ्यनिर्मितकृत्यामारितस्वपुत्रदुःखादग्निप्रवेशः। **व०** १३९। १९॥

तस्य पुनरुज्जीवनं रैभ्येण। **व०** १४०। २८॥

तस्य स्वर्गगमनं। **आ०** १४०। ४६॥

४ **भरद्वाजः**। कश्चन ऋषिः। घृताचीदर्शनक्षुभिताचद्रेतसो जाता पुत्री श्रुतावती। **श०** ४९। २॥

भल्लाटः। देशः। **स०** ३१। ५॥

भागस्वरिः। (**भाङ्गासुरिः**।) क्षत्रियः। ऋतुपर्णः। दशार्णाधिपतिः। **स०** ८। १५॥ **व०** ६८। २॥ ६९। १३॥

भाङ्गस्वनः। (**भङ्गास्वनः**)। राजर्षिः। तस्य स्त्रीत्वप्राप्तिः। **अनु०** ३४॥

भाङ्गासुरिः। भागस्वरिशब्दं पश्यत॥

भाण्डायनिः। ऋषिः। **स०** ७। १२॥

भाण्डीरः। वटवृक्षः। तस्य च्छायायां श्रीकृष्णेन गोवत्सानां चारणं। **स०** ५३। ८॥

१ **भानुः**। प्राधापुत्रो देवगन्धर्वः। **आ०** ६६। ४७॥

२ **भानुः**। अग्निविशेषः। **व०** २२३। ८॥

३ **भानुः**। सूर्यः।

भानुदत्तः। क्षत्रियः। शकुनिभ्राता। भीमेन हतः। **द्रो०** १५८। २४॥

भानुदेवः। क्षत्रियः। पाञ्चालः। कर्णेन हतः। **क०** ४३। १५॥

तस्य पुत्रः शक्रदेवः। **भी०** ५४। २४॥

१ **भानुमती**। कृतवीर्यपुत्री। अहंयातिभार्या। तत्पुत्रः सार्वभौमः। **आ०** ६३। १४॥

२ **भानुमती**। अङ्गिरसः पुत्री। **व०** २२१। ३॥

३ **भानुमती**। दुर्योधनभार्येति प्रसिद्धिः।

भानुमान्। कालिङ्गः। भीमेन हतः। **भी०** ५४। ३९॥

१ **भारतं**। जम्बूद्वीपस्थमस्मदावासभूतं वर्षं। **भी०** ६। ७॥ India.

२ **भारतं**। महाभारतनामको ग्रन्थः। वेदव्यासेन रचितः इतिहासोत्तमः।

तन्निर्माणदेशः। **आ०** १। ३९॥

तन्निर्माणप्रकारः। **आ०** १। ३८॥

तन्निर्माणकालः। **आ०** १। ६८॥ ६२। ५५॥

तस्मिन्ननुक्रान्ता विषयाः। **आ०** १। ४२॥

तस्य देवैस्तुलारोपणं। **आ०** १। २९७॥

तस्य मन्वादिभेदेन त्रैविध्यं। **आ०** १। ६६॥

तस्य ग्रन्थसंख्या। **आ०** १। ७७॥ ६२। १४॥

तस्य प्रचारकालः। **आ०** १। १२५॥

तस्य प्रचारप्रकारः। **आ०** १। ८०॥

तस्य प्रचारकाः। **आ०** १। १२४॥

तस्य व्यासेन शिष्येभ्योऽध्यापनं। **आ०** १। १२१॥

तस्येतिहासोत्तमत्वं। **आ०** १। २९२॥

तस्य द्रुमत्वेन वर्णनं। **आ०** १। १०४॥

तस्मिन्ग्रन्थग्रन्थिः। **आ०** १। ११६॥ ६२। १४॥

तत्प्रशंसा। **आ०** २। ३८३॥

तत्कथासंक्षेपः। **आ०** १॥ २॥ ६१॥

तत्कथनारम्भः । आ० ६० । २१ ॥
तत्पुस्तकदानफलं । आ० ६२ । ५३ ॥
तच्छ्रवणमहिमा । आ० ६२ । १७ ॥ स्व० ५ । ८०–८६ ॥
+ **भारतयुद्धं** । तस्य कालः । आ० २ । १३ ॥
तात्कालिकदुर्निमित्तानि । भी० २ । १६ ॥
तत्र दुर्योधनसेनाधिपतिकृतयुद्धदिनसंख्या । आ० २ । ३० ॥
भारताः । भरतवंशोत्पन्नाः । तेषु मुख्याः धार्तराष्ट्राः पाण्डवाश्च । तेषां कीर्तिप्रकथनं व्यासेन । भी० २ । १३ ॥
भारताचार्यमुख्यः । द्रोणाचार्यः । आ० १४९ । ३२ ॥
१ **भारद्वाजः** । भरद्वाजगोत्रोत्पन्न ऋषिः । तस्य शत्रुन्तपेन संवादः । शां० १४० । ३ ॥
२ **भारद्वाजः** । द्रोणाचार्यः । आ० १ । २०२ ॥
भारद्वाजतीर्थं । आ० २३६ । ४ ॥
भारद्वाजी । नदी । भी० ९ । २९ ॥
भारुकच्छः । तद्देशाधिपः क्षत्रियः । स० ७८ । ३६ ॥
१ **भार्गवः** । शुक्राचार्यः ।
२ **भार्गवः** । परशुरामः ।
३ **भार्गवः** । शौनकः ।
भार्गवास्त्रप्रयोगः । कर्णेन । क० ६७ । ६० ॥
भार्गवाः । देशः । भी० ९ । ५० ॥
भार्या । तस्या अष्टविधत्वं । अनु० ५६ । २ ॥
तस्या आवश्यकत्वं । आ० ९८ । २३—४४ ॥
भालुकिः । ऋषिः । स० ४ । २१ ॥
भासच्छेदः । अर्जुनेन । आ० १४३ । ९ ॥
भासा । सो० वं० अयुतानायिभार्या । तत्पुत्रोऽक्रोधनः । आ० ६३ । २१ ॥
१ **भासी** । प्राधापुत्री । आ० ६६ । ४६ ॥
२ **भासी** । आ० ६७ । ५७ ॥
भास्करी । ब्रह्मर्षिः । शां० ४६ । १२ ॥
भास्वरः । सूर्यानुयायी स्कन्दपार्षदः । शां० ४६ । ३१ ॥
१ **भीमः** । क्षत्रियः । विदर्भदेशाधिपतिः । दमयन्त्याः पिता । व० ५० । ७ ॥
२ **भीमः** । अग्निविशेषः । व० २२२ । ११ ॥
३ **भीमः** । क्षत्रियः । सो० वं० इलिनस्य पुत्रः । दुष्यन्तस्य भ्राता । आ० ८८ ॥
४ **भीमः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । भीमसेनेन हतः । भी० ६४ । ३६ ॥
५ **भीमः** । कश्यपभार्याया मुनिनाम्न्याः पुत्रो देवगन्धर्वः । आ० ६६ । ४३ ॥
६ **भीमः** । पाण्डुपुत्रो भीमसेनः ।
१ **भीमबलः** । अग्निः । व० २२२ । ११ ॥
२ **भीमबलः** । क्षत्रियः । सो०वं० धृतराष्ट्रस्य पुत्रः । १३१ । ७ ॥
१ **भीमरथः** । भोजराजः । स० ४ । ३२ ॥
२ **भीमरथः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० ६८ । १०३ ॥ १३१ । १२ ॥
भीमसेनेन तस्य वधः । भी० ६४ । ३६ ॥
भीमरथी । (**भीमा**) । नदी । व० ८६ । ३ ॥ भी० ९ । २० ॥
भीमविक्रमः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० ६८ । ९८ ॥
भीमवेगः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० ६८ । ९८ ॥
भीमवेगरवः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० २०१ । २ ॥
भीमशरः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० ६८ । ९९ ॥
१ **भीमसेनः** । वायोर्द्वितीयावतारः । भीमः । वायुसूनुः । वृकोदरः । सो० वं पाण्डोर्द्वितीयः पुत्रः । तन्माता कुन्ती । तस्योत्पत्तिः । आ० १२९ । ५२ ॥ तस्य सगर्भ्यौ भ्रातरौ युधिष्ठिरः अर्जुनश्च । वैमात्रेयौ नकुलः सहदेवश्च ।

तस्योत्पत्तिः। आ० १२९। ५२॥
तज्जन्मकालीनग्रहस्थितिः। आ० १२९। ६६॥
तेन शिशुभावे मातुरङ्कादधः पतितेन शतशृङ्गपर्वतचूर्णनं। आ० १२९। ६१॥
तेन बाल्यक्रीडायां दुर्योधनादिपराभवः। आ० १३७। १६॥
तस्य सर्पैर्दशनं। आ० १३७। ४३॥
तस्य बलरामाद्गदायुद्धशिक्षा। आ० १५१। ५॥
तस्य हिडिम्बेन सह युद्धं। आ० १६५। ४१॥
तेन हिडिम्बस्य वधः। आ० १६६। ३५॥
तेन हिडिम्बापरिग्रहः। आ० १६८। १४॥
तस्मै एकचक्रानगरे कुम्भकारेण महत्तरमृण्मयपात्रदानं। आ० १७१। १८॥
तेन बकवधः। आ० १७७। ८३॥
तस्य प्रथमा भार्या हिडिम्बा राक्षसी। तस्य तस्यां जातः पुत्रो घटोत्कचः। आ० ६३। ८०॥
तस्यान्या भार्या काशिराजसुता जलन्धरा। तस्य तस्यां जातः पुत्रः शर्वत्रातः। आ० ६३। ७६॥
तस्य मुख्या भार्या द्रौपदी। तस्य तस्यां जातः पुत्रः सुतसोमः। आ० ६४। १६४॥
तस्य नागायुतबलवत्त्वं। आ० १२९। २४॥
सः अष्टगुणरथः। उ० १६९। ४॥
तस्य विराटनगरे प्रसिद्धं नाम वलल इति। वि० ३। ८॥ तत्र प्रच्छन्नं नाम जयेश इति। वि० ७। ६६॥
तस्य शूद्रत्वं। वि० १०। १७॥ ३६। १५॥
तस्य शङ्खः पौण्ड्रः। भी० २५। १५॥
तस्मै गदा मयेन बिन्दुसरस आहृत्य दत्ता। स० ३। ६॥
तेन द्रौपदीस्वयंवरे शल्यपराजयः। आ० २०५। ३४॥ भारतयुद्धे शल्यपराभवनं। द्रो० १५॥
तेन राजसूयार्थं दशार्णदेशविजयः। स० ३०। ५॥
तेन दुर्योधनपराजयः। भी० ७९। १७॥
तेन भीष्मपराजयः। भी० ८८। १२॥
तेन जरासन्धवधः। स० २५। ९॥
तेन किर्मीरवधः। व० ११। ६७॥
तेन जटासुरवधः। १५८। ७०॥
तेन मणिमन्नामकदैत्यवधः। व० १६१। ८३॥
तेन जीमूतमल्लवधः। वि० १५। ५२॥
तेन कीचकवधः। वि० २६। ३९॥
तेन उपकीचकवधः। वि० २७। ४५॥
तेन द्रोणसारथेर्वधः। भी० ७५। ३१॥
तेन द्रोणरथभञ्जनं। द्रो० १२७। ६७॥
तेन पुनर्द्रोणाचार्यरथाष्टकभञ्जनपूर्वकमर्जुनदर्शनात्सिंहनादः। द्रो० १२८। १८–३३॥
तेन दुश्शासनस्य भुजोत्पाटनपूर्वकं वधः। क० ८७। २८॥
तेन दुर्योधनस्य ऊरुभेदने प्रतिज्ञा। स० ९२। ३२॥
तेन दुर्योधनवधः। श० ५९। ४७॥
तत्स्तुतिः। व० १५५। २०॥
तत्प्रतापवर्णनं धृतराष्ट्रेण। उ० ५१॥
तन्माहात्म्यकथनं। उ० ७६॥ भी० १०२। २८॥ ११३–११४॥ द्रो० २०१। ८॥ श० ३३। २२॥ ६२। १॥
तेन स्वसामर्थ्यकथनं। उ० ७५॥
तस्य अजगरेण ग्रहणं। व० १८०। २७॥
तस्य हनुमता संवादः। व० १४९॥
तेन दुश्शासनवक्षोविदारणं। क० ८७। २९॥
तेन शल्येन सह गदायुद्धं। श० ११॥
तद्धननोद्योगः बलरामेण। श० ६१। ९॥
तेनाश्वत्थामवधाय प्रस्थानं। सौ० ११। ३०॥
तेन द्रौपदीसमाश्वासनं। सौ० १६। २२॥
तस्य गान्धार्या सह दुर्योधनवधस्य न्याय्यत्वान्याय्यत्वविषयकविवादः। स्त्री० १४॥
तेन दुर्योधनश्राद्धार्थं धृतराष्ट्राय धनदानानभ्यनुज्ञानं। आश्र० १२। १५॥

तेन धृतराष्ट्रं प्रति वैराग्यार्थं परुषभाषणं । **आश्र०** **३ । ७ ॥**

तस्य महाप्रस्थानगमने पतनं । **महा० २ । २३ ॥**

तेनाश्वत्थामवधप्रतिज्ञानं । **द्रो० १९८ । २४ ॥**

तच्छिरसि अश्वत्थामप्रत्युक्तनारायणास्त्रस्य प्रज्वलनं । **द्रो० २०० । ७० ॥**

तस्याश्वत्थाम्ना सह युद्धं । **क० १२ ॥**

तस्य विशोकनाम्ना स्वसारथिना सह संवादः । **क० ८० ॥**

तस्य दुश्शासनेन सह विवादः । **क० ८६ । ३६ ॥**

२ **भीमसेनः** । देवगन्धर्वः । **आ० ६६ । ४२ ॥**

३ **भीमसेनः** । क्षत्रियः । सो० वं० अनशुषः पुत्रस्य परीक्षितः पुत्रः । तद्भार्या सुकुमारी । तत्पुत्रः परिश्रवाः । **आ० ६३ । ४५ ॥**

४ **भीमसेनः** । पाण्डवपौत्रस्य परीक्षितः पुत्रः । जनमेजयस्य भ्राता । **आ० ३ । १ ॥**

भीमा । (भीमरथी) । भी० ९ । २२ ॥

भीष्मः । गाङ्गेयः । तालकेतुः । पितामहः । देवव्रतः । शान्तनुपुत्रः । तन्माता गङ्गा । **आ० ६३ । ५० ॥ ९८ । ७५ ॥ वि० ३७ । २ ॥**

तस्योत्पत्तिः । **आ० ९४ । १३३ ॥**

तस्य यौवराज्येऽभिषेकः । **आ० १०७ । ४४ ॥**

तस्मै शान्तनुना स्वच्छन्दमरणवरदानं । **आ० १०७ । ११९ ॥**

तेन महाभारतयुद्धे दश दिनानि युद्धकरणं । **आ० २ । ३० ॥**

तेन दाशराजसमीपे भयङ्करप्रतिज्ञाकरणं । **आ० १०७ । ८६ ॥**

तेन काशिराजकन्यात्रयहरणं । **आ० १०९ । १९ ॥**

तस्य साल्वेन सह युद्धं । **आ० १०९ । ३९ ॥**

तस्य विलापः पाण्डवानां जतुगृहे दाहवार्ताश्रवणात् । **आ० १६२ । ३० ॥**

तेन कर्णाधिक्षेपः । **उ० २१ । १६ ॥**

तस्य ध्वजस्तालः । **उ० १५० । ५ ॥**

तस्य दुर्योधनेन सैनापत्येऽभिषेकः । **उ० १५६ । २६ ॥**

तस्य परशुरामेण सह युद्धं । **उ० १७९—१८५ ॥**

तस्य परशुरामेण सह युद्धे रथादधःपतनं तत्र गङ्गाया आगमनं च । **उ० १८२ ॥**

तस्य परशुरामेण सह युद्धदिने निशीथे निद्रायां दिव्यपुरुषैः प्रस्वापनास्त्रानुस्मारणं । **उ० १८३ ॥**

तत्पराक्रमवर्णनं । **भी० १०९ ॥ ११८ ॥**

तत्कृता श्रीकृष्णस्तुतिः । अस्याः स्तुतेः भीष्मस्तवराज इति नाम । **शां० ४६ । ३९ ॥**

[तत्कृता श्रीकृष्णस्तुतिः । भा० १ । ९ ॥]

तद्वधकथा संक्षेपेण । **भी० १३ ॥**

तद्वधोपायः । **भी० १०७ ॥**

तत्सारथेः सात्यकिना वधः । **भी० ५४ । ११४ ॥**

तद्वधेच्छया श्रीकृष्णेन चक्रायुधग्रहणं । **भी० ५९ । ९१ ॥**

तस्यार्जुनेन बाणमयोपधानकल्पनं । **भी० १२० । ४५ ॥**

तस्मै पर्जन्यास्त्रप्रयोगेणार्जुनेन पानीयदानं । **भी० १२१ । २६ ॥**

तेनार्जुनप्रशंसनपूर्वकं दुर्योधनं प्रति पाण्डवैः शमविधानं । **भी० १२१ । ३१–५८ ॥**

तस्य शरतल्पगतस्य गान्धार्या वर्णनं । **स्त्री० २३ । १८ ॥**

तस्मै पाण्डवादीनां धर्मोपदेशोपयोगितया श्रीकृष्णेन शरीरदार्ढ्यदानं । **शा० ५१ । १४ ॥**

तस्य मरणं । **अनु० २७४ । ६ ॥** [भा० १ । ९ ॥]

भीष्मकः । स० ४ । ३७ ॥ ३२ । १३ ॥

[विदर्भदेशाधिपतिः । रुक्मिण्याः पिता । तत्पुत्रो रुक्मी । भा० १० । ५२ ॥]

+ भीष्मवधपर्व । भी० ४३—१२२ ॥

१ **भुमन्युः** । क्षत्रियः । सो० वं० जनमेजयपुत्रस्य धृतराष्ट्रस्य पुत्रः । **आ० १०१ । ४७ ॥**

२ **भुमन्युः** । क्षत्रियः । सो० वं० शाकुन्तलेयस्य भरतस्य पुत्रः । तद्भार्या सुवर्णा । तत्पुत्रः सुहोत्रः । **आ० ६३** । ३५ ॥ सुवर्णायाः पुष्करिणीति नामान्तरं । **आ० १०१** । १३ ॥
तस्य पुत्राः दिविरथः सुहोत्रः सुहोता सुहविः सुयजुः ऋचीकश्चेति षट् । **आ० १०१**।१२॥
[अयं भुमन्युः भरद्वाजस्य रूपान्तरं । तस्य वितथ इति नामान्तरं । भा० ९ । २० ॥]
+ **भूगोलवर्णनं** । **भी० ५-९** ॥ [भा० ५ । १६-२० ॥ बृहन्नार० ३ ॥ पद्म० १ । ३ -९ ॥ वायु० ३४-५० ॥ विष्णु० २ । २-७ ॥ मत्स्य० १२१ ॥ कूर्म० १ । ४४ -४९ मार्कं० ५१-५७ ॥ वराह० ७४-८९ ॥ ब्रह्म० १८-२७ ॥ देवीभा० ८ । ४-१३ ॥ लिङ्गपु० ४६ । गरुडपु० ५४-५७ ॥ शिवपु० उमासं० १७—१८ ॥]
भूतकर्ता । अग्निविशेषः । **व० २२४** । १ ॥
भूतकर्मा । क्षत्रियः । कौरवपक्षीयः । शतानीकेन हतः । **द्रो० २५** । २३ ॥
भूतशर्मा । क्षत्रियः । कौरवपक्षीयः । **द्रो० २०** । ७ ॥
भूतानि । पृथिव्यादीनि पञ्च । तेषां सृष्टिः । **शां० ३१५** ॥
तेषां गुणाः । **व० २१५** । ३ ॥ **भी० ५** । ५ ॥ **शां० १९२** । १५ ॥ २५८ ॥ २६१ ॥ **अनु० ३९** । १९ ॥ २४५ । २८ ॥ [भा० ३ । २६ ॥]
भूतिः । ऋषिः । विश्वामित्रपुत्रः । **अनु० ७** । ५७ ॥
भूपतिः । अग्निविशेषः । **व० २२४** । १ ॥
भूमिः । पृथिवीभूतं । तदभिमानिदेवता च । तया ब्रह्माणं प्रति शरणगमनं । **आ० ६५** । ३९ ॥
तस्या विष्णुनोद्धरणं । **व० १४४** । २९ ॥
तद्दानफलं । **अश्व० १०२** । ९ ॥ **अनु० ९७** । २ ॥ २३५ । ५१-६६ ॥
तस्या गुणाः । **व० २१५** । ४ ॥ **भी० ४** । ९ ॥ **शां० २६१** । ३ ॥
भूमिञ्जयः । क्षत्रियः । विराटपुत्रः उत्तरकुमारः । **वि० ३७** । ९ ॥ उत्तरशब्दं पश्यत ।
+ **भूमिपर्व** । **भी० ११-१२** ॥
भूरिः । क्षत्रियः । सो० वं० पूरुवंश्यः । सोमदत्तपुत्रः । तद्भ्रातरौ भूरिश्रवाः शलश्च । **आ० २०१** । १५ ॥ [भा० ९ । २२ ॥]
तस्य सात्यकिना वधः । **द्रो० १६७** । १२ ॥
१ **भूरिद्युम्नः** । वीरद्युम्नपुत्रः कश्चन क्षत्रियः । **स० ८** । १९ ॥ **शां० १२७** । १४ ॥
२ **भूरिद्युम्नः** । ऋषिः । **उ० ८२** । २७ ॥
भूरिबलः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । भीमसेनेन हतः । **श० २५** । ५ ॥
भूरिश्रवाः । क्षत्रियः । सो० वं० सोमदत्तपुत्रः । **आ० २०१** । १५ ॥ रथयूथपयूथपः । **उ० १६५** । २८ ॥ अस्य यूपकेतुरिति नामान्तरं । **द्रो० २५** । ५६ ॥
तद्भ्रातरौ भूरिः शलश्च । तस्य सात्यकिना सह युद्धं । **भी० ६३** ॥ ७४ । २७ ॥ **द्रो० १४२** ॥
तत्पुत्राणां सात्यकिना वधः । **भी० ७४** । २५ ॥
तस्य सात्यकिना सह युध्यतः सतः भुजच्छेदोऽर्जुनेन । **द्रो० १४२** । ८६ ॥
तस्य प्रायोपविष्टस्य शिरश्छेदः सात्यकिना । **द्रो० १४३** । ६८ ॥
तच्छववर्णनं गान्धार्या । **स्त्री० २४** । १ ॥
भूलिङ्गशकुनिः । कुलिङ्गशकुनिशब्दं पश्यत ।
भृगुः । ब्रह्मर्षिः । ब्रह्मणो हृदयादुत्पन्नः । (अयं स्वायंभुवमन्वन्तरीयः ।) तत्पुत्रः कविः । तस्यान्यः पुत्रश्च्यवनः । **आ० ६७** । ४१-४५ ॥
तस्यान्यौ पुत्रौ धाता विधाता च । तत्पुत्री लक्ष्मीः । अत एव सा भार्गवी । **आ० ६७** । ५० ॥ [तत्पत्नी ख्यातिः । भा०·४ । १ ॥ विष्णु० १ । १० ॥]

[तद्भार्यायाः शुक्रमातुर्विष्णुना वधः । देवीभा० । ४ । ११ ॥]

तस्यैव वैवस्वतमन्वन्तरे द्वितीयवारं वरुणस्य क्रतौ पावकाज्जन्म । **आ० ५ । ७ ॥ अनु० १३२ । ३६ ॥** अत एव स वारुणिः ।

तद्भार्या पुलोमा । **आ० ५ । १३ ॥ ६ । १२ ॥**

तत्पुत्राः सप्त । च्यवनः वज्रशीर्षः शुचिः और्वः शुक्रः वरेण्यः (विभुः) सवनश्चेति । **अनु० १३२ । ४० ॥**

तेनाग्निं प्रति सर्वभक्षत्वशापदानं । **आ० ६ । १४ ॥ शा० ४८ । २१ ॥**

तेन भरद्वाजं प्रति सृष्टिप्रकारकथनं । **शां० १८० । ११ ॥**

तेन पुष्करास्तैन्ये शपथकरणं । **अनु० १४३ । १६॥**

तस्यागस्त्येन सह नहुषस्येन्द्रपदात्पातनविषये संवादः । **अनु० १५६ । १४ ॥**

तद्वंशकथनं । **आ० ५ । ६ ॥**

तद्वंश्यानां कार्तवीर्यैर्हननं । **आ० १९४ । १९ ॥**

भृगुकच्छः । नर्मदासागरसंगमस्थलस्थः क्षेत्रविशेषः। **स० ३२ । ७८ ॥** Broach, on the river Narbada. This was the hermittage of the Rishi Bhrigu.

भृगुतीर्थं । व० ९८ । १ ॥

१ भृगुतुङ्गं । (भृगुतुन्दं) । क्षेत्रं । **आ० ६९। ६० ॥ २३५ । २ ॥ व० ८२ । ५१ ॥ अनु० ६४ । १८ ॥**

२ भृगुतुङ्गः । (भृगुतुन्दः) । पर्वतः । **व० १३२ । १९ ॥**

+ भृत्यलक्षणं । शां० ११९ ॥

भैमसेनिः । घटोत्कचः । **भी० ८३ । ३३ ॥**

भैरवः । सर्पः । **आ० ५७ । १७ ॥**

१ भोगवती । निबन्धनमुनेर्माता । तयोः संवादः। **शा० २०५ । २ ॥**

२ भोगवती । नागलोकः । **उ० १०३ । १ ॥**

भोगवतीतीर्थं । व० ८३ । ८६ ॥

भोजः । तद्देशाधिपतिः कृतवर्मा । **आ० २०१ । ६ ॥ द्रो० ११४ । ७८ ॥ ११६ । ३२ ॥**

भोजकटं । विदर्भदेशान्तर्गतं रुक्मिण आवासस्थानं । **स० ३२ । १२ ॥** Ellichipur on the river Purna in Berar.

+ भोजनविधिः । अश्व० १०९ । १ ॥

भोजा । सौवीरस्य पुत्री । सात्यकेर्भार्या । **द्रो० १० । ३३ ॥**

भोजाः । देशः । **भी० ९ । ४० ॥**

भौमनः । विश्वकर्मा । तेनामृतरक्षणं । **आ० ३२ । ३ ॥**

भौमेयाः । जनाः । **स० ७८ । ९७ ॥**

भ्रमरः । जयद्रथस्य भ्राता । **व० २६६ । ११ ॥**

म.

मकरकेतुः । प्रद्युम्नः । **व० १८ । ११ ॥**

मकरध्वजः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः। भीमसेनेन हतः । **भी० ९६ । २७ ॥**

मकरी । नदी । **भी० ९ । २३ ॥**

मगधाः । देशः । **भी० ९ । ४५ ॥** The Province of Behar. Its western boundary was the river Sone. The ancient capital of Magadha was sometime Rajgir.

तत्स्थाः पञ्च पर्वताः । वैहारः वाराहः वृषभः ऋषिगिरिः (ऋषभकूटः ।) चैत्यकश्चेति । **स० २१ । २ ॥**

मङ्कणकः । ऋषिः । सुकन्यायां मातरिश्वनो जातः । **श० ३९ । ३२ ॥ व० ८३।११६॥**

तस्य पुत्रास्सप्त । वायुवेगः वायुबलः वायुहा वायुमण्डलः वायुज्वालः वायुरेताः वायुचक्रः इति ।

तस्य चरित्रं । **श० ३९ । ३२ ॥** [पद्म० १ । २७ ॥ ६ । १३६ ॥ स्कान्दपु० प्रभासखं० प्रथमभा० २७० ॥]

[स कश्यपस्य मानसः पुत्रः । वामनपु० ३८ ॥]

मङ्किः । ऋषिः । तत्कथा । **शां० १७६ । ४ ॥**
+ मङ्गलाचरणं । आ० १ । १ ॥ २८ ॥
मचक्रुकः । यक्षः । **व० ८१ । २०० ॥**
मचक्रुकं । तीर्थं । **श० ५४ । २८ ॥**
मञ्जुला । नदी । **भी० ९ । ३४ ॥**
मणलूरं । (मणिपुरं) । पाण्ड्यदेशस्थं अर्जुनश्वशुरस्य चित्रवाहनस्य पत्तनं । **आ० ६३ । ८१ ॥ २३५ । १७ ॥**
तत्र तीर्थयात्रानिमित्तेनार्जुनस्य गमनं । तत्र स्वपुत्रेण बभ्रुवाहनेन सह युद्धं च । **आ० २३५ ॥**
तत्राश्वमेधाश्वरक्षणार्थमर्जुनस्य गमनं । **अश्व० ७९ ॥**
तत्र राजसूयदिग्विजयार्थं सहदेवस्य गमनं । **स० ३३ । २९ ॥**
मणिः । ऋषिः । **स० ११ । २४ ॥**
मणिनागं । क्षेत्रं । **व० ८२ । १०६ ॥**
मणिपुरं । मणलूरशब्दं पश्यत ।
मणिपुष्पकः । सहदेवस्य शङ्खः । **भी० २५ । १६ ॥**
मणिमती । वातापील्वलपुरी । तस्या दुर्जयेति नामान्तरं । **व० ९४ । १-४ ॥**
मणिमत्तीर्थं । व० ८० । १०२ ॥
मणिमन्थः । पर्वतः । **अनु० ४९ । ३३ ॥**
१ **मणिमान्** । द्रौपदीस्वयंवरार्थमागतः कश्चन क्षत्रियः । **आ० २०१ । ७ ॥**
२ **मणिमान्** । सर्पः । **स० ९ । १० ॥**
३ **मणिमान्** । राक्षसः । भीमसेनेन हतः । **व० १६१ । ६७—८३ ॥**
मण्डलकः । सर्पः । **आ० ५७ । ८ ॥**
मण्डलव्यूहः । कौरवाणां । **भी० ८१ । २१ ।**
मण्डूककन्या । सुशोभना नाम । मण्डूकराजस्यायोः पुत्री । **व० १९५ । ३२ ॥** तस्याः पतिः इक्ष्वाकुवंश्यः परीक्षिन्नामा । तत्पुत्राः शलो दलो बलश्चेति ।
मण्डूकराजः । आयुर्नामा । तत्पुत्री सुशोभना । **व० १९५ । ३२ ॥**
+ मण्डूकोपाख्यानं । व० १९५ ॥
मतङ्गः । ब्रह्मर्षिः । ब्राह्मण्यां नापिताज्जातः । **अनु० ३ । १८ ॥**
तस्य रासभ्या संवादः । **अनु० ३ । ८ ॥**
तेन ब्राह्मण्यप्राप्त्यर्थं तपश्चरणं । **अनु० ४ । १ ॥**
मतङ्गकेदारः । क्षेत्रं । **व० ८३ । १७ ॥**
मतङ्गाश्रमः । क्षेत्रं । **व० ८२ । १०० ॥**
मतिः । दक्षप्रजापतेः पुत्री । धर्मप्रजापतेः पत्नी **आ० ६७ । १५ ॥**
मतिनारः । क्षत्रियः । सो० वं० अनाधृष्टेः पुत्रः । तत्पुत्राः तंसुः महान् अतिरथः द्रुह्युश्च । **आ० ८८ । १२ ॥** अन्त्यनारोप्ययमेवेति भाति ।
मतिसल्लः । उपरिचरवसुपुत्रः । तन्माता गिरिका । **आ० ६४ । ४४ ॥**
मत्स्यः । उपरिचरवसुवीर्यान्मत्स्या उदरे जातः पुत्रः । तस्य स्वसा मत्स्यगन्धा (सत्यवती) । **आ० ६४ । ८३ ॥**
मत्स्यगन्धा । सत्यवतीशब्दं पश्यत ।
मत्स्याः । देशः । **भी० ९ । ४० ॥**
Matsya-Desa, the country around jeypur including Alwar formerly Virata west of Surasena Desa.
+ मत्स्यावतारः । भगवतो नारायणस्य । **व० १९० ॥** [भा० ८ । २४ ॥]
+ मत्स्योपाख्यानं । व० १९० ॥ शां० १३७ ॥
मदः । च्यवननिर्मित इन्द्रशत्रुः । **अनु० २६१ । २६ ॥**
मदयन्ती । सू० वं० सौदासस्य कल्माषपादस्य पत्नी । **आ० १२८ । ५० ॥ अश्व० ५७ । १९ ॥**
मदिराक्षः । (मदिराश्वः) । विराटस्य भ्राता।

वि० ३३ । २० ॥ रथोदारः । उ० १७१ । १५ ॥

१ **मदिराश्वः** । मदिराक्षशब्दं पश्यत ।

२ **मदिराश्वः** । सू० वं० दशाश्वस्य पुत्रः क्षत्रियः । तत्सुतो द्युतिमान् । **अनु० २ । ८ ॥**

+ **मद्यं** । तदुत्पत्तिः तत्पाने दोषश्च । **अनु० २३१ । २९ ॥**

तत्पाननिषेधः । **आ० ७० । ७२** ॥ तत्पान-प्रायश्चित्तं । **शां० १६३ । ४७ ॥**

मद्रराजः । क्षत्रियः । शल्यः । **आ० १ । २३१ ॥**

तस्य व्यासेन सह भगवन्माहात्म्यविषये संवादः । **अनु० १५ ॥**

मद्राः । देशः । **भी० ९ । ४२** ॥ A country in the Punjab between the Ravi and the Chenab. Its capital was Sakala.

तेषां निन्दा । **क० ३४ । ३७ ॥**

मद्राधिपः । क्षत्रियः । शल्यः । **भी० ८५ । १४ ॥**

+ **मधुकैटभोत्पत्तिः** । **शां० ३५७ । २४ ॥**

तयोः कथा । **व० २०६ । २३ ॥ शां० ३५७ । २४ ॥**

तयोर्वधः । **स० ४४ ॥ शां० ३५७ । ६९ ॥**

मधुच्छन्दाः । विश्वामित्रस्य पुत्रः । **अनु० ७ । ५० ॥**

मधुपर्कः । गरुडस्य पुत्रः । **उ० १०१ । १४ ॥**

+ **मधुपर्के गोः समनुज्ञानं** । **आ० ६० । १४ ॥**

मधुमन्तः । देशः । **भी० ९ । ५३ ॥**

मधुरा । शूरसेनदेशस्य राजधानी । श्रीकृष्णस्य जन्मस्थानं । **स० १९ । २५** ॥ Muttra the capital of Surasena Desa.

मधुवटी । देव्याः स्थानं । **व० ८१ । ९४ ॥**

मधुसूदनः । भगवान्नारायणः । तन्नामनिर्वचनं । **उ० ६९ । ४ ॥**

मधुस्रवतीर्थं । **व० ८१ । १५० ॥**

मध्यदेशः । देशः । **शां० १६७ । ३ ॥**

+ **मनः** । आन्तरं ज्ञानेन्द्रियं । तस्य गुणाः । **शां० २६१ । ९ ॥**

तज्जये सर्वेन्द्रियाणां जयः । **अश्व० ३१ । ५ ॥**

तस्य इन्द्रियैः सह विवादः । **अश्व० २३ ॥**

मनस्युः । क्षत्रियः । सो० वं० प्रवीरस्य पुत्रः । तन्माता शूरसेनी । तद्भार्या सौवीरी । तत्पुत्राः मिश्रकेश्यां जाताः शक्तः संहननः वाग्मी च । **आ० ८८ । ५ ॥**

मनस्विनी । देवस्त्री । तत्पुत्रश्चन्द्रमाः । **आ० ६७ । १९ ॥**

१ **मनुः** । वैवस्वतः । **आ० ६९ । १५ ॥ अश्व० ४ । २** ॥ तत्पुत्राः इक्ष्वाकुप्रभृतयो दश । **आ० ६९ । २०** ॥ [तत्पत्नी श्रद्धा भा० ९ । १ ॥]

तस्य बृहस्पतिना संवादः । **शां० १९९–२०४ ॥**

तस्य सुवर्णनामकेन तपस्विना सह संवादः पुष्पधूपदीपदानादिविषये । **अनु० १५५ ॥**

[मनवः । चतुर्दश । हरि० १ । ७ ॥ विष्णु० ३ । १ ॥ ब्रह्म० ५ ॥ ब्रह्म० वै० २ । ९३ ॥ मार्कण्डे० ५० ॥]

२ **मनुः** । प्राधायाः पुत्री । **आ० ६६ । ४५ ॥**

३ **मनुः** । अग्निविशेषः । **व० २२३ । ४ ॥**

मनोजवतीर्थं । **व० ८१ । ९३ ॥**

मनोनुगः । देशः । **भी० १२ । २१ ॥**

१ **मनोरमा** । अप्सराः । **आ० ६६ । ५० ॥ १३२ । ४४ ॥**

२ **मनोरमा । (मनोहरा)** । सरस्वतीनद्याः काचन शाखा । **श० ३९ । ४ ॥**

१ **मनोहरा** । काचन देवस्त्री । तत्पुत्रः शिशिरः प्राणः रमणश्च । **आ० ६७ । २२ ॥**

२ **मनोहरा** । द्वितीयं मनोरमाशब्दं पश्यत ।

+ **मन्त्रस्य गोपनप्रकारः** । **आ० १५३ । ९२ ॥**

+ मन्त्रपर्व। **स० १—१९॥**
+ मन्त्री। अमात्यशब्दं पश्यत।
मन्थरा। कैकेय्या दासी। **व० २७७। १३॥**
मन्दकाः। देशः। **भी० ९। ४३॥**
मन्दगा। नदी। **भी० ९। ३३॥**
मन्दपालः। शार्ङ्गकपक्षिरूपवान्कश्चन ऋषिः। तद्भार्या जरितानाम शार्ङ्गी। तत्पुत्राः। जरितारिः सारिसृक्कः द्रोणः स्तम्बमित्रश्चेति। **आ० २२९। १५॥ अनु० ५३। २१॥** तस्यान्या भार्या लपिता। **आ० २२९। १८॥**
मन्दरः। पर्वतः। **व० १६४। ४॥**
तेनामृतमथनं। **आ० १८। १॥**
तत्र पाण्डवानां गमनं। **व० १४४। २॥**
मन्दवाहिनी। नदी। **भी० ९। ३३॥**
मन्दाकिनी। नदी। **भी० ८३। ५८॥**
मन्युः। अग्निविशेषः। **व० २२३। ११॥**
ममता। अङ्गिरःपुत्रस्योचथ्यऋषेर्भार्या। **आ० ११३। ९॥** विशेषमुचथ्यशब्दे पश्यत।
मयः। असुराणां शिल्पी। अर्जुनेन खाण्डवदाहान्मोचितः। **आ० २२४। ३९॥**
तेन पाण्डवसभानिर्माणं। **स० १। २५॥**
तस्य देवैः सह युद्धं। **स० ५१। ७॥**
+ मयदर्शनपर्व। आ० २२४—२३०॥
मयूरः। वृषसेनस्य केतुः। **द्रो० १०५। १६॥**
मयूरकेतुः। स्कन्दः। **व० २३३। ३॥**
+ मरणं। प्राणवियोगः। तत्सूचकान्यरिष्टानि। **शां० ३२२। ८॥ अनु० १५०॥ १६९। १॥**
तत्प्रभेदाः। **अनु० २४२॥**
[तात्कालिककष्टनिरूपणं। भा० ३। ३०॥]
१ मरीचिः। ब्रह्मर्षिः। ब्रह्मणो मानसः पुत्रः। तत्पुत्रः कश्यपः। **आ० ६३। २॥ ६६। १०॥ ६७। ४॥ स० ७। १७॥ ११। १८॥ शां० २०७। ४॥**
[तस्य भार्या कर्दमप्रजापतिपुत्री कला। भा० ४। १॥]
[तस्यान्या भार्या ऊर्णा। तत्पुत्राः षट्। ते ब्रह्मशापात् हिरण्यकशिपोः पुत्रा भूत्वा पुनः वसुदेवाद्देवक्यां श्रीकृष्णोत्पत्तेः पूर्वमुत्पन्नाः। भा० १०। ८५॥]
२ मरीचिः। अप्सराः। **आ० १२२। ४४॥**
मरीचिपाः। ऋषयः। **अनु० ४५। ४१॥**
मरुकाः। जनाः। **स० ७८। ९७॥**
मरुतः। एकोनपञ्चाशत्। कश्यपाद्दित्यां जाताः देवयोनयः पुत्राः। **आ० १२२। ५३॥ शा० २०७। २४॥**
[तेषामुत्पत्तिः। भा० ६। १८॥ रा० १। ४६—४७॥]
मरुत्तः। क्षत्रियः। सू० वं० अविक्षतः पुत्रः। **अश्व० ४। २३॥ स० ७। १७॥ ८। १०॥**
तस्य कथा। **द्रो० ५५। ४६॥ शां० २८। १७॥ अश्व० ४॥** [रा० ७। १८॥]
[तद्वंशकथनं। भा० ९। २॥]
तस्य धृतराष्ट्रेण संवादः। **अश्व० १०। ३॥**
तेन यज्ञार्थं संवर्तऋषेरन्वेषणं। **अश्व० ६। २०॥**
तद्यज्ञः। **अश्व० ९। ४॥**
१ मर्यादा। सो० वं० अपराचीनस्य भार्या। तत्पुत्रोऽरिहः। **आ० ६३। १७॥**
२ मर्यादा। देवातिथिभार्या। तत्पुत्र ऋचः। **आ० ६३। २३॥**
मलजाः। (मलदाः)। करूशदेशसमीपस्थो देशः। **भी० ९। ४५॥** Malada, The western portion of the district of Shahabad.
मलदा। नदी। **व० ८०। ९३॥**
मलयः। कुलपर्वतः। **भी० ९। ११॥ ११। १५॥**
मलयध्वजः। क्षत्रियः। मणलूरेश्वरः पाण्ड्यः। चित्राङ्गदायाः पिता। अर्जुनस्य श्वशुरः। अस्य

प्रवीर इति चित्रवाहन इति च नामान्तरे । स० ३३ । २९ ॥ आ० २३५ । १७ ॥ अश्वत्थाम्ना हतः । क० ५६ । ४४ ॥

+ **मल्लहननं** । भीमसेनेन । वि० १५ । ५२ ॥

मल्लाः । देशः । भी० ९ । ४६ ॥ There are two Malla desa, one is in the west—the Multan. The other is in the east—the country in which the Parasnath hills are situated, that is portions of the districts of Hazaribagh and Manbhum.

मसीराः । देशः । भी० ९ । ५३ ॥

महत्तरः । अग्निविशेषः । व० २२२ । ९ ॥

+ **महत्तत्वनिरूपणं** । अश्व० ४१ । १ ॥

महद्द्युम । क्षेत्रं । आ० ३ । १४२ ॥

महाकर्णिः । अम्बुवीचस्य मन्त्री । आ० २२३ । १९ ॥

महाकालः । बाणासुरः । आ० ६६ । २१ ॥

+ **महाकुललक्षणं** । उ० ३६ । २२ ॥

महागौरी । नदी । भी० ९ । ३३ ॥

महानदी । नदी । आ० २३५ । ७ ॥ भी० ९ । १४ ॥ A river in Orissa.

महापद्मपुरं । गोमतीतीरस्थं पत्तनं । शां० ३६३ । १ ॥

महापार्श्वः । असुरः । स० ९ । १६ ॥

महापुरुषस्तवः । शां० ३४६ ॥

महाबलिः । बलिशब्दं पश्यत ।

महाबाहुः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० ६८ । ९८ ॥ १०८ ॥ १३१ । ६ ॥ १४ ॥ भीमसेनेन हतः । द्रो० १५८ । १७ ॥

महाभारतं । भारतशब्दं पश्यत ।

तच्छब्दनिर्वचनं । आ० १ । २९७—३०० ॥

महाभिषक् । (**महाभिषः**) । क्षत्रियः । सू० वं० । आ० १०२ ॥

महाभूतानि । भूतशब्दं पश्यत ।

महाभौमः । क्षत्रियः । सो० वं० पूरुवंश्यस्यारिहस्य पुत्रः । तन्माता आङ्गी । तद्भार्या सुयज्ञा । तत्पुत्रः अयुतानायी । आ० ९३ । १८ ॥

महामती । अङ्गिरसः पुत्री । व० २२१ । ८ ॥

महायज्ञाः । पञ्च । अश्व० १०४ । ८ ॥

महारवः । यादवः । आ० २३९ । ११ ॥

महारौरवः । नरकविशेषः । अनु० २३० । ९ ॥

महालक्ष्मीः । लक्ष्मीशब्दं पश्यत ।

१ **महाशिराः** । असुरः । स० ९ । १८ ॥

२ **महाशिराः** । ऋषिः । स० ४ । १६ ॥

महाशोणः । नदः । स० २० । २७ ॥

महाश्रमतीर्थं । व० ८२ । ५४ ॥

महाश्वः । यमसभास्थः क्षत्रियः । स० ८ । १९ ॥

महासेनः । स्कन्दः । स० ११ । ५२ ॥

महाहनुः । सर्पः । आ० ५७ । १० ॥

महिष्मती । अङ्गिरसः पुत्री । व० २२१ । ७ ॥

महीषकाः । देशः । भी० ९ । ५९ ॥ माहिषकशब्दं पश्यत ।

महेन्द्रः । कुलपर्वतः । आ० २३५ । १३ ॥ व० ८३ । १६ ॥ भी० ९ । ११ ॥ Mahendra Mali. Hills in Ganjam Dt.

तत्र परशुरामस्य वासः । व० ११८ । १४ ॥

महेन्द्रा । नदी । भी० ९ । २२ ॥

१ **महोदरः** । सर्पः । आ० ३५ । १६ ॥

२ **महोदरः** । ऋषिः । यस्य जङ्घायां संलग्नं पूतिगन्धि राक्षसशिरः औशनसतीर्थस्नानान्मुक्तमभूत् । श० ४० । २० ॥

३ **महोदरः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । आ० १३१ । ७ ॥ ६८ । ९७ ॥ भीमसेनेन हतः । भी० ८८ । २७ ॥

महौजाः । क्षत्रियः । आ० ६८ । ५२ ॥

+ **मांसभक्षणनिन्दा** । अनु० १७६ । —१७८ ॥ २३३ ॥

माकन्दी । गङ्गातीरस्थं द्रुपदनगरं । आ० १४८ । ७८ ॥ पाण्डवप्रार्थिते ग्रामपञ्चकेऽन्यतमः । उ० ३१ । १९ ॥

१ **मागधः** । क्षत्रियः । मगधदेशाधिपतिः । अभिमन्युना हतः । भी० ६२ । ४८ ॥

२ **मागधः** । जरासन्धः ।

माठरवनं । व० ८९ । १० ॥

माणिभद्रः । यक्षराजः । आ० ६४ । २७ ॥ व० १४१ । ७ ॥ स० १० । १६ ॥

तस्य कुण्डधारेण संवादः । शां० २२७ ॥

माणिवरः । यक्षः । व० १४१ । ५ ॥

माण्डव्यः । अणीमाण्डव्यशब्दं पश्यत ।

मातङ्गाः । गजाः । क्रोधवशापुत्र्या मातङ्ग्यास्तेषामुत्पत्तिः । आ० ६७ । ६६ ॥

मातङ्गी । क्रोधवशायाः पुत्री । तत्पुत्रा मातङ्गाः । आ० ६७ । ६१—६६ ॥

मातरिश्वा । गरुडस्य पुत्रः । उ० १०१ । १४॥

मातलिः । इन्द्रस्य सारथिः । तद्भार्या सुधर्मा । तत्पुत्री गुणकेशी । उ० ९७ । १९ ॥

तत्पुत्रो गोमुखः । उ० १०० । ८ ॥ [स जयन्तस्य सारथिः । रा० ७ । २८ ॥]

तेन स्वपुत्र्या वरान्वेषणं । उ० ९७—१०५ ॥

तस्य पाताललोकगमनं । उ० ९८ । ८ ॥

तस्येन्द्रेण सह सेव्यताप्रयोजकगुणविषये संवादः । अनु० १५३ ॥

तदागमनमर्जुनसमीपे । व० ४२ । २ ॥

तेन श्रीरामं प्रति रथानयनं । व० २९१ । १२ ॥

+ **मातापित्रोः ऋणापनोदनं** । शां० २९०॥

+ **मातृगणः** । व० २३० । १४ ॥ शा० ४७ । १ ॥

मातृतीर्थं । व० ८१ । ५८ ॥

मातृमहिमा । शां० १०८ ॥

माद्री । पाण्डोर्द्वितीया भार्या । मद्राधिपस्य ऋतायनस्य दुहिता । शल्यस्य स्वसा । आ० ६३ । ५९ ॥ १३४ । ८२ ॥

तस्याः धृत्यंशत्वं । आ० ६८ । १६० ॥

तस्या विवाहः । आ० १२२ ॥

तस्यामश्विनोः सकाशान्नकुलसहदेवयोरुत्पत्तिः । आ० १२३ । १८ ॥

तस्याः सङ्गेन पाण्डोर्मरणं । आ० १३४ । २६ ॥

तस्याः पाण्डोरनुमरणं । आ० १३४ । ११० ॥

माधवः । श्रीकृष्णः । तन्नामनिर्वचनं । उ० ६९ । ४ ॥

माधवी । ययातिपुत्री । आ० ८७ । २३ ॥

तस्याः प्रसूत्यन्तेप्रसूत्यन्ते कन्यात्वप्राप्तिवरलाभः । उ० ११६ । १७ ॥

तस्याः पुत्राश्चत्वारः । इक्ष्वाकुवंश्यात् हर्यश्वाज्जातः वसुमनाः । उ० ११६ । २३ ॥ काशीश्वराद्दिवोदासाज्जातः प्रतर्दनः । उ० ११७ । १८ ॥ भोजनगराधिपतेरुशीनराज्जातः शिबिः । उ० ११८ । २० ॥ विश्वामित्राज्जातोऽष्टकः । उ० ११९ । १८ ॥

तस्याः स्वयंवरः । उ० १२० । १ ॥

तस्यास्तपस्यन्त्याः स्वर्गाच्च्युतस्य स्वपितुर्ययातेरष्टकादिभिः संवादकाले तत्रागमनं । आ० ८७ । १७ ॥

मानवी । नदी । भी० ९ । ३२ ॥

मानसः । सर्पः । आ० ५७ । १६ ॥

मानुषतीर्थं । व० ८१ । ६५ ॥

मान्धाता । क्षत्रियः । सू० वं० युवनाश्वस्य पुत्रः । स० ८ । ८ ॥ तस्य कुरुपार्थयुद्धदिदृक्षया इन्द्रप्रासादे स्थितिः । वि० ५३ । १४ ॥

तस्योत्पत्तिः । व० १२७ । २८ ॥

तन्नामनिर्वचनं । व० १२७ । ३० ॥

तस्य चरित्रं । व० १२७ ॥ द्रो० ६२ ॥ शां० २८ । ८१ ॥

तस्य वसुहोमेन संवादः । शां० १२२ ॥

तस्य उचथ्येन संवादः । **शां० ९० । ९१ ॥**
[तस्य भार्या शशबिन्दोः पुत्री बिन्दुमती । तत्पुत्राः पुरुकुत्सः अम्बरीषः मुचुकुन्दश्च । भा० ९ । ६ ॥ वायु० ८८ ॥]
[तस्य पुत्र्यः पञ्चाशत् । सौभरिऋषेर्भार्याः । भा० ९ । ६ ॥ विष्णु० ४ । २ ॥]

मारिषा । नदी । **भी० ९ । ३६ ॥**

१ **मारीचः** । मरीचिऋषिपुत्रः काश्यपः ।

२ **मारीचः** । ताटकापुत्रो रावणसचिवो राक्षसः । तद्भ्राता सुबाहुः । **स० ५० । ५ ॥**
तस्य वधो रामेण । **व० २७९ । २१ ॥**

मारुतन्तव्यः । विश्वामित्रस्य पुत्र ऋषिः । **अनु० ७ । ५४ ॥**

मार्कण्डेयः । मृकण्डपुत्रो महर्षिः । **व० १३० । ७ ॥ स० ४ । २१ ॥ ११ । २२ ॥**
तस्य पत्नी धूमोर्णा । **अनु० २४८ । ४ ॥**
तस्य चरित्रं । **व० १३० । ६ ॥ १९१–१९२ ॥**
[भा० १२ । ८–१० ॥ ब्रह्म० ५२–५६ ॥ बृहन्नारदी० ४—५ ॥]
[तस्य वंशः । भा० ४ । १ ॥]
तदागमनं पाण्डवसमीपे द्वैतवने । **व० २५ । ४ ॥**
तदागमनं पाण्डवसमीपे काम्यकवने । **व० १८५ । ४१ ॥**
तस्मै महेश्वरेण दीर्घायुष्प्रदानं । **व० १३० । ३२ ॥**
तेन श्रीकृष्णस्य सर्वोत्तमत्वकथनं । **व० १९२ । ५१ ॥**
तस्य नारदेन सह चतुर्युगधर्मविषये संवादः । **अनु० ९४ ॥**
तस्मै श्रीनारायणेन प्रलयप्रदर्शनं । **व० १९१ । ९० ॥**
तस्य नारदेन सह स्त्रीणां विषये संवादः । **अनु० ९७ ॥**

मार्कण्डेयतीर्थं । **व० ८२ । ७९ ॥**

+ **मार्कण्डेयसमास्यापर्व** । **व० १८४ —२३३ ॥**

मार्कण्डेयाश्रमः । गोमतीसरयूसंगमस्थले विद्यमानं क्षेत्रं । तत्र पाण्डवानां गमनं । **व० १३० । १ ॥** At the confluence of the Saraju and the Gomati, near Bageswara in the district of Kumaun. Markanda Rishi performed asceticism at this place.

मार्गणप्रिया । प्राधापुत्री । **आ० ६६ । ४५ ॥**

+ **मार्गशीर्षादिद्वादशद्वादशीव्रताचरणं** । **अश्व० ११४ । १४ ॥**

+ **मार्जारमूषककथा** । **उ० १६० । १५ ॥ शां० १३८ । १८ ॥**

१ **मार्ताण्डः** । देवगव्याः सुरभ्या भर्ता । **अनु० ११७ । ११ ॥**

२ **मार्ताण्डः** । सूर्यः । **आ० ६९ । १५ ॥**

१ **मार्त्तिकावतकः** । क्षत्रियः । तन्नामकदेशाधिपः साल्वः । **व० १४ । १६ ॥ २० । १५ ॥ द्रो० ४८ । ८ ॥**

२ **मार्त्तिकावतकः** । चित्ररथनामा गन्धर्वः । स्त्रीभिः सह जले क्रीडन्तं यं दृष्ट्वा जमदग्निभार्या रेणुका तस्मै स्पृहयाञ्चकार । **व० ११७ । ६ ॥**

मार्दमर्षिः । ऋषिः । विश्वामित्रस्य पुत्रः । **अनु० ७ । ५७ ॥**

मालयः । गरुडस्य पुत्रः । **उ० १०१ । १४ ॥**

मालवाः । देशः । **भी० ९ । ६० ॥** Malwa. Its capitals were Ujjaini and Dharanagara at the time of Raja Bhoja. It is situated in the north-west of Anupadesa.

१ **मालवी** । केकयनाम्नः सूतस्य भार्या । कीचकादीनां माता । विराटराजभार्यायाः सुदेष्णाया मातृष्वसा । विमाता च । **वि० २१ । १४ ॥**

२ **मालवी** । अश्वपतेर्भार्या साविञ्या माता । **व० २९८ । ६१ ॥**

१ **मालिनी** । विभीषणमाता । **व० २७३ । ८ ॥** Malini is the name of a river, which

falls into the river Ghagra (Saraju) fifty miles above Ajodhya. The Hermitage of Kanva stands upon it.

२ **मालिनी** । अप्सराः । **वि०** १४ । ३२ ॥

३ **मालिनी** । कण्वाश्रमसमीपस्था नदी । **आ०** ९१ । २३ ॥

४ **मालिनी** । विराटनगरे द्रौपद्या अज्ञातवासे नाम । **वि०** १४ । ४५ ॥

माल्यपिण्डकः । सर्पः । **उ०** १०३ । १३ ॥

माल्यवान् । पर्वतः । **भी०** ६ । १३ ॥ **स०** २९ । ४५ ॥ **व०** १५९ । ३८ ॥ Northern portion of the Eastern Ghats in the Districts of Cuddapa, Kurnool, Nellore, Guntur etc.

मावेल्लकाः । तन्नामकदेशस्था जनाः । **द्रो०** १७ । २० ॥

मासः । (**माषः**) । ऋषभरूपी राक्षसः । यस्य नालेन जरासन्धः तिस्रो भेरीश्चकार । **स०** २१ । २० ॥

+ **मासनियामकभगवद्रूपाणि** । **अनु०** १७१ ॥

+ **मासाहसपक्षी** । कुलिङ्गशकुनिशब्दं पश्यत ।

माहिकाः । देशः । **भी०** ९ । ४६ ॥

माहिषकाः । (**महीषकाः**) । देशः । **अश्व०** ८४ । ११ ॥ (मैसूर् । भारतभ्रमणपत्रे ११३४ ॥) Mysore.

माहिष्मती । नगरी । यस्या अधिपतिः कार्तवीर्यः नीलश्च । **स०** ३२ । २३ ॥ Maheshwara on the right bank of the Nerbuda forty miles south of Indore.

माहेन्द्रः । पर्वतः । महेन्द्रशब्दं पश्यत ।

माहेयाः । देशः । **भी०** ९ । ४९ ॥

माहेश्वरज्वरः । **शां०** २८९ । ४ ॥ [हरि० २ । १२२-१२३ ॥]

माहेश्वरीधारा । तीर्थं । **व०** ८२ । ११७ ॥

मिञ्जिकः । रुद्रसंभवः । **व०** २३१ । १० ॥

मिञ्जिका । रुद्रसंभवा । **व०** २३१ । १० ॥

मित्रः । द्वादशादित्येष्वन्यतमः । **आ०** ६६ । १५ ॥

+ **मित्रं** । सुहृत् । तस्य लक्षणं । **शां०** ८० । ३ ॥ तस्य स्तुतिः । **शां०** १७२ । २० ॥ तच्छब्दनिर्वचनं । **क०** ३६ । ३४ ॥

मित्रज्ञः । अग्निविशेषः । **व०** २२२ । १२ ॥

मित्रदेवः । क्षत्रियः । त्रैगर्तः । अर्जुनेन हतः । **क०** १८ । ११ ॥

मित्रसहः । कल्माषपादशब्दं पश्यत ।

मित्रधर्मा । अग्निविशेषः । **व०** २२२ । १२ ॥

मित्रवर्धनः । अग्निविशेषः । **व०** २२२ । १२ ॥

मित्रवान् । अग्निविशेषः । **व०** २२२ । १२ ॥

मिथिलः । भरतवंशोत्पन्नः क्षत्रियः । तत्पुत्रः जह्नुः । **अनु०** ७ । २ ॥

मिथिला । नगरी । **व०** २१० । २ ॥ Janakpur. The capital of the kingdom of Raj-Janaka. Mithila was the name both of the country and the capital.

मिथ्यः । अग्निविशेषः । **व०** २२१ । १९ ॥

मिश्रकं । तीर्थं । **व०** ८१ । ९१ ॥

मिश्रकेशी । अप्सराः । **आ०** ६६ । ४९ ॥ १२२ । ४३ ॥ **स०** १० । ११ ॥ तत्पुत्राः रौद्राश्वाज्जाताः अन्वग्भानुप्रभृतयः । **आ०** ८८ । ७ ॥

मुखमण्डिका । स्कन्दग्रहः । **व०** २३० । ३० ॥

+ **मुखरोगापादकानि कर्माणि** । **अनु०** २२० । ७-१३ ॥

मुचुकुन्दः । सू० वं० मान्धातृपुत्रः क्षत्रियः । तं प्रति भार्गवेण शरणागतरक्षणविषये कपोतोपाख्यानकथनं । **शां०** १४३ । ६ ॥ तस्य वैश्रवणेन संवादः । **शा०** ७४ । ५ ॥ [तद्भ्रातरौ पुरुकुत्सोम्बरीषश्च । तत्स्वसारः सौभरिऋषेर्भार्याः पञ्चाशत् । भा० ९ । ६ ॥]

[तेन कालयवनभस्मीकरणं । भा० १० । ५१ ॥ विष्णु० ५ । २३ ॥ हरि० २ । ५७ ॥]
[तेन श्रीकृष्णस्तुतिः । भा० १० । ५१ ॥]
मुञ्जकेतुः । क्षत्रियः । युधिष्ठिरसभायां । **स० ४ । २७** ॥
मुञ्जवटः । परमेश्वरस्य स्थानं । **व० ८१ । २२** ॥ **८३ । ६७** ॥
मुञ्जवान् । पर्वतः । **अश्व० ८ । १** ॥
मुण्डवेदाङ्गः । सर्पः । **आ० ५७ । १७** ॥
मुद्गरः । सर्पः । **आ० ५७ । १०** ॥
मुद्गरपर्णकः । सर्पः । **उ० १०३ । १३** ॥
मुद्गरपिण्डकः । सर्पः । **आ० ३५ । ९** ॥
मुद्गलः । कुरुक्षेत्रवासी श्रीहिद्रोणापरनामा ऋषिः । **व० २६१ । ३** ॥
[स भर्म्याश्वराजस्य पुत्रः । तत्पुत्रो दिवोदासः । तत्पुत्री शतानन्दमाता अहल्या । भा० ९ । २१ ॥]
१ **मुनिः** । दक्षप्रजापतिपुत्री । काश्यपभार्या । तत्पुत्राः षोडश देवगन्धर्वाः । **आ० ६६ । ४४** ॥
+ २ **मुनिः** । संन्यासी । तद्धर्माः । **आ० १२४ । ८–२२** ॥ तस्य लक्षणं । **आ० ८५ । ९—१८** ॥
३ **मुनिः** । अह्नः पुत्रः । **आ० ६७ । २३** ॥
मुनिदेशः । क्रौञ्चद्वीपसमीपस्थः । **भी० १२ । २२** ॥
+ **मुनिशूद्रयोः कथा** । **अनु० ३१** ॥
+ **मुनिसनत्कुमारसंवादः** । **शा० २२७** ॥
मुरः । असुरः । श्रीकृष्णेन हतः । **स० ५५ । २९** ॥
मुरुः । असुरः । **स० १४ । १४** ॥
मुसलः । विश्वामित्रस्य पुत्रः । **अनु० ७ । ५३** ॥
१ **मूकः** । सर्पः । **आ० ५७ । ९** ॥
२ **मूकः** । दैत्यः । अयं वराहरूपी सन् इन्द्रकीलपर्वते तपस्यतोऽर्जुनस्य समीपमागतस्तेनैव हतः **व० ३९ । ७** ॥ [शिवपु० शतरुद्रसं० ३९ ॥]
+ **मूढलक्षणं** । **उ० ३३ । ३८—४७** ॥
मूषकाः । देशः । **भी० ९ । ५९** ॥
+ **मूषिकमार्जारकथा** । **उ० १६० । १५** ॥
मूषिकादः । सर्पः । **स० ९ । ११** ॥ **उ० १०३ । १४** ॥
+ **मृगः** । चतुष्पाद्विशेषः । तज्जातिरुत्पत्तिः । **आ० ६७ । ६०** ॥
+ **मृगचारिणः** । ऋषयः । **अनु० ४५ । ४१** ॥
मृगधूमतीर्थं । **व० ८१ । १०१** ॥
मृगमन्दा । क्रोधवशायाः पुत्री । तत्पुत्राः ऋक्षाः सृमराश्च । **आ० ६७ । ६२** ॥
+ **मृगयात्रा** । **(मृगया)** । आखेटः । तस्याः क्षत्रियाणां धर्म्यत्वं । **अनु० २१५ । १** ॥
तत्करणं श्रीकृष्णार्जुनाभ्यां । **आ० २४७ । ६०** ॥
तत्करणं परीक्षिता । **आ० ४० । ११** ॥ संवरणेन । **आ० १८७ । २२** ॥
तत्करणं ययातिना । **आ० ७२ । १५** ॥ **७५ । ४** ॥
तत्करणं दुष्यन्तेन । **आ० ९० । ३** ॥
तत्करणं विश्वामित्रेण । **आ० १९१ । ५** ॥
मृगव्याधः । एकादशरुद्रेष्वन्यतमः । **आ० ६७ । २** ॥
+ **मृगस्वप्नोद्भवपर्व** । **व० २५९** ॥
मृगी । क्रोधवशायाः पुत्री । तत्पुत्राः सर्वे मृगाः । **आ० ६७ । ६२** ॥
मृतपः । दानवः । **आ० ६६ । २९** ॥
+ **मृतबालकोज्जीवनं** । परमेश्वरेण । **शां० १५२ । ११५** ॥
मृतानामौर्ध्वदैहिककरणं । युधिष्ठिरेण । **स्त्री० २६ । ३०** ॥ मृतानां दुर्योधनादीनां व्यासेन धृतराष्ट्रादिभ्यः पुनः प्रदर्शनं । **आश्र० ३४ । १८** ॥ मृतानां परीक्षिच्छमीकशृङ्गिणां व्यासेन जनमेजयाय प्रदर्शनं । **आश्र० ३७ । ७** ॥

मृत्युः। संहारकर्त्री देवता (दुर्गा)। तस्या उत्पत्तिः। **द्रो० ५३। १७॥ शां० २६३। १५॥**

तस्याः ब्रह्मणा सह प्रजानां मारणविषये विवादः। **शां० २६४। १॥**

तस्याः स्वरूपकथनं। **उ० ४२। २॥**

तस्या इक्ष्वाकुणा संवादः। **शां० १९७॥**

तस्या सर्पेण संवादः। **अनु० १। ५०॥**

तस्या अर्जुननाम्ना लुब्धकेन संवादः। **अनु० १। ६३॥**

तस्या ओघवत्या संवादः। **अनु० २। ६६॥**

मेकलाः। मेकलपर्वतसमीपस्थो देशः। **भी० ९। ४१॥** The country around the Mekala Hills i e the mount Amarakantaka, in which the river Nerbuda has got its source; hence the Nerbuda is called Mekalakanyaka.

मेघपुष्पः। श्रीकृष्णस्याश्वः। **अश्व० ११८। ५६॥**

मेघवासाः। असुरः। **स० ९। १८॥**

मेघवेगः। क्षत्रियः। दुर्योधनपक्षीयः। अभिमन्युना हतः। **द्रो० ४८। १६॥**

१ **मेघसन्धिः**। क्षत्रियः। जरासन्धपुत्रस्य सहदेवस्य पुत्रः। **अश्व० ८३। ४॥**

२ **मेघसन्धिः**। क्षत्रियः। **आ० २०१। ८॥**

मेधा। दक्षप्रजापतिपुत्री। धर्मप्रजापतेः पत्नी। **आ० ६७। १४॥**

१ **मेधातिथिः**। गौतमो ब्राह्मणः। तत्पुत्रश्चिरकारी। **शां० २७२। ४५॥ स० ७। १७॥ शां० ३४४। ७॥**

२ **मेधातिथिः**। क्षत्रियः। सो० वं० पूरुकुलोत्पन्नो ब्राह्मणः। तत्पुत्रः कण्वः। **अनु० २९५। ३१॥**

मेधाविकं। कालञ्जरपर्वतसमीपस्थं तीर्थं। **व० ८३। ५५॥**

मेनका। अप्सराः। **आ० १३२। ४६॥ स० १०। ११॥**

तद्दर्शनक्षुभितात्पृषतरेतसः द्रुपदस्योत्पत्तिः। **आ० १५०। १०॥**

तस्यां विश्वामित्राच्छकुन्तलाया उत्पत्तिः। **आ० ९३। १५॥**

१ **मेना**। नदी। **भी० ९। २३॥**

२ [**मेना**। पितॄणां कन्या हिमवतः पत्नी। हरि० १। १८॥ मत्स्य० १३॥]

मेरुः। सुवर्णपर्वतः। **स० २९। २२॥ भी० ६। १०॥** [भा० ५। १६॥ देवीभा० ८। ७॥]

तद्वर्णनं। **व० १६४। ११॥**

तत्रार्जुनस्य गमनं। **स० २९। १६॥**

मेरुभूताः। देशः। **भी० ९। ४८॥**

मेरुसावर्णः। ऋषिः। **अनु० २५५। ४४॥**

मेषहृत्। गरुडस्य पुत्रः। **उ० १०१। १२॥**

मैत्रेयः। ब्रह्मर्षिः। **स० ४। १६॥ शां० ४६। ७॥**

तस्य व्यासेन सह दानस्योत्तमत्वे संवादः। **अनु० १८२—१८४॥**

तस्य धृतराष्ट्रसमीपे आगमनं। **व० १०। ७॥**

तेन दुर्योधनं प्रति शापदानं। **व० १०। ३१॥**

[तस्य पिता कुषारवः। तन्माता मित्रा। भा० ३। १॥]

मैनाकः। हिमवतः पुत्रः पर्वतः। **व० ८७। ११॥ भी० १२। १८॥** The Sevalik Hills at the foot of the Himalayas between the Beas and the Ganges.

[तत्पुत्रः क्रौञ्चः। हरि० १। १८॥]

मैन्दः। वानरः। **व० २९०। १३॥** तेन सह राजसूयदिग्विजये सहदेवस्य युद्धं। **स० ३२। २०॥**

+ **मोक्षः**। चतुर्थः पुरुषार्थः। तत्प्रशंसा। **शां० १९५। ४२॥ २८०॥ अनु० २४३॥**

+ मोक्षधर्मपर्व । **शां० १७३–३६५** ।

मोदः । सर्पः । **आ० ५७** । **११** ॥

मोदागिरिः । अङ्गदेशस्य पूर्वभागे विद्यमानः पर्वतः । **स० ३१** । **२१** ॥ Monghir—Mudgagiri or Mudgallgiri in Bhagalpur District.

मोदापुरं । उलूकदेशसमीपस्थो देशः । तदधिपौ वामदेवः सुदामा च । **स० २८** । **११** ॥

मोहिनी । श्रीमता नारायणेनासुरवञ्चनार्थं धृतं स्त्रीरूपं । **आ० १८** । **५५** ॥ [भा० ८ । ९—१० ॥]

[तया शङ्करमोहनं । भा० ८ । १२ ॥]

मौञ्जायनः । ऋषिः । **स० ४** । **१९** ॥

१ **मौद्गल्यः** । नालायन्या भर्ता । **आ० २१२—२१३** ॥

२ **मौद्गल्यः** । सर्पसत्रे सदस्यः । **आ० ५३** । **९** ॥

मौनवेपगः । सर्पः । **आ० ५७** । **१७** ॥

+ मौसलयुद्धकथा । **मौस० ४** ॥ [भा० ३ । ४ ॥ ११ । ३० ॥]

+ म्लेच्छभाषा । तया विदुरेण युधिष्ठिरायोपदेशः । **आ० १५७** । **२०** ॥

म्लेच्छाः । देशः । **भी० ९** । **५७** ॥

य.

यकृल्लोमानः । देशः । **वि० ६** । **७** ॥ **भी० ९** । **४६** ॥

यक्षग्रहः । **व० २३०** । **५३** ॥

+ यक्षप्रश्नः । यक्षरूपिणा यमेन युधिष्ठिरं प्रति कृतः प्रश्नसमुदायः । **व० ३१४** । **४७** ॥

यक्षाः । देवयोनिविशेषाः । तेषां नामानि । **स० १०** । **१६—१९** ॥

तेषामगस्त्यशापः । **व० १६२** । **५७** ॥

यज्ञः । यागः । अध्वरः । स केन केन कर्तव्यः । **शां० १६३** । **५** ॥

तत्प्रतिनिधिकर्माणि । **अनु० १६४** । **५** ॥

तस्य प्रशंसा । **अनु० २३७** । **१—१०** ॥

तस्याप्राशस्त्यं । **शां० २७८** ॥

तन्मुखो देवाः । पञ्चदश । **व० २२२** । **११–१४** ॥

यज्ञदत्तः । (**वज्रदत्तः**) । भगदत्तपुत्रः । तेन सहार्जुनस्य युद्धं । **अश्व० ७५–७६** ॥

यज्ञवराहः । वराहरूपी विष्णुः । **स० ४५** । **१२** ॥ वाराहशब्दं पश्यत ।

यज्ञसेनः । द्रुपदः । **आ० ११०** । **७** ॥

१ **यतिः** । क्षत्रियः । सो० वं० नहुषस्य पुत्रः । ययातेर्भ्राता । बाल्यात्प्रभृतियोगमास्थितः । **आ० ६९** । **३३** ॥

२ **यतिः** । विश्वामित्रऋषेः पुत्रः । **अनु० ७** । **५८** ॥

३ **+ यतिः** । चतुर्थाश्रमी । संन्यासी । मद्धर्माः । **आ० ८५** । **५** ॥ **शां० १९०** ॥ **२५१** ॥ **२८४** ॥

तन्महिमा । **अश्व० १०८** । **१–१०** ॥

तच्छुश्रूषाप्रशंसा । **अनु० १४८** ॥ **१४९** ॥

तदाश्रमस्य परमपुरुषार्थसाधनत्वं । **अश्व० ४७** ॥

१ **यदुः** । क्षत्रियः । ययातिपुत्रः । तन्माता देवयानी । **आ० ६३** । **७** ॥

[तस्य वंशः । भा० ९ । २३ ॥ मत्स्य० ४३ ॥ विष्णु० ४ । ११ ॥ हरि० १ । ३३ ॥ वायु० ९४ ॥]

तद्वंशक्षयः मौसलयुद्धे । **मौ० ४** । **३६** ॥ [भा० ११ । ३० ॥]

२ **यदुः** । उपरिचरवसुपुत्रः । **आ० ६४** । **४४**॥

यमः । दक्षिणदिक्पालकः । सूर्यपुत्रः । तत्सभावर्णनं नारदेन युधिष्ठिरं प्रति । **स० ८** ॥

[तस्योत्पत्तिः । सूर्यात्संज्ञानाम्न्यां तद्भार्यायां । भा० ६ । ६ ॥ विष्णु० ३ । २ ॥ हरि० १ । ९ ॥ मत्स्य० ११ ॥ पद्म० ५ । ८ ॥ वायु० ८४ ॥ ब्रह्म० ६ ॥ वरा० २० ॥]

तस्य माण्डव्येन शापः । आ० ११७ । १७ ॥
तस्य विदुररूपेण जननं । आ० ६४ । १३८ ॥ ११५ । ४४ ॥
तस्य युधिष्ठिररूपेण जननं । आ० १२९ । २० ॥
तस्यागमनमर्जुनसमीपे । व० ४१ । ९ ॥
तस्य सावित्र्या संवादः । व० २९८ । १० ॥
तस्य गौतमेन सह मातापितृपरिचर्यायास्तद्दणापनयनविषये संवादः । शा० १२९ ॥
तेन युधिष्ठिराय वरदानं । व० ३१५ । १० ॥
यमकाः । जनाः । स० ७८ । ८८ ॥
यमदूतः । ऋषिः । विश्वामित्रपुत्रः । अनु० ७ । ५१ ॥
+ **यमयातना** । अनु० २२९ ॥
+ **यमलोकमार्गः** । व० २०३ । ४६–४९ ॥ अनु० २२९ ॥ अश्व० १०० ॥ [भा० ३ । ३० ॥]
यमुना । नदी । भी० ९ । १५ ॥ तस्याः सूर्यपुत्रीत्वं सूर्यशब्दे द्रष्टव्यं ।
तस्यां श्रीकृष्णार्जुनयोर्जलक्रीडा । आ० २४८ । १७ ॥
यमौ । नकुलसहदेवौ । आ० २१० । १८ ॥
ययातिः । नहुषस्य पुत्रः । आ० ६३ । ५ ॥ स० ८ । ८ ॥ वि० ५३ । १४ ॥
तच्चरित्रं संक्षेपेण । आ० ६९ । ३५ ॥ द्रो० ६३ ॥ शां० २८ । ९४ ॥
तच्चरित्रं विस्तरेण । आ० ७०—८७ ॥
[तत्कथा । भा० ९ । १८ ॥ हरि० १ । ३० ॥ वायु० ९३ ॥ मत्स्य० २४–४२ ॥ रा० ७ । ५८–५९ ॥ विष्णु० ४ । १० ॥ ब्रह्म० १२ ॥]
तस्य द्वे भार्ये । तयोः प्रथमा शुक्राचार्यपुत्री देवयानी । तस्या विवाहः । आ०७५ । ३९ ॥ तत्पुत्रौ यदुः तुर्वसुश्च । द्वितीया वृषपर्वपुत्री शर्मिष्ठा । तत्पुत्रा द्रुह्युः अनुः पूरुश्च । आ० ६३ । ७ ॥

तत्पुत्री माधवी । आ० ८७ । २३ ॥
तस्य विश्वाच्या सह रमणं । आ० ६९ । ५१ ॥
तस्य मृगयार्थं गमनं । आ० ७२ । १५ ॥ ७५ । ४ ॥
तस्य देवयान्या संवादः । आ० ७२ । २५ ॥ ७५ । १०–३६ ॥
तस्मै शुक्राचार्येण शापदानं । आ० ७७ । ५२ ॥
तेन निजवार्धकेन स्वयौवनविनिमयमनङ्गीकुर्वद्भ्यो यदुप्रभृतिभ्यश्चतुर्भ्यः स्वपुत्रेभ्यः शापदानं । आ० ७८ ॥
तेन स्ववचनकारिणे पूरवे कनिष्ठसूनवे वरदानं । आ० ७८ । ३६ ॥
तस्य वैराग्यप्राप्तिः । आ० ७९ । १२ ॥
तेन पूरवे पुनर्यौवनप्रत्यर्पणं । आ० ७९ । १७ ॥
तस्य तपोवनगमनं । आ० ७९ । ४० ॥
तस्य स्वर्गगमनं । आ० ८० ॥
तस्य स्वर्गसुखानुभवः । आ० ८१ ॥
तस्य स्वर्गात्पतनं । आ० ८२ । ६ ॥ उ० १२१ । १७ ॥
तस्याष्टकेन सह संवादः । आ० ८२—८४ ॥
तेन गोदानकरणं । व० १९८ ॥
तत्समीपे एकतश्श्यामकर्णानां हयानां याचनार्थं गालवस्य गमनं । तेन गालवाय हयप्रतिनिधितया स्वपुत्र्या माधव्या दानं । उ० ११५ । १—१५ ॥
तेन सरस्वतीतीरे यज्ञकरणं । श० ४२ । ३३ ॥
तत्कृतः पुष्करास्तेयशपथः । अनु० १४३ । २७ ॥
यवक्रीतः । भरद्वाजनामकस्य कस्यचिद्दषेः पुत्रः । व० १३७ । १३ ॥
तेन स्वस्यानधीतवेदप्रतिभानाय इन्द्रमुद्दिश्य तपश्चरणं । व० १३७ । १६ ॥
तेन परावसुभार्योपभोगः । व० १३८ । ५ ॥
तस्य हननं परावसुपित्रा रैभ्येण निर्मितया कृत्यया । व० १३८ । १९ ॥

तस्य पुनरुज्जीवनं । **व० १४० । २३ ॥**

यवक्षा । नदी । **भी० ९ । ३० ॥**

यवनः । श्रीकृष्णेन हतः । **व० १२ । ३३ ॥**
कालयवनशब्दं पश्यत ।

यवनाः । देशः । **भी० ९ । ६५ ॥**

यशोदा । सो० वं० हस्तिनो भार्या । तत्पुत्रो विकुञ्जनः (विकुण्ठनः) । **आ० ९३ । ३७ ॥**

यशोधरः । दुर्मुखनामकस्य पाञ्चालस्य पुत्रः । **द्रो० १८५ । ५ ॥**

याजः । यमुनातीरवासिनः काश्यपगोत्रोत्पन्नस्य कस्यचिद्द्विषेः पुत्रः । तद्भ्राता उपयाजः । **आ० १४९ । ८ ॥ १८१ । २२ ॥**

तेन द्रुपदस्य पुत्रोत्पत्त्यर्थं याजनं । **आ० १८१ । ३२ ॥**

याज्ञवल्क्यः । उपनिषत्सु प्रसिद्धः प्रथममहायुगीयवैशंपायनस्य शिष्यो भागिनेयश्च ब्रह्मर्षिः । **स० ४ । १८ ॥ स० ७ । १२ ॥**

[स ब्रह्मणोऽङ्गात्समुत्पन्नः । वायु० ६० ॥ ब्रह्मरातस्य पुत्रः । वैशंपायनस्य शिष्यः । विष्णु० ३ । ५ ॥]

[तस्य वैशंपायनाद्वेदाध्ययनादि । भा० १२ । ६ ॥]

तस्य सूर्याद्विद्याभ्यासः । **शां० ३२३ ॥** [भा० १२ । ६ ॥ विष्णु० ३ । ५ ॥]

[तेन जनकयज्ञे वादे ब्राह्मणाञ्जित्वा ब्रह्मोद्यग्रहणं शाकल्यमारणं च । वायु० ६० ॥]

तस्य जनकेन सह संवादः । **शा० ३१६–३२३ ॥**

तस्य विश्वावसुनामकगन्धर्वेण संवादः । **शां० ३२३ । २६ ॥**

याज्ञसेनिः । क्षत्रियः । धृष्टद्युम्नः । **भी० ११२ । १९ ॥**

यामुनाः । देशः । **भी० ९ । ५१ ॥**

यायावराः । जरत्कारोर्वंशकर्तार ऋषयः । **आ० १३ । १८ ॥ ४५ । १६ ॥**

युगन्धरः । सात्यकेः पुत्रः । द्रोणेन हतः । **द्रो० १६ । ४२ ॥**

+ **युगानि** । चत्वारि । कृतं त्रेता द्वापरः कलिश्चेति । तद्धर्मनिरूपणं । **व० १५१ । ११ ॥ भी० १० ॥ शां० ६९ ॥** [मत्स्य० १४२ –१४४ ॥ भा० १२ । ३ ॥ हरि० १ । ८ ॥ गरुडपु० २२३ ॥]

+ **युद्धं** । आयोधनं । तद्धर्माः । **शां० ९५ ॥ अनु० २१४ । २२ ॥**

तस्य धर्म्यत्वसमर्थनं । **शां० ९७ ॥**

तस्य दुष्टत्वं । **उ० २७ । ३ ॥**

युधामन्युः । क्षत्रियः । पाञ्चाल्यः । **उ० १९६ । ३ ॥** रथोदारः । **उ० १६९ । ३ ॥** तस्य युद्धं । **द्रो० १३० । २९ ॥** अश्वत्थाम्ना हतः । **सौ० ८ । ४३ ॥**

युधिष्ठिरः । अजातशत्रुः । धर्मपुत्रः । धर्मराजः । पाण्डुपुत्रः । यमात्कुन्त्यां जातः । **आ० ६३ । ६५ ॥** रथोदारः । **उ० १६९ । २ ॥**
तस्योत्पत्तिः । **आ० १२९ । १२ ॥**

तज्जननकालीनग्रहस्थितिः । **आ० १२९ । २१ ॥**

तस्य मुख्या भार्या द्रौपदी । तत्पुत्रः प्रतिविन्ध्यः । **आ० ६४ । १६५ ॥ ६८ । १५७ ॥**

तस्यान्या भार्या शैब्या देवकी । तत्पुत्रो यौधेयः । **आ० ९३ । ७५ ॥**

तस्य यौवराज्येऽभिषेकः । **आ० १५१ । १ ॥**

तस्यार्धराज्याभिषेकः । **आ० २२७ । २० ॥**

तस्य पट्टाभिषेकः । **शां० ३९ ॥**

तस्य संतापः बकसमीपे भीमसेनस्य प्रेषणविषये । **आ० १७६ । ८ ॥**

तेन द्रौपदीस्वयंवरे दुर्योधनपराजयः । **आ० २०५ । ४० ॥**

तस्य इन्द्रप्रस्थे नूतनसभाप्रवेशः । **स० ४ । ७ ॥**

तस्य राजसूयः । **स० ३८ ॥** [भा० १० । ७४ ॥]

तस्य शकुनिना सहाक्षद्यूतं । **स० ८५ । ९ ॥**

तस्य वनवासार्थं प्रस्थानं । **व० १ ॥**

तेनान्नप्राप्त्यर्थं सूर्यस्तुतिः । **व० ३ । १६ ॥**

तस्य सूर्यादक्षयपात्रप्राप्तिः। व० ३। ५२॥
तस्य दुर्योधनहननपूर्वकं राज्यस्वीकारविषये द्रौपद्या सह विवादः। व० २७-३२॥
तस्य व्यासात्प्रतिस्मृतिनामकविद्याप्राप्तिः। व० ३६। ३०॥
तस्य सकाशे बृहदश्वस्य वासः। व० ४९-७७॥
तस्य बृहदश्वादक्षहृदयप्राप्तिः। व० ७७। २३॥
तस्य सकाशे वने नारदस्य वासः। व० ७९-८३॥
तस्मै धौम्यऋषिणा नानाविधतीर्थक्षेत्रमाहात्म्यकथनं। व० ८४-८८॥
तस्य लोमशेन सह तीर्थयात्रा। व० ८९-१४४॥
तत्समीपे वने इन्द्रस्यागमनं जयाशीश्शंसनपूर्वकं स्वर्गं प्रति गमनं च। व० १६७॥
तेन अजगरकृतप्रश्नानामुत्तरदानं। व० १८२। १८॥
तस्य मार्कण्डेयेन सह वने वासः। व० १८५—२१५॥ [पद्म० १। ४०-४९॥]
तेन यक्षकृतप्रश्नानामुत्तरदानं। व० ३१४। ४७—१२४॥
तस्य विराटनगरे प्रसिद्धं नाम कङ्क इति। वि० २। २३॥ तत्र प्रच्छन्नं नाम जय इति। वि० ७। ६६॥
तेन दुर्गास्तवः। वि० ८॥
तेन सुशर्मगृहीतविराटमोचनार्थं भीमसेनचोदना। वि० ३५। १५॥
तस्य विराटेन सह देवने तेनाक्षैर्नासाया उपरि प्रहारः। वि० ७०। ३७॥
तेन दुर्योधनं प्रति ग्रामपञ्चकप्रार्थना। उ० ३१। १७॥
तस्य कुरुसेनादर्शनेन विषादः। भी० २१॥
तेन युद्धारम्भकाले भीष्मादिभ्यो जयाशीर्ग्रहणं। भी० ४३॥
तस्य जीवग्राहग्रहणप्रतिज्ञा द्रोणाचार्येण। द्रो० १२। २४॥
तस्य द्रोणाचार्येण सह युद्धं। द्रो० १०६॥
तेन द्रोणसमीपे 'अश्वत्थामा मृत' इति कथनं। द्रो० १९१। ५४॥
तस्य पराजयपूर्वकमपहासः कर्णेन। क० ४४॥
तेनार्जुनगर्हणं कर्णो नाद्यापि हत इति। क० ७१॥
तत्कृतगर्हणामसहमानेनार्जुनेन तद्वधोद्यमः। क० ७२॥
तस्यार्जुनेनाधिक्षेपः तद्वधप्रतिनिश्चितया। क० ७३॥
तेन भग्नसक्थिकस्य दुर्योधनस्य परिसान्त्वनं। श० ६०। २१॥
तेनाश्वत्थाममणिधारणं। सौ० १६। ३१॥
तस्य कुनखीभवनं गान्धार्या दृष्टिपातेन। स्त्री० १५। ७॥
तस्य निर्वेदः। शां० ९॥
तं प्रति तद्भ्रातृभिर्द्रौपद्या च प्रजापालनविधानं। शां० १०—१८॥
तं प्रति देवस्थाननामकऋषिवाक्यं। शां० २०॥
तस्य हास्तिनपुरप्रवेशः। शां० ३६। ४३॥
तस्मै कुन्त्या कर्णस्य स्वपुत्रत्वाभिधानपूर्वकं तस्योदककरणविधानं। स्त्री० २७। ७॥
तेन कुन्त्या पूर्वमेव कर्णस्य स्वाग्रजत्वाकथनरुषा सर्वासामपि स्त्रीणां मनसि किमपि गोप्यं न स्यादिति शापदानं। शा० ६। ११॥
तस्य बृहस्पतिना सहाध्यात्मविषये संवादः। अनु० १७३॥
तस्य बन्धुनिधनदुःखाद्वनं यियासोः श्रीकृष्णेन व्यासेन च परिसान्त्वनं। अश्व० २॥
तस्मै व्यासेन बन्धुवधसंभाविताशेषपापापनोदनायाश्वमेधकरणविधानं। अश्व० ३॥
तेनाश्वमेधकरणं। अश्व० ८९॥
[तेनाश्वमेधत्रयकरणं। भा० १। १२॥]
तस्याश्वमेधार्थं धनानयनाय हिमवद्गिरिगमनं। अश्व० ६४॥
तस्य राज्यपालनप्रकारः। आश्र० १॥

तस्मै वनं यियासता धृतराष्ट्रेण राजनीत्युपदेशः । **आश्र० ६—८ ॥**
तेन वनस्थधृतराष्ट्रादिदिदृक्षया वने शतयूपाश्रमगमनं । **आ० २४-२५ ॥**
तेन कुन्त्या उदकदानं । **आश्र० ४१ । १८ ॥**
तेन परीक्षिदादीनां राज्येऽभिषेकः । **महा० १ । ७ ॥**
तस्य स्वर्गगमनं । **महा० ३ । २५ ॥**
तस्य स्वर्गे बन्धुजनदिदृक्षोर्देवदूतेन नरकप्रदर्शनं । **स्वर्गा० २ । १४ ॥**
तेन गङ्गायामवगाहनेन मानुषशरीरत्यागः । **स्वर्गा० ३ । ४२ ॥**
१ **युयुत्सुः** । धृतराष्ट्रस्य वैश्यायां जातः पुत्रः । **आ० ६४ । १६२ ॥ २०१ । २ ॥**
तस्य कौरवपक्षात्पाण्डवपक्षप्रवेशः । **भी० ४३ । १०२ ॥**
तेन पाण्डवपक्षे स्थित्वा उलूकेन सह युद्धं । **क० १६ ॥**
२ **युयुत्सुः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य गान्धार्यां जातः पुत्रः । **आ० ६८ । ९३ ॥ १३१ । २ ॥**
युयुधानः । सात्यकिः ।
युवनाश्वः । क्षत्रियः । सू० वं० आर्द्रस्य पुत्रः । मान्धातुः पिता । **व० १२७ । ६ ॥**
तस्यान्यः पुत्रः श्रावस्तः । **व० २०५ । ३ ॥** [भा० ९ । ६ ॥]
यूपकेतुः । (यूपध्वजः) । क्षत्रियः । सो० वं० सोमदत्तपुत्रः । **द्रो० २५ । ५६ ॥** भूरिश्रवश्शब्दं पश्यत ।
+ **योगः** । चित्तवृत्तिनिरोधः । तन्निरूपणं । **शां० ३०६ ॥ ३११ ॥ अनु० २४६ ॥** [भा० ३ । २८ ॥]
योजनगन्धा । दाशपुत्री व्यासमाता । सत्यवतीशब्दं पश्यत ।
+ **योधलक्षणं । शां० १०१ ॥**
योनिद्वारं । क्षेत्रविशेषः । **व० ८२ ।** ९४ ॥
+ **योषित्** । स्त्रीशब्दं पश्यत ।
यौधेयः । क्षत्रियः । सो० वं० युधिष्ठिरस्य पुत्रः । तन्माता देवकी । **आ० ६३ । ७५ ॥**

र.

रक्षिता । अप्सराः । **आ० ६६ । ५० ॥**
+ **रक्षोब्राह्मणसंवादः । अनु० १८७ ॥**
रघुः । क्षत्रियः । सू० वं० । **वि० ५३ । १६ ॥** [खट्वाङ्गस्य पौत्रः । तस्य वंशः । भा० ९ । १० ॥]
रजताश्वः । शैनेयः । सात्यकिः । **द्रो० २३ । ३ ॥**
रजिः । क्षत्रियः । सू० वं० आयोः पुत्रः । तन्माता स्वर्भानवी । तद्भ्रातरः । नहुषः वृद्धशर्मा गयः अनेनाः इति चत्वारः । **आ० ६९ । २८ ॥** [तस्य चरित्रं । हरि० १ । २८ ॥ भा० ९ । १७ ॥]
रता । काचन देवस्त्री । तत्पुत्रः अहः । **आ० ६७ । २० ॥**
१ **रतिः** । कामस्य भार्या । **आ० ६७ । ३३ ॥** [तस्याः दक्षप्रजापतिस्वेदादुत्पत्तिः । कालिकापु० ३ ॥ शिवपु० सतीखं० ४ ॥]
२ **रतिः** । अप्सराः । **अनु० ५० । ४८ ॥**
रथचित्रा । नदी । **भी० ९ । २६ ॥**
+ **रथध्वजादिवर्णनं । उ० ५६ ॥ द्रो० १०५ ॥**
रथध्वानः । अग्निविशेषः । **व० २२१ । १८ ॥**
रथन्तरः । अग्निविशेषः । **व० २२२ । १९ ॥**
रथन्तरी । इलिलस्य भार्या । तत्पुत्राः दुष्यन्तादयः पञ्च । **आ० ६३ । २९ ॥** तेषां नामानि । दुष्यन्तः शूरः भीमः प्रवसुः वसुः इति । **आ० ८८ । १६ ॥**
रथप्रभुः । अग्निविशेषः । **व० २२१ । १८ ॥**
रथवाहनः । विराटस्य भ्राता । **द्रो० १५९ । ४१ ॥**
रथसेनः । क्षत्रियः । पाण्डवपक्षीयः । **द्रो० २३ । ६३ ॥**

रथस्था । नदी । आ० १८६ । २० ॥

+ **रथातिरथसंख्यानपर्व** । उ० १६५–१७२ ॥

+ **रथातिरथसङ्ख्यानं** । कौरवसेनायां । उ० १६६ ॥ पाण्डवसेनायां । उ० १६८ । ४१ ॥

रन्तिदेवः । [क्षत्रियः । सो० वं० पूरुवंशोद्भवस्य संकृतेः पुत्रः । भा० ९ । २१ ॥] तस्य कथा । द्रो० ६७ ॥ शां० २८ । १२० ॥ २५० । १६ ॥

तेन गोसवनामकयज्ञकरणं । तद्यज्ञीयपशुचर्मराशितश्चर्मण्वतीनामकनद्युत्पत्तिश्च । अनु० १२३ । १० ॥

रमणकद्वीपः । (रामणीयकः) । भी० ८ । २ ॥

तत्र गरुडेन सर्पाणां वहनं । आ० २६ । ८ ॥

रम्भा । अप्सराः । आ० ६६ । ५० ॥ १२२ । ४४ ॥ स० १० । ११ ॥

तस्या विश्वामित्रेण शापदानं । अनु० ६ । ११ ॥ [रा० १ । ६४ ॥]

१ **रविः** । क्षत्रियः । जयद्रथस्य भ्राता । व० २६६ । ११ ॥

+२ **रविः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । भीमसेनेन हतः । श० २५ । ५ ॥

रसातलं । पाताललोकः । उ० १०२ ॥

रहस्या । नदी । भी० ९ । १९ ॥

१ **राका** । (रागा) । अङ्गिरसः पुत्री । व० २२१ । ४ ॥

२ **राका** । खरशूर्पणखयोर्माता राक्षसी । व० २७६ । ८ ॥

राक्षसग्रहः । व० २३० । २५ ॥

+ **राक्षसब्राह्मणसंवादः** । अनु० १८७ ॥

+ **राक्षससत्रं** । स्वपितरं राक्षसभक्षितं श्रुतवता पराशरेण ऋषिणा सर्वराक्षसनाशार्थं कृतो यज्ञः । आ० १९७ । २ ॥

राक्षसीनां । गर्भधारणानुपदं प्रसवः । आ० १६९ । ११ ॥

+ **राक्षसेन रक्षणं** । द्रौपद्याः । वि० १९ । २५ ॥

रागा । प्रथमं राकाशब्दं पश्यत ।

+ **राजधर्मपर्व** । शां० १—१३० ॥

+ **राजधर्मकथनं** । शां० ५५—५७ ॥

राजधर्मा । बकः । तस्य कथा । शां० १६८—१७२ ॥

राजन् । (राजा) । द्वितीयो वर्णः । तस्य गुणाः । शां० ६७ । ९ ॥

तस्य कालं प्रति कारणत्वं । शां० ६९ । २५ ॥

तस्य चण्डालेन सह संवादः । ब्रह्मस्वापहारस्यानर्थहेतुतायां । अनु० १५८ ॥

तन्नामानि । आ० ६८ ॥ स० ४ । २७ ॥ ८ । ८ ॥ ३७ ॥ उ० ४ ॥ अनु० २७१ ॥

तस्य दशश्रोत्रियसमत्वं । आ० ४१ । ३१ ॥

तद्वंशे असुराणामुत्पत्तिः । आ० ६५ । २७ ॥

तन्नीतिकथनं । स० ५ । २० ॥ शां० ६८ । ६९ ॥ ८९ ॥ आश्र० ६–८ ॥

तत्पुरोहितस्वरूपकथनं । शा० ७३ ॥

तस्य पुरोहितस्य च कथा । अनु० ३१ ॥

तद्वसतौ निवासप्रकारकथनं पाण्डवान्प्रति धौम्येन । वि० ५ । ८ ॥

राजनी । नदी । भी० ९ । २१ ॥

+ **राजनीतिः** । स० ५ । २० ॥ शां० ६८ ॥ ७० ॥ ८९ ॥ आश्र० ६–८ ॥

राजपुरं । कलिङ्गदेशस्थं चित्राङ्गदस्य नगरं । शां० ४ । ३ ॥

राजसूयः । यागः । युधिष्ठिरकृतः । स० ३८ ॥ [भा० १० । ७४ ॥]

तत्रागतानां राज्ञां नामानि । स० ३७ ॥

तत्करणे युधिष्ठिरं प्रति नारदद्वारा पाण्डोः संदेशः । स० १२ । २८ ॥

तत्र ऋत्विजां नामानि । **स० ३३ । ३२ ॥**

तस्य प्रशंसा । **स० १२ ॥ ७१ ॥ ७८ ॥ ७९ ॥**

तत्सभायां दुर्योधनस्य पतनं । **स० ७४ । ६ ॥**

तत्करणार्थं दुर्योधनस्य यत्नः । **व० २५६ । ६ ॥**

तत्करणं हरिश्चन्द्रेण । **स० १२ । १६ ॥**

+ राजसूयपर्व । स० ३३—३८ ॥

+ रात्रियुद्धारम्भः । द्रो० १५३॥ तत्समाप्तिः । **द्रो० १८७ ॥**

राधा । सूतराजस्याधिरथस्य भार्या । कर्णस्य माता । **आ० ६८ । १४० ॥ व० ३१० । २ ॥**

राधेयः । कर्णः । **आ० २०५ । २६ ॥**

१ रामः । श्रीमन्नारायणावतारभूतः क्षत्रियः । सू० वं० दशरथस्य पुत्रः । तन्माता कौसल्या । **व० २७५ । ८ ॥**

तदवतारकथा । **स० ५० ॥ व० १४९ । ३१ ॥ १५० ॥** [भा० ९ । १०—११ ॥ पद्म० ६ । २६९—२७१ ॥ वायु० ८८ ॥]

तस्योपाख्यानं । **व० २७५ ॥ द्रो० ५९ ॥ शां० २८ । ५१ ॥**

तेन परशुरामतेजोहरणं । **व० ९८ । ७ ॥**

तस्य यौवराज्याभिषेकोद्यमः । **व० २७८ । ७ ॥**

तस्य वनगमनं । **व० २७८ । ३० ॥ २८१ । ११ ॥**

तेन रावणवधः । **स० ५० । २३ ॥ व० २९१ । २९ ॥ द्रो० ५९ । ७ ॥**

तस्य पट्टाभिषेकः । **व० २९२ । ६७ ॥**

तत्कथा हनुमता भीमसेनं प्रति प्रोक्ता । **व० १४९ । ३१ ॥**

२ रामः । परशुरामः ।

३ रामः । बलरामः ।

रामतीर्थं । व० ८२ । ७२ ॥ ८३ । १६ ॥ श० ५० । ७ ॥

रामह्रदः । तीर्थं । **व० ८१ । २६ ॥**
Rama-hrada. A sacred tank near Thaneswar, where Parasurama is said to have given oblations to the names of his ancestors after destroying the Kshatriyas.

+ रामोपाख्यानपर्व । व० २७४—२९३ ॥

रावणः । विश्रवसः पुत्रो राक्षसाधिपः । तन्माता पुष्पोत्कटा । तस्योत्पत्तिः । **व० २७६ । ७ ॥**

तस्य कार्तवीर्येण बन्धनं । **स० ९६ । ४३ ॥**

तस्य ब्रह्मणो वरप्राप्तिः । **व० २७६ । १५ ॥**

तेन सीतापहारः । **व० २७९ । ४४ ॥**

तस्य वधः श्रीरामेण । **स० ५० । २३ ॥ व० २९१ । २९ ॥ द्रो० ५९ । ७ ॥**

+ राष्ट्रगुप्तिप्रकारः । शां० ८७ ॥

+ रासभीमतङ्गसंवादः । अनु० ३ ॥

राहुः । सिंहिकापुत्रः । नवग्रहेष्वन्यतमः । **आ० ६६ । ३१ ॥ स० ११ । २९ ॥ भी० १२ । ३९ ॥**

तच्छिरश्छेदः । **आ० १९ । ७ ॥**

रिष्टः । क्षत्रियः । **स० ८ । १५ ॥**

१ रुक्मरथः । मद्रराजस्य शल्यस्य पुत्रः । तस्य भ्रातर एकोनशतं । **आ० २०१ । १४ ॥ भी० ४७ । ४८ ॥**

तस्य सर्वभ्रातृसहितस्याभिमन्युना वधः । **द्रो० ४५ । १३ ॥** सहदेवेन वध इति । **क० २ । २९ ॥**

२ रुक्मरथः । द्रोणाचार्यः । **द्रो० १३ । २३॥**

रुक्माङ्गदः । शल्यस्य पुत्रः । **आ० २०१ । १४॥**

रुक्मिणी । विदर्भराजस्य भीष्मकस्य पुत्री । श्रीकृष्णस्य प्रथमा भार्या । तद्भ्राता रुक्मी ।

तां प्रति महालक्ष्म्या स्वनिवासयोग्यस्थलकथनं । **अनु० ३२ ॥**

तस्या अग्निप्रवेशः । **मौ० ८ । ७४ ॥**

[तस्याः स्वयंवरस्थायाः श्रीकृष्णेन हरणं । भा० १० । ५३ ॥ हरि० २ । ५९ ॥ विष्णु० ५ । २६ ॥]

[तस्याः श्रीकृष्णेन सह प्रेमकलहः । भा० १० । ६० ॥]

[तस्याः प्रद्युम्ननामकपुत्रोत्पत्तिः । भा० १० । ५५ ॥ हरि० २ । ६० ॥ विष्णु० ५ । २६ ॥]

[तत्पुत्री चारुमती । कृतवर्मसुतस्य बलेर्भार्या । भा० १० । ६१ ॥ विष्णु० ५ । ८ ॥]

रुक्मिण्याश्रमः । व० १३२ । १८॥ उज्जानकस्य समीपे ।

रुक्मी । भीष्मकराजस्य पुत्रः । रुक्मिण्या भ्राता । आ० ६८ । ६२ ॥ व० २५५ । ११ ॥

तस्य श्रीकृष्णेन श्मश्रुकेशवपनेन विरूपकरणं । भा० १० । ५४ ॥

तस्य कौरवपाण्डवयुद्धे साहाय्यकरणेच्छया कुरुक्षेत्रं प्रति गमनं । उभाभ्यामपि तत्साहाय्यानङ्गीकरणं च । उ० १५८ ॥

[तस्य वधो बलरामेण । भा० १० । ६१ ॥ हरि० २ । ६१ ॥]

[तत्पुत्री रुक्मवती । तस्याः शुभाङ्गीति नामान्तरं । प्रद्युम्नस्य भार्या । भा० १० । ६१ ॥ हरि० २ । ६१ ॥]

१ **रुचिः** । अप्सराः । अनु० ५० । ४७ ॥

२ **रुचिः** । देवशर्मभार्या । तस्या इन्द्रेण कामनं । अनु० ७५ । ४१ ॥

रुचिपर्वा । क्षत्रियः । कौरवपक्षीयः । पार्वतीयेन सुपर्वणा हतः । द्रो० २६ । ५३ ॥

रुद्रः । शिवः । शम्भुः । शङ्करः ।

तेन समुद्रमथनसमये विषपानं । आ० १८ । २५ ॥

तेन जयद्रथाय श्रीकृष्णमाहात्म्यकथनं । व० २७३ । ३२ ॥

तन्माहात्म्यकथनं । द्रो० २०३ । ५१ ॥ सौ० १७ ॥ अनु० ४५ । ४९ ॥

तस्य श्मशानवास नीलकण्ठत्व वृषवाहनत्व चन्द्रकलाधारणादीनां कारणकथनं । अनु० २०७ ॥

तत्कृतो दक्षाध्वरध्वंसः । अनु० २६५ ॥

तस्य तृतीयनेत्रोत्पत्तिः । अनु० २०५ । ३५ ॥

तस्य सनत्कुमारेण सह तत्वसृष्टिविषये संवादः । अनु० १६५ ॥

तेन पार्वतीं प्रति वर्णाश्रमधर्मकथनं । अनु० २०८ ॥

तस्य पार्वतीसकाशादनेकविधस्त्रीधर्मश्रवणं । अनु० २४९—२५० ॥

तन्नाम्नां निर्वचनं । शां० ३५२ । ४५ ॥

तस्य श्रीनारायणेन सह युद्धं । शां० ३५२ । ४२ ॥

तस्य ब्रह्मणो ललाटादुत्पत्तिः । शां० ३६० । ११ ॥

तद्धनुर्ज्याच्छेदः । सौ० १८ । १९ ॥

तेन श्रीकृष्णाय वरदानं । अनु० ४६ ॥

तत्स्तुतिः । श्रीकृष्णार्जुनकृता । द्रो० ८० । ५५ ॥

[तन्निन्दा दक्षप्रजापतिकृता । भा० ४ । २ ॥]

तत्स्तुतिः । दक्षप्रजापतिकृता । शां० २९० । ७३ ॥

तन्महिमा । सौ० १७ ॥ अनु० ४५ ॥

तत्स्तुतिः । तण्डिकृता । अनु० ४७ ॥

तत्स्तुतिः । अश्वत्थामकृता । सौ० ७ । २ ॥

तत्स्तुतिः । मरुत्तराजकृता । अश्व० ८ । १४ ॥

तल्लिङ्गार्चनमहिमा । अनु० २४७ ॥

तस्य पार्वत्या सह रतियोगः । अनु० १३० । ६१ ॥

तत्सहस्रनामस्तोत्रं । अनु० ४८ । ३१–१५३ ॥ [लिङ्गपु० ६५ ॥ ९८ ॥ शिवपु० कोटिरुद्रसं० ३५ ॥]

रुद्रकोटितीर्थं । व० ८० । ११८ ॥ ८१ । ७७ ॥

रुद्रसेनः । क्षत्रियः । पाण्डवपक्षीयः । द्रो० १५९ । ३८ ॥

रुद्राः । एकादश । एकादशरुद्रशब्दं पश्यत ।

रुद्राणी । पार्वती । स० ११ । ४१ ॥

रुद्रावर्तं । तीर्थं । व० ८२ । ३७ ॥

रुमण्वान् । जमदग्नेर्ज्येष्ठः पुत्रः । तद्भ्रातरः सुषेणः

वसुः विश्वावसुः परशुरामश्च । **व० ११७ । ११ ॥**

रुरुः । ऋषिः । प्रमतेः पुत्रः । तन्माता घृताची अप्सराः । तद्भार्या प्रमद्वरा । तत्पुत्रः शुनकः । **आ० ८ । २ ॥ ५८ । ३१ ॥ अनु० ८ । ६५ ॥**

तस्य विवाहः । **आ० ९ । २४ ॥**

तस्य डुण्डुभेन संवादः । **आ० १०–१२ ॥**

रुशङ्कुः । उशङ्कुशब्दं पश्यत ।

रुषद्रुः । क्षत्रियः । **स० ८ । १३ ॥**

रूपवाहिका: । देशः । **भी० ९ । ४३ ॥**

१ रेणुकः । अमृतरक्षको देवः । **आ० ३२ । १८ ॥**

२ रेणुकः । कश्चिद्गजः । **अनु० १९५ । ४ ॥**

रेणुका । जमदग्निभार्या । प्रसेनजिन्नामकनृपसुता । **व० ११७ । २ ॥** पश्चादुत्पन्ना अयोनिजा । **अनु० ५३ । २७ ॥** तस्मात्प्रसेनजित् तस्याः पोषकः पितेति भाति ।

[इयमिक्ष्वाकुवंश्यस्य रेणोः पुत्री । भा० ९ । १५ ॥ हरि० १ । २७ ॥]

[इयं सुवेणोः पुत्री । अस्याः कामलीति नामान्तरं । वायु० ९१ ॥]

तस्याः स्त्रीभिः सह जलक्रीडां कुर्वतश्चित्ररथनामकगन्धर्वराजस्य दर्शनेन कामविकारोत्पत्तिः । **व० ११७ । ७ ॥** [भा० ९ । १६ ॥]

तच्छिरश्छेदः । तत्पातिव्रत्यभङ्गरुष्टजमदग्निप्रेरितेन परशुरामेण । **व० ११७ । १५ ॥** [भा० ९ । १६ ॥]

तस्याः शिरःपादस्य सूर्यातपेन संतापे भृगुणा छत्रोपानन्निर्माणं । **अनु० १४४ ॥**

रेणुकातीर्थं । **व० ८० । ८३ ॥** In the Punjab, about 16 miles north of Nahan.

रेणुमती । (**करेणुमती**) । नकुलभार्या शिशुपालपुत्री । तत्पुत्रो निरमित्रः । **आ० ९३ । ७८ ॥**

रेवती । स्कन्दग्रहः । **व० २३० । २९ ॥**

रेवतीसुतः । स्कन्दः । **व० २३३ । ६ ॥**

रैभ्यः । विश्वामित्रपुत्रः । **शां० ४८ । ५७ ॥ स० ४ । २२ ॥**

स भरद्वाजस्य सखा । तत्पुत्रौ अर्वावसुपरावसू । **व० १३७ ॥ १२–१३ ॥**

तदाश्रमगमनं युधिष्ठिरस्य । **व० १३७ । ९ ॥**

तस्य हननं तत्पुत्रेण परावसुना मृगभ्रान्त्या । **व० १४० । ६ ॥**

तस्य पुनरुज्जीवनं । **व० १४० । २०–२३ ॥**

१ रैवतः । स्कन्दग्रहः । **व० २३० । २९ ॥**

२ रैवतः । द्वारकासमीपस्थः पर्वतः । **आ० २१९ । १२ ॥**

तत्र श्रीकृष्णस्य गमनं । **अश्व० ५९ । ४ ॥**

तत्रार्जुनस्य गमनं । **आ० २१८ । २ ॥**

रैवतकः । पर्वतः । **भी० ११ । १८ ॥** Mount Girnaur near Junagar in Guzerat, north of Prabhasa–Somnath.

+ रोगापादकानि कर्माणि । अनु० २२०–२२१ ॥

१ रोचमानः । उरगापुर्या अधिपतिः । अर्जुनेन राजसूयदिग्विजये पराजितः । **स० २८ । १९ ॥**

२ रोचमानः । अश्वमेधपुरीश्वरः । क्षत्रियः । चैद्यः । **आ० ६८ । १८ ॥ २०१ । १० ॥** भीमसेनेन राजसूयदिग्विजये पराजितः । **स० ३० । ८ ॥** पाण्डवपक्षीयः । **उ० १७२ । १ ॥** कर्णेन हतः । **क० ५१ । ५० ॥** तत्पुत्रो हेमवर्णः । **द्रो० २३ । ६८ ॥**

रोमपादः । लोमपादशब्दं पश्यत ।

रोमहर्षणः । पौराणिकः सूतः । तत्पुत्र उग्रश्रवाः । **आ० १ । ५ ॥ स० ४ । १८ ॥**

[तस्य वधो बलरामेण । भा० १० । ७८ ॥]

रोहिणः । रौहिणशब्दं पश्यत ।

१ **रोहिणी**। सुरभ्याः पुत्री। तदपत्यानि गावः। **आ० ६७। ६७–६८॥**

२ **रोहिणी**। दक्षप्रजापतिपुत्री नक्षत्ररूपिणी चन्द्रभार्या। **श० ३६। ५॥**

३ **रोहिणी**। वसुदेवभार्या। तत्पुत्रो बलरामः। **मौ० ८। १८॥**

रोही। नदी। **भी० ९। ३०॥** In Afganistan. It was also called Roha.

रोहीतकः। देशः। **स० ३५। ४॥** Rohtak, forty-two miles north west of Delhi.

तद्विजयः कर्णेन। **व० २५५। २०॥**

रौद्रकर्मा। क्षत्रियः। सो० वं० धृतराष्ट्रस्य पुत्रः। **आ० ६८। १०४॥ ११३१। १२॥** भीमसेनेन हतः। **द्रो० १२७। ४४॥**

रौद्राश्वः। क्षत्रियः। सो० वं० पूरोः पुत्रः। तन्माता पौष्टी। तद्भ्रातरौ प्रवीरः ईश्वरश्च। तत्पुत्रा ऋचेयुप्रभृतयो दश मिश्रकेशीनाम्न्यामप्सरसि जाताः। **आ० ८८। ४—११॥**

रौमहर्षणिः। उग्रश्रवाः। **आ० १। ११॥**

रौरवः। नरकः। **अनु० २०३। ३॥**

रौहिणः। देववटवृक्षः। **आ० २९। ४५॥**

तस्य परिमाणं। **आ० ३०। २३॥**

तच्छाखाभङ्गो गरुडेन। **आ० २९। ४८॥**

ल.

१ **लक्षणा**। दुष्यन्तस्य प्रथमा भार्या। **आ० ८८। १८॥** तस्या लाक्षीति नामान्तरं। तत्पुत्रो जनमेजयः। **आ० ६३। ३०॥**

२ **लक्षणा**। दुर्योधनपुत्री। लक्ष्मणाशब्दं पश्यत।

३ **लक्षणा**। अप्सराः। **आ० १३२। ४४॥**

४ **लक्षणा**। मद्राधिपस्य पुत्री श्रीकृष्णमहिषी। **स० ५७। २८॥**

१ **लक्ष्मणः**। क्षत्रियः। सू० वं० दशरथपुत्रः। तन्माता सुमित्रा। तद्भ्राता शत्रुघ्नः। **स० ८। १८॥ ५०। १०॥ व० २७५। ८॥**

तेनेन्द्रजिद्वधः। **व० २९०। २४॥**

२ **लक्ष्मणः**। क्षत्रियः। सो० वं० धार्तराष्ट्रस्य दुर्योधनस्य पुत्रः। रथसत्तमः। **उ० १६६। १४॥**

तस्याभिमन्युना सह युद्धं। **भी० ५५। ८॥**

तस्याभिमन्युना पराजयः। **भी० ७३। ३२–३८॥**

तस्य वधोऽभिमन्युना। **द्रो० ४६। १८॥**

तच्छववर्णनं। **स्त्री० २०। ३४॥**

१ **लक्ष्मीः**। महालक्ष्मीः।

२ **लक्ष्मीः**। दक्षप्रजापतिपुत्री। धर्मप्रजापतिभार्या। **आ० ६७। १४॥**

लक्ष्यवेधः। अर्जुनेन। द्रोणाचार्यकृतास्त्रविद्यापरीक्षायां। **आ० १४३। ९॥** द्रौपदीस्वयंवरे तेनैव। **आ० २०३। २५॥** [श्रीकृष्णेन। भा० १०। ८३॥]

लङ्का। राक्षसराजधानी। **व० २८१। ४२॥** तत्र युधिष्ठिरराजसूयार्थं करादानाय घटोत्कचस्य गमनं। **स० ३४॥** Ceylon.

लज्जा। दक्षप्रजापतिपुत्री धर्मप्रजापतिभार्या। **आ० ६७। १५॥** तस्या ह्रीरिति नामान्तरं।

लता। अप्सराः। शापेन ग्राहत्वं प्राप्ता। अर्जुनेन मोचिता। **आ० २३६। २०॥**

लपिता। मन्दपालस्योपभार्या शार्ङ्गी। जरितायाः सपत्नी। **आ० २५५। १७॥**

लपेटिका। तीर्थं। **व० ८३। १५॥**

लम्बकाः। (**लम्पाकाः**।) देशः। **द्रो० १२१। ४६॥** Lamghan on the northern bank of the Kabul river.

लवणासुरः। मधुदानवपुत्रः। **आ० २७। २२॥**

तस्य वधः शत्रुघ्नेन। **स० ५०। २७॥**

लाक्षी। दुष्यन्तभार्या। तस्या लक्षणेति नामान्तरं। तत्पुत्रो जनमेजयः। **आ० ६३। ३०॥ ८८। १८॥**

लाङ्गली । नदी । **स० ९ । २६ ॥**

लिखितः । शङ्खस्य भ्राता । ऋषिः । **स० ७ । ११ ॥ शां० २३ । १८ ॥**

+ लिङ्गार्चनफलं । अनु० २४७ ॥

लीलाढ्यः । ऋषिः । विश्वामित्रपुत्रः । **अनु० ७ । ५३ ॥**

लुब्धकः । अर्जुनकनामा किरातः । तस्य गौतमी-मृत्युसर्पैः संवादः । **अनु० १ । २२ ॥ ३६ । ६३ ॥**

लेवलिका । नदी । **व० ८२ । १६३ ॥**

लोकोद्धारं । तीर्थं । **व० ८१ । ४५ ॥**

लोपामुद्रा । विदर्भराजदुहिता । अगस्त्यमहर्षेः पत्नी । तस्या उत्पत्तिः । **व० ९४ । २४ ॥**

तस्याः सत्यवतीति नामान्तरं । **व० ९४ । २९॥**

तस्या विवाहः । **व० ९५ । ७ ॥**

तस्यां दृढस्युनामकपुत्रोत्पत्तिः । **व० ९७ । ३१ ॥**

+ लोभः । दुष्टो गुणः । तन्निन्दा । **शां० १६१ ॥**

+ लोभादिजयोपायः । शां० १५६ ॥

लोमपादः । सो० वं० अनोः कुलोत्पन्नस्याङ्गराजस्य वंशीयः । दशरथस्य सखा । **व० १११ । १९ ॥**

[तस्य दशरथ इति नामान्तरं । हरि० १ । ३१ ॥ २ । ९३ ॥]

तस्य राज्ये अनावृष्टिः । **व० १११ । ७ ॥**

तस्य पुत्री शान्ता । ऋश्यशृङ्गमहर्षेर्भार्या । **व० ११४ । ११ ॥** अधिकं शान्ताशब्दे द्रष्टव्यं ।

तस्य राज्ये ऋश्यशृङ्गमहर्षेरागमनेन वृष्टिप्रादुर्भावः । **व० ११४ । १० ॥**

लोमशः । ऋषिः । तस्य युधिष्ठिरसमीपे वने आगमनं । **व० ४५ ॥ ८९ । १ ॥**

तेन धर्मरहस्यकथनं । **अनु० १९२ ॥**

+ लोमशतीर्थयात्रा । व० ९१—१५७ ॥

लोमहर्षणः । रोमहर्षणशब्दं पश्यत ।

१ **लोहिताक्षः** । सूतः । जनमेजयसर्पसत्रे स्थपतिः । **आ० ५१ । १५ ॥ ५६ । ६ ॥ ५८ । १२॥**

२ **लोहिताक्षः** । स्कन्दपार्षदः । **श० ४६ । २४॥**

लोहिताश्वः । (**रोहिताश्वः**) । हरिश्चन्द्रपुत्रः । **व० ७७ । ३१ ॥**

लौहितारणिः । नदी । **भी० ९ । १८ ॥**

१ **लौहित्यः** । समुद्रः । **आ० २ । २६७ ॥ महा० १ । ३४ ॥**

२ **लौहित्यः** । नदः । **स० ९ । २६ ॥** A portion of the river Brahmaputra north of Pragjyotishapura.

लौहित्यतीर्थं । व० ८३ । २ ॥

लौहित्या । नदी । **भी० ९ । ३५ ॥**

व.

वंशगुल्मतीर्थं । व० ८३ । ९ ॥ A sacred Reservoir (kund) on the table land of Amarakantaka which is situated, about four miles and a half from the source or the first fall of the Nerbuda.

वंशमूलतीर्थं । व० ८१ । ४१ ॥

वंशा । प्राधायाः पुत्री । **आ० ६६ । ४५ ॥**

वक्रः । करूशदेशाधिपतिर्दन्तवक्रः । **स० १४ । १२ ॥**

वक्रद्वारः । पर्वतः । **शां० ३२५ । १८४ ॥**

वक्षोग्रीवः । ऋषिः । विश्वामित्रऋषिपुत्रः । **अनु० ७ । ५३ ॥**

वङ्गः । क्षत्रियः । बलिराजपुत्रः । तन्मातरि सुदेष्णायां दीर्घतमस ऋषेर्जातः । **आ० ११३ । ५३ ॥**

वङ्गाः । देशः । **भी० ९ । ४६ ॥** The Province of Bengal.

१ **वज्रः** । क्षत्रियः । श्रीकृष्णस्य पौत्रः । **मौ० ८ । ३९ ॥**

तस्य राज्याभिषेकः । **मौ० ८ । ७३ ॥**

२ **वज्रः** । ऋषिः । विश्वामित्रस्य पुत्रः । **अनु० ७ । ५२ ॥**

वज्रविष्कम्भः । गरुडपुत्रः । उ० १०१ ।१०॥
वज्रव्यूहः । पाण्डवानां । भी० १९ । ३५ ॥ ८१ । २३ ॥
वटेश्वरपुरं । व० ८२ । १२९ ॥
वत्सः । प्रतर्दनस्य पुत्रः । परशुरामेण हतेषु क्षत्रियेषु गोवत्सैः संवर्धितत्वादुर्वरितः । शां० ४८ । ८६ ॥ [दिवोदासस्य पौत्रः । तस्य भ्राता गर्गः । वायु० ९२ ॥]
वत्सनाभः । महर्षिः । तच्चरित्रं । अनु० ३३ ॥
वत्सराजः । आ० २०१ । २२ ॥
वदान्यः । ऋषिः । तद्दुहिता सुप्रभा अष्टावक्रऋषेर्भार्या । अनु० ५० । ११ ॥
+ **वधप्रतिनिधित्वमधिक्षेपस्य** । क० ७२ । ८१—८६ ॥
वधूसरा । नदी । रुदन्त्या भृगुभार्यायाः पुलोमाया अश्रुबिन्दुभ्य उत्पन्ना । आ० ६ । ८ ॥
वध्राः । देशः । भी० ९ । ५५ ॥
१ **वनायुः** । (**वनायवः**) । देशः । भी० ९ । ५६ ॥ Arabia.
२ **वनायुः** । दनोः पुत्रः । आ० ६६ । ३० ॥
३ **वनायुः** । क्षत्रियः । पुरूरवसः पुत्रः । आ० ६९ । २८ ॥
वनेयुः । क्षत्रियः । रौद्राश्वपुत्रः । आ० ८८ । ९ ॥
वन्दना । नदी । भी० ९ । १८ ॥
वन्दी । वरुणस्य पुत्रः । व० १३६ । २४ ॥
वपुष्टमा । पाण्डवप्रपौत्रस्य जनमेजयस्य भार्या । काशिराजस्य सुवर्णवर्मणः पुत्री । आ० ४४ । ८ ॥
वयस्यः । अङ्गिरसः पुत्रः । ऋषिः । अनु० १३२ । ४२ ॥
वरदानतीर्थं । यत्र दुर्वाससा विष्णवे वरो दत्तः । व० ८० । ६५ ॥ Baroda where Rishi Durvasa gave a boon to Vishnu.

वरा । नदी । भी० ९ । २६ ॥
वराङ्गी । त्रिशङ्कोः पुत्री शर्यातेर्भार्या । तत्पुत्रोऽहंयातिः । आ० ६३ । १३ ॥
वराणसी । नदी । भी० ९ । ३१ ॥
१ **वराहः** । ऋषिः । स० ४ । २३ ॥
२ **वराहः** । भगवतो नारायणस्य मत्स्यादिषु तृतीयोऽवतारः । स० ४५ । ४ ॥ व० १४४ । २९ ॥ २७३ । ५३ ॥ शां० २०८ । २१ ॥ [भा० ३ । १३ ॥ वायु० ६ ॥ पद्म० ६ । २६४ ॥ लिङ्गपु० ९४ ॥]
तेनात्मपिण्डदानं । शां० ३५५ । १४ ॥
वराहकः । सर्पः । आ० ५७ । १८ ॥
वराहकर्णः । यक्षः । स० १० । १७ ॥
वराहतीर्थं । पुण्यतीर्थं । व० ८१ । १८ ॥ तस्य कोकामुखमिति नामान्तरं ।
वराहध्वजः । जयद्रथः । द्रो० १०५ । २० ॥
१ **वरुणः** । देवगन्धर्वः । आ० ६६ । ४२ ॥
२ **वरुणः** । द्वादशादित्येष्वन्यतमः । आ० ६६ । १५ ॥
३ **वरुणः** । पश्चिमदिगीश्वरः । स० ९ । १ ॥
तस्य भार्या ऋद्धिः । स० १० । ६ ॥
तस्यान्या भार्या वारुणी । तस्या गौरीति नामान्तरं । स० ९ । ६ ॥
तस्यान्या भार्या शुक्राचार्यपुत्री ज्येष्ठा देवी । तत्पुत्राः बलः मद्याभिमानिनी सुरा अधर्मश्च । आ० ६७ । ५२—५३ ॥
तस्यान्यः पुत्रः पुष्करः । उ० ९८ । १२ ॥
तस्यान्यः पुत्रो बन्दी । यो जनकराजसभायां कहोलादीन्ब्राह्मणान्वादे विजितवान् । व० १३६ । २४ ॥
तत्सभावर्णनं नारदेन युधिष्ठिरं प्रति । स० ९ ॥
तल्लोकवर्णनं । उ० ९८ । १०—२५ ॥
तस्यार्जुनसमीपे आगमनमस्त्रदानं च । व० ४१ । ५ ॥ २९ ॥

तेन उचथ्यभार्याया भद्राया अपहारः। **अनु० २५९। १३॥**
तस्य जलाधिपत्येऽभिषेकः। **शा० ४८। ११॥**
तेन सीताया निर्दुष्टत्वकथनं। **व० २९२। २९॥**
वर्गा। शापेन ग्राहत्वं प्राप्ताऽप्सराः। **आ० २३६। १५॥ स० १०। १३॥**
वर्चाः। सोमस्य पुत्रः। **आ० ६७। २२॥**
तस्य भूमावभिमन्युत्वेनावतारः। **आ० ६८। ११२॥**
वर्णः। ब्राह्मणक्षत्रियवैश्यशूद्रा इति चतुर्विधः। चातुर्वर्ण्यशब्दं पश्यत।
वर्धमानपुरं। प्रतिष्ठानपुरं। **आ० ९६। ६८॥**
वलः। विराटनगरे अज्ञातवासे सूदवेषधारिणो भीमसेनस्य नाम। **वि० ३। ८॥**
वल्लवाः। देशः। बल्लवशब्दं पश्यत।
वसातयः। बाह्लीकदेशसमीपस्थो देशः। **स० ७८। ५॥**
वसिष्ठः। (वशिष्ठः)। ब्रह्मणो मानसः पुत्रः। तद्भार्या अरुन्धती। तत्पुत्रः शक्तिः। **आ० १८९। १९॥ १९०। ५॥ स० ११। १९॥**
[तस्योत्पत्तिः। उर्वशीपुत्रत्वं मित्रावरुणपुत्रत्वं च। भा० ६। १८॥ ९। १३॥]
तस्य वरुणपुत्रत्वं। **आ० १०६। ५॥**
तन्नामनिर्वचनं। **आ० १९०। ६॥ अनु० १४२। २७॥**
तस्योपाख्यानं। **आ० १९०—१९८॥**
तदाश्रमदाहः कार्तवीर्यार्जुनेन। तेन तस्मै शापदानं च। **शां० ४८। ४०॥ ४२॥**
तस्य विश्वामित्रेण सह वैरं। **आ० १९१॥**
तेनेक्ष्वाकूणां पौरोहित्यकरणं। **आ० १९०। १२॥**
तस्य व्याघ्रयोन्यां पुत्रोत्पत्तिः। **अनु० ५३। ३०॥**
तस्य करालजनकेन संवादः। **शां० ३८–३१३॥**
तेनेन्द्रस्य रक्षणं। **अनु० २६०। २५॥**
तस्य परशुरामेण संवादः। **अनु० १३० । ३८॥**
तस्य सौदासेन कल्माषपादेन गोमहिमविषये संवादः। **अनु० ११३॥**
वसिष्ठपर्वतः। तत्रार्जुनस्य तीर्थयात्रार्थं गमनं। **आ० २३५। २॥**
वसिष्ठापवाहतीर्थं। शा० ४३। १॥
१ **वसुः।** जमदग्निपुत्रः। ऋषिः। **व० ११७। ११॥**
२ **वसुः।** उपरिचरवसुः। **आ० ६४। २॥**
३ **वसुः।** अष्टवसुशब्दं पश्यत।
वसुतेयाः। जनाः। **स० ७८। ९०॥**
वसुदा। (वसुधा। सुभा)। अङ्गिरसो भार्या। **व० २२१। १॥**
१ **वसुदानः।** क्षत्रियः। पाञ्चाल्यः। **स० ४। ३३॥** अतिरथः। **उ० १७१। २७॥** द्रोणेन हतः। **द्रो० २१। ५५॥**
२ **वसुदानः।** क्षत्रियः। काश्यः। **द्रो० १९१। २९॥ क० ३। ३७॥**
३ **वसुदानः।** क्षत्रियः। पांसुदेशाधिपः। **स० ७८। १०६॥**
वसुदेवः। श्रीकृष्णस्य पिता कुन्त्या भ्राता। शूरराजस्य यादवस्य पुत्रः। **स० २३। ३॥** [भा० १०। १॥]
[तेन यज्ञकरणं। भा० १०। ८४॥]
[तस्य भार्याः पुत्राश्च। भा० ९। २४॥ हरि० १। ३५॥]
[तस्य कथा। वायु० ९६॥ ब्रह्म० १४॥]
तस्य सपत्नीकस्य शरीरत्यागः। **मौ० ८। १५–२४॥**
१ **वसुमनाः।** क्षत्रियः। हर्यश्वस्य पुत्रः। अस्य वसुमानिति नामान्तरं। तन्माता ययातिपुत्री माधवी। **व० २०१। २॥ स० ८। १३॥ वि० ५३। १३॥ उ० ११६। २३॥**

तस्य ययातिना सह संवादः । **आ० ८७ । ५ ॥**
तस्य वामदेवेन संवादः । **शां० ९२—९४ ॥**

२ **वसुमनाः** । कौसल्यः क्षत्रियः । तस्मै बृहस्पतिना राजगुणवर्णनं । **शां० ६७ ॥**

१ **वसुमान्** । प्रथमवसुमनश्शब्दं पश्यत ।

२ **वसुमान्** । क्षत्रियः । **स० ४ । ३८ ॥ शां० ३१४ । २ ॥**

३ **वसुमान्** । अग्निविशेषः । **व० २२३ । २७ ॥**

वसुमित्रः । क्षत्रियः । **आ० ६८ । ४१ ॥**

वसुषेणः । कर्णः । **आ० ६८ । १४७ ॥ १२० । ३६ ॥ व० ३१० । १५ ॥** शेषं कर्णशब्दे पश्यत ।

वसुहोमः । अङ्गराजः । तस्य मान्धात्रा संवादः । **शां० १२२ । १ ॥**

वसोर्धारा । तीर्थं । **व० ८० । ७७ ॥** The place where Alakananda has got its source, about 4 miles north of Badarinath.

वस्त्रा । नदी । **भी० ९ । २५ ॥**

+ **वस्त्रापहारः** । द्रौपद्याः दुश्शासनेन । **स० ९० । ४० ॥** नलराजस्य पक्षिभिः । **व० ५८ । १५ ॥** उत्तरकुमारेण कौरवाणां । **वि० ६७ । २१ ॥**

वस्वौकसारा । नदी । **भी० ६ । ४९ ॥**

वह्नीनरः । क्षत्रियः । **स० ८ । १५ ॥**

वागिन्द्रः । प्रकाशनाम्न ऋषेः पुत्रः । तत्पुत्रः प्रमितिः । **अनु० ८ । ६४ ॥**

वाटधानाः । देशः । **भी० ९ । ४७ ॥**

वाणी । नदी । **भी० ९ । २० ॥**

वातघ्नः । विश्वामित्रस्य पुत्रः । ऋषिः । **अनु० ७ । ५४ ॥**

वातपतिः । क्षत्रियः । **आ० २०१ । २० ॥**

वातवेगः । गरुडस्य पुत्रः । **उ १०१ । १० ॥**

वातस्कन्धः । देवयोनिविशेषः । **स० ७ । १४ ॥**

वातापिः । असुरः । **आ० ६६ । २९ ॥** इल्वलस्य यवीयान्भ्राता । **व० ९४ । ४ ॥**
तेन मेषरूपग्रहणेनानेकेषां ब्राह्मणानां हननं । मेषमांसरूपेणागस्त्यकुक्षिं प्रविष्टस्य तस्य तेन जीर्णीकरणं च । **व० ९४ ॥ ९६ ॥ ९७ ॥** [**रा० ३ । ११ ॥**]

वात्स्यः । ऋषिः । सर्पसत्रे सदस्यः । **आ० ५३ । ९ ॥ शां० ४६ । ६ ॥**

वात्स्याः । गङ्गायमुनयोर्मध्ये कानपूरनगरस्य दक्षिणतः कौशाम्ब्या उत्तरतश्च विद्यमानो देशः । **द्रो० ११ । १५ ॥** A country situated to the west of Allahabad. It was the kingdom of Udayana; its capital was Kousambi.

वादुलिः । ऋषिः । विश्वामित्रस्य पुत्रः । **अनु० ७ । ५३ ॥**

वाध्र्यश्वः । क्षत्रियः । **स० ८ । १२ ॥**

वानप्रस्थः । तृतीय आश्रमः । तद्धर्माः । **आ० ८५ । ४ ॥ अश्व० ४६ । ९ ॥ शां० ९ ॥ १८९ ॥ २५० ॥ आश्र० २० ॥**

+ **वानरः** । शाखामृगः । तदुत्पत्तिः । **आ० ६७ । ६४ ॥**

वानरध्वजः । अर्जुनः । **द्रो० १०५ । ८ ॥**

+ **वानरसृगालसंवादः** । **अनु० ३० ॥**

१ **वामदेवः** । क्षत्रियः । मोदापुराधिपतिः । अर्जुनेन राजसूयदिग्विजये पराजितः । **स० २८ । ११ ॥**

२ **वामदेवः** । ऋषिः । **स० ७ । १७ ॥**
तस्य शिष्य आत्रेयः । **व० १९५ । ४६ ॥**
तेन संवर्धितयोरश्वयोः शलेनापहारः । **व० १९५ । ४६ ॥**
तस्य वसुमनसा संवादः । **शां० ९२—९४ ॥**

वामदेवी । ऋचस्य भार्या । **आ० ९३ । २४ ॥**

१ **वामनः** । सर्पः । **आ०** ३५ । ६ ॥ **उ०** १०३ । १० ॥

२ **वामनः** । दिग्गजः । उ० ९९ । ८ ॥ **भी०** १२ । ३३ ॥

३ **वामनः** । गरुडपुत्रः । **उ०** १०१ । १० ॥

४ **वामनः** । श्रीमतो नाराणस्यावतारः । **स०** ४७ । ८ ॥ **व०** २७३ । ६४ ॥ [भा० ८ । १३ ॥ १८ ॥ पद्म० ४ । १ ॥ ६ । २६७ ॥]

वामनकं । तीर्थं । **व०** ८१ । १०३ ॥

वामनकः । पर्वतः । **भी०** १२ । १८ ॥

वायुः । भूतवायुः तदभिमानिनी देवता च ।
तेन सीताया निर्दोषत्वकथनं । **व०** २९२ । २७ ॥
तद्गुणनिरूपणं । **शा०** २६१ । ६ ॥
तेन धर्मोपदेशः । **अनु०** १९१ ॥
तस्मात्कुन्त्यां भीमोत्पत्तिः । **आ०** ६८ । १११ ॥ १२९ । ५२ ॥
तस्य सर्वदेवोत्तमत्वं । **आ०** १२९ । ४६ ॥

वायुभक्षः । ऋषिः । **स०** ४ । १९ ॥

वायुवेगः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **आ०** २०१ । २ ॥

वारणावतं । हास्तिनपुरसमीपस्थं पत्तनं । तत्र पाण्डवानां गमनं । **आ०** १५५ ॥ १५८ ॥ पाण्डवप्रार्थिते ग्रामपञ्चकेऽन्यतमं । **उ०** ३१ । १९ ॥
Barnava, nineteen miles north-west of Mirat, where an attempt was made by Duryodhana to burn the Pandavas.
तत्र पाण्डवानां दिधक्षया दुर्योधनेन जतुगृहनिर्माणं । **आ०** १५६ । २२ ॥

वारवास्याः । देशः । **भी०** ९ । ४५ ॥

वाराणसी । काशीक्षेत्रं । **व०** ८२ । ७७ ॥

वाराहः । मगधदेशस्थः पर्वतः । **स०** २१ । २ ॥

वारिसेनः । क्षत्रियः । **स०** ८ । २० ॥

वारुणतीर्थं । **व०** ८१ । १६४ ॥

१ **वारुणिः** । विनतायाः पुत्रः । **आ०**.६६ । ४० ॥

२ **वारुणिः** । वरुणपुत्रोऽगस्त्यः । **व०** १०४।१॥

३ **वारुणिः** । वरुणपुत्रो वसिष्ठः । **आ०** १०६ । ९ ॥

वारुणी । वरुणभार्या । तस्या गौरीति नामान्तरं । **स०** ९ । ६ ॥

वार्क्षी । दशप्रचेतसां भार्या । **आ०** २११ । १५ ॥
अस्याः मारिषा इति नामान्तरं ।

वार्तः । क्षत्रियः । **स०** ८ । १० ॥

वार्धक्षेमिः । क्षत्रियः । वृद्धक्षेमपुत्रः । त्रैगर्तराजः सुशर्मा । **आ०** २०१ । ९ ॥ **द्रो०** २१ । ६० ॥

१ **वार्ष्णेयः** । श्रीकृष्णः । वृष्णिवंशोत्पन्नः सात्यक्यादिश्च ।

२ **वार्ष्णेयः** । नलस्य सारथिः । **व०** ५७ । २२ ॥

+ **वार्ष्णेयाध्यात्मं** । **शां०** २१२—२१९ ॥

वार्ष्णेयी । कुन्ती । **आ०** १२० । ३२ ॥

वालखिल्याः । ऋषयः । **स०** ११ । २० ॥
[तेषां पिता क्रतुर्नाम महर्षिः । तन्माता क्रिया । ते च षष्टिसहस्रसंख्याकाः । भा० ४ । १ ॥]
तेषामिन्द्रेणोपहासः । **आ०** ३१ । १० ॥
तैस्तपसा इन्द्रोपद्रवकरणेच्छया गरुडस्योत्पादनं । **आ०** ३१ । ३७ ॥
तत्कृतः पुष्करास्तेयशपथः । **अनु०** १४३ । ३९ ॥

वाली । सुग्रीवभ्राता इन्द्रपुत्रो वानरः । **स०** ९ । १८ ॥ तद्भार्या तारा । **व०** २८१ । १७ ॥
तत्पुत्रोऽङ्गदः ।
[तस्योत्पत्तिः । रामायणे उत्तरकाण्डे सप्तत्रिंशसर्गादुपरितने प्रक्षिप्तभागे प्रथमे सर्गे ।]
तस्य वधः श्रीरामेण । **व०** २८१ । ३८ ॥

१ **वाल्मीकिः** । रामायणग्रन्थकर्ता महर्षिः । **आ०** ५५ । १४ ॥ **स०** ७ । १६ ॥ तस्य ब्रह्महत्याप्राप्तिः । **अनु०** ४९ । ८ ॥

२ **वाल्मीकिः** । गरुडस्य पुत्रः । **उ०** १०१ । ११ ॥

वासवी । उपरिचरवसुवीर्यजा सत्यवती । **आ०** ६४ । ८६ ॥

वासवेयः । वासव्याः सत्यवत्याः पुत्रो व्यासः । **आ०** १ । ८४ ॥

वासुकिः । सर्पः । **आ०** ३५ । ५ ॥ ३७ । १ ॥ ३८ । १ ॥ ५४ । १ ॥ ६६ । ४१ ॥ **स०** ९ । १४ ॥ **उ०** १०९ । १९ ॥

तद्भार्या शतशीर्षा । **उ०** ११७ । १७ ॥

तस्य स्वसा जरत्कारुऋषेर्भार्या जरत्कारुः । **आ०** ३८ । २० ॥

तं रज्जुं कृत्वा अमृतार्थं समुद्रमथनं । **आ०** १८ । १३ ॥

तस्य भगिन्या सह संवादः । **आ०** ४८ ॥ ५३ । १९ ॥

वासुकितीर्थं । **व०** ८३ । ८६ ॥

वासुदेवः । श्रीकृष्णः । तन्नामनिर्वचनं । **उ०** ६९ । ३ ॥ **शां०** ३५० । ४१ ॥

तस्य व्यासेन सह संवादः । **अनु०** १५ ॥

तस्य पृथिव्या सह ब्राह्मणमहिमविषये संवादः । **अनु०** ६९ ॥ गृहस्थधर्मविषये संवादः । **अनु०** १५४ ॥

तन्माहात्म्यं । **भी०** ६९ ॥ शिष्टं श्रीकृष्णशब्दे द्रष्टव्यं ।

+ **वासुदेवतत्वं** । **शां०** २०९ ॥

१ **वाहिनी** । सो० वं० कुरुराजस्य पत्नी । तत्पुत्रा अश्ववत्प्रभृतयः । **आ०** १०१ । ३९ ॥

२ **वाहिनी** । नदी । **भी०** ९ । ३४ ॥

विंशः । क्षत्रियः । सू० वं० इक्ष्वाकुपुत्रः । तत्पुत्रो विविंशः । **अश्व०** ४ । ५ ॥

विकटः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ०** ६८ । ९६ ॥ २०१ । ३ ॥ **भी०** ६४ । २९ ॥ तस्य वधो भीमेन । **क०** ४६ । १६ ॥

विकटाननः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ०** १३१ । ५ ॥

विकर्णः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ०** ६३ । ५८ ॥ ६८ । ९४ ॥ १३१ । ४ ॥ २०१ । १ ॥ **वि०** ३७ । ३ ॥ **भी०** ७७ । ७ ॥ ७८ । २२ ॥

तस्य वचनं द्यूते द्रौपद्याः पणीकरणस्यान्याय्यतायां । **स०** ९० । ११ ॥

तस्य नकुलेन पराजयः । **द्रो०** १०७ । ३० ॥

सः भीमसेनेन हतः । **द्रो०** १३७ । ३० ॥

तच्छववर्णनं । **स्त्री०** १९ । १ ॥

विकुञ्जनः । (**विकुण्ठनः**) । सो० वं० हस्तिनामकस्य राज्ञः पुत्रः । तद्भार्या सुन्दरा । तत्पुत्रोऽजमीढः । **आ०** ६३ । ३८ ॥

विकृतः । विरूपेण सह विवदमानः क्रोधात्मा कश्चन पुरुषः । **शां०** १९७ । ९५ ॥

विचक्राश्वः । क्षत्रियः । **अनु०** १७७ । ७१ ॥

विचख्युः । क्षत्रियः । **शां०** २७१ । ३ ॥

विचित्रवीर्यः । सो० वं० शान्तनुराजपुत्रः । तन्माता सत्यवती । तस्य द्वे भार्ये काशिराजपुत्र्यौ । तयोरम्बिकायां व्यासाज्जातः पुत्रो धृतराष्ट्रः । अम्बालिकायां व्यासाज्जातः पुत्रः पाण्डुः । अम्बिकादास्यां व्यासाज्जातः पुत्रो विदुरः । **आ०** ६३ । ५४ ॥

तस्य वैमात्रेयो भ्राता गाङ्गेयो भीष्मः । **आ०** ६३ । ५१ ॥ १०८ । ६ ॥

तस्य विवाहः । **आ०** १११ । १ ॥

तस्य राज्याभिषेकः । **आ०** १०८ । १६ ॥

तस्य मरणं । **आ०** १११ । ७ ॥

विजयः । अर्जुनः । **वि०** ४३ । २१ ॥

विजया । माद्रीपुत्रस्य सहदेवस्य भार्या । शल्यराजस्य पुत्री । तत्पुत्रः सुहोत्रः । **आ०** ६३ । ७९ ॥

विडूरथः । (**विदूरथः**) । यादवः । **आ०** २३९ । १० ॥

वितण्डः । क्षत्रियः । **आ०** २०१ । १२ ॥

वितस्ता । नदी । व० ८० । ९० ॥ १३२ । २० ॥ भी० ९ । १६ ॥ The river Jhelum.

वितस्त्यः । ब्राह्मणः । सावैनसस्य पुत्रः । तत्पुत्रः शिवः । अनु० ८ । ६२ ॥

विदर्भाः । विन्ध्यस्य दक्षिणतः दशार्णदेशस्य पश्चिमतः गोदावर्या उत्तरतः सुराष्ट्रदेशस्य पूर्वतश्च विद्यमानो देशः । भी० ९ । ४३ ॥ Berar, the kingdom of Bhishmaka whose daughter Rukmini was married to Krishna. Its principal towns were Kundinanagara Bhojakatapura, Akola, Amraoti, Ellichpur, etc.

विदिशा । नदी । स० ९ । २२ ॥

विदुरः । विचित्रवीर्यभार्याया अम्बिकाया भुजिष्यायां व्यासाज्जातः पुत्रः । आ० ६३ । ५७ ॥

तस्योत्पत्तिः । आ० ६८ । ८६ ॥ ११५ । ४४ ॥ आश्र० ३० । १२ ॥

तस्य यमांशत्वं । आ० ६४ । १३८ ॥

तस्य पारसव्या विवाहः । पुत्रोत्पत्तिश्च । आ० १२६ । १–३ ॥

तस्य कुन्त्या संवादः । आ० १५४ । ३ ॥

तेन म्लेच्छभाषया पाण्डवान्प्रत्युपदेशः । आ० १५७ । १९–२५ ॥

तस्य धिक्कारो धृतराष्ट्रेण । व० ४ । २२ ॥

तस्य पाण्डवदिदृक्षया काम्यकवनगमनं । व० ५ । ५ ॥

तेन धृतराष्ट्राय नीतिकथनं । उ० ३४–४० ॥

तस्य गृहे श्रीकृष्णस्यागमनं तत्र भोजनं च । उ० ९१ । ३६–४६ ॥

तेन धर्मप्रशंसा । शां० १६५ । ५–९ ॥

तस्य धृतराष्ट्रेण सह तपोवनगमनं । आश्र० १७ । ४ ॥

तस्य स्वशरीरत्यागेन युधिष्ठिरशरीरप्रवेशः । आश्र० २८ । २५ ॥

[तस्य भारतयुद्धसमये तीर्थयात्रार्थे गमनं । भा० १ । १३ । ३१ ॥]

[तस्य प्रभासे देहत्यागः । भा० १ । १५ ॥]

+ **विदुरनीतिः** । उ० ३४–४० ॥

+ **विदुरागमराज्यलाभपर्व** । आ० २१७–२२२ ॥

विदुला । सौवीरराजस्त्री । तस्याः सञ्जयनाम्ना स्वपुत्रेण सह क्षत्रियेण युद्धस्यावश्यकर्तव्यत्वविषये संवादः । उ० १३३–१३६ ॥

विदूरथः । सो० वं० कुरुराजपुत्रः । तत्पुत्रोऽनश्वान् । आ० ६३ । ४२ ॥

विदेहाः । देशः । भी० ९ । ४५ ॥ Tirhoot. The kingdom of Raja Janaka. Videha was bounded by the river Kausaki on the east, Gandak on the west, Himalaya on the north and the Ganges on the South.

विद्या । ज्ञानं । उ० ४४ । २ ॥

तस्याः स्तुतिः । शां० १७४ । ३५ ॥ २८३ । ३६ ॥ अनु० १८४ । १९ ॥

तद्विहीनस्य निन्दा । उ० ३९ । ७७ ॥

तद्ग्रहणं नीचादपि कर्तव्यं । शां० १६३ । ३१ ॥

विद्याः । अष्टादश । स० ५ । ५ ॥ [चतुर्दश । विष्णु० ३ । ६ ॥]

+ **विद्यादानफलं** । अनु० २३५ । ७५–७७ ॥

विद्युज्जिह्वौ । अमृतरक्षिणौ सर्पौ । आ० ३३ । ५–६ ॥

विद्युता । अप्सराः । अनु० ५० । ४८ ॥

विद्युत्पर्णा । अप्सराः । आ० ६६ । ४९ ॥ १३२ । ४४ ॥

विद्युत्प्रभः । ऋषिः । अनु० १८८ । ४३ ॥

विद्युत्प्रभाः । तन्नाम्न्यो दशाप्सरसः । उ० १११ । २१ ॥

विद्युन्माली । तारकासुरपुत्रः । क० २४ । ७ ॥

विद्योता । अप्सराः । **अनु०** ५० । ४८ ॥

विधाता । ब्रह्मणः (भृगोः) पुत्रः । **आ०** ६७ । ५० ॥

[तद्भार्या मेरोर्दुहिता नियतिः । तत्पुत्रो वेदशिराः कविश्च । भा० ४ । १ ॥]

विधिः । दैवं । दिष्टं । तस्य प्राबल्यं । **व०** ३० ॥ **अनु०** २१४ । १-२१ ॥

विनता । दक्षप्रजापतिपुत्री कश्यपभार्या । तत्पुत्रौ गरुडारुणौ । **आ०** १६ । ६ ॥ ६६ । ४० ॥ ६७ । ३९ ॥

तस्याः कथा । **आ०** २०-३४ ॥ **अनु०** २० -२९ ॥

तस्या गर्भोत्पत्तिः । **आ०** ३१ । ३१ ॥

तस्यै तत्पुत्रेणारुणेन दासीत्वप्राप्तिशापदानं । **आ०** १६ । १९ ॥ **अनु०** २० । २० ॥

तस्या दासीभावः । **आ०** २३ । ३ ॥

+ **विनयः** । गुणः । तस्य श्रैष्ठ्यं । **शां०** ११३ ॥

विनशनतीर्थं । सरस्वतीनदी यत्रान्तर्हिता तत्तीर्थं । निषादराष्ट्रस्य द्वारे वर्तते । **व०** ८० । १११ ॥ ८२ । ११२ ॥ The spot in the great sandy desert in the District of Sirhind where the river Saraswati loses itself after taking a westerly course from Thaneswar.

१ **विन्दः** । आवन्त्यराजपुत्रः । तद्भ्राता अनुविन्दः । रथसत्तमः । **उ०** १६६ । ६ ॥ **स०** ३२ । ११ ॥ अर्जुनेन हतः । **द्रो०** ९९ । २७ ॥

२ **विन्दः** । केकयराजपुत्रः । कौरवपक्षीयः । तद्भ्राता अनुविन्दः । सात्यकिना हतः । **क०** १० । ६ ॥

३ **विन्दः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ०** ६८ । ९४ ॥ १३१ । ३ ॥ भीमसेनेन हतः । **द्रो०** १२७ । ४८ ॥

विन्ध्यः । कुलपर्वतः । **भी०** ९ । ११ ॥ The Vindhya Range.

तस्य सूर्यमार्गनिरोधार्थं वृद्धिः । **व०** १०२ । २३ ॥ [रा ३ । ११ ॥ देवीभा० १० । ३ ॥ स्कान्दपु० काशीखं० पूर्वार्धे० ४-५ ॥]

तस्य कथा । **व०** १०३ । २-१९ ॥

विन्ध्यचुलिकाः । देशः । **भी०** ९ । ६२ ॥

विपाटः । कौरवपक्षीयः क्षत्रियः । अर्जुनेन हतः । **द्रो०** ३२ । ६१ ॥

विपापः । अग्निविशेषः । **व०** २२१ । २१ ॥

विपापा । नदी । **भी०** ९ । १५ ॥

विपाशा । नदी । **स०** ९ । २३ ॥ **व०** १३२ । ८ ॥ **भी०** ९ । १५ ॥ The river Beas.

तस्यां पुत्रमरणनिर्विण्णेन वसिष्ठेनात्मप्राणपरित्यागाय स्वदेहं पाशैरवबध्य पतनं । ब्राह्मणवधभीतया तया नद्या तस्य पाशानाच्छिद्य तस्य तीरप्रापणं च । **आ०** १९३ । ४ ॥

१ **विपुलः** । देवशर्मशिष्यो ब्राह्मणः । तेन गुरुपत्न्या रुचिनाम्न्याः देवराजधर्षणाद्रक्षणं । **अनु०** ७५-७८ ॥

२ **विपुलः** । सौवीरदेशाधिपतिः क्षत्रियः । अर्जुनेन हतः । **आ०** १५१ । ४६ ॥

विपुला । नदी । **भी०** ९ । १४ ॥

विपृथुः । यादवः । **आ०** २०१ । १८ ॥ २२९ । १० ॥ **स०** ४ । ३६ ॥

तेन सहार्जुनस्य सुभद्राहरणकाले युद्धं । **आ०** २४४ ॥

+ **विप्रकन्योपाख्यानं** । **अनु०** २५३ ॥

विप्रचित्तिः । दनुपुत्रोऽसुरः । **आ०** ६६ । २२ ॥ **स०** ९ । १६ ॥ ५१ । ७ ॥

+ **विप्रसेनजित्संवादः** । **शां०** १७३ ॥

विभाण्डकः । कश्यपवंश्य ऋषिः । तत्पुत्रः ऋश्यशृङ्गः । **व०** १११ । ११ ॥

१ **विभावसुः** । सुप्रतीकस्य भ्राता ऋषिः । सः शापेन कच्छपतां प्राप्तो गरुडेन भक्षितः । **आ०** २९ । १६ ॥

२ **विभावसुः** । विवस्वत्पुत्रः । **आ०** १ । ५५ ॥
१ **विभीषणः** । यक्षः । **स०** १० । १८ ॥
२ **विभीषणः** । राक्षसः । विश्रवसः पुत्रः । रावणकुम्भकर्णयोर्भ्राता । तन्माता मालिनी । **स०** ५० । २५ ॥ **व०** २७६ । ८ ॥
तस्माद्राजसूयार्थं करं ग्रहीतुं सहदेवेन तं प्रति घटोत्कचप्रेषणं । **स०** ३२ । ८० ॥
तस्य पट्टाभिषेको रामेण । **व०** २८४ । ४९ ॥
विभुः । शकुनेर्भ्राता । भीमेन हतः । **द्रो०** १५८ । २३ ॥
विभूतिः । विश्वामित्रस्य पुत्रः । **अनु०** ७ । ५७ ॥
विमलतीर्थं । **व०** ८० । ८८ ॥
विमलपिण्डकः । सर्पः । **आ०** ३५ । ८ ॥
विमलोदका । सरस्वती नदी । **शा०** ३९ । ४ ॥
१ **विरजाः** । सर्पः । **आ०** ३५ । १४ ॥ **उ०** १०३ । १६ ॥
२ **विरजाः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ०** १३१ । १४ ॥ भीमसेनेन हतः । **द्रो०** १५८ । १७—१९ ॥
विरजातीर्थं । **व०** ८३ । ६ ॥
१ **विराजः** । क्षत्रियः । अविक्षितः पुत्रः । **आ०** १०१ । ४० ॥
२ **विराजः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । भीमेन हतः । **भी०** ९६ । २७ ॥
विराटः । मत्स्यदेशाधिपः क्षत्रियः । मरुद्गणांशः । **आ०** ६८ । ८२ ॥ २०१ । ८ ॥ महारथः । **उ०** १७० । ८ ॥
तस्य प्रथमा भार्या सुरथा । तत्पुत्रौ श्वेतः शङ्खश्च । **वि०** २१ । १७ ॥
तस्य द्वितीया भार्या केकयनाम्नः सूतराजस्य पुत्री सुदेष्णा । तत्पुत्रः भूमिञ्जयापरनामा उत्तरकुमारः । **वि०** २१ । १८ ॥
तस्यान्यः पुत्रो बभ्रुः । **उ०** ५७ । ३३ ॥
तत्पुत्री अभिमन्योर्भार्या उत्तरा । **आ०** ६३ । ८२ ॥
तस्य भ्रातर एकादश । शतानीकः मदिराक्षः (मदिराश्वः) सूर्यदत्तः श्रुतानीकः श्रुतध्वजः बलानीकः जयानीकः जयाश्वः रथवाहनः चन्द्रोदयः समरथः । **वि०** ३३ । १९—२१ ॥ **द्रो०** १५९ । ४० ॥
तस्य दक्षिणगोग्रहणे सुशर्मणा सह युद्धं । **वि०** ३४ । ३१ ॥
तस्य जीवग्राहग्रहणं सुशर्मणा । युधिष्ठिराज्ञया भीमसेनेन मोचनं च । **वि०** ३५ ॥
तेन बृहन्नलायाः कौरवजयवार्तामभर्षयता कङ्कनाम्नो युधिष्ठिरस्य नासायामक्षेण कुट्टनं । **वि०** ७० । ३७ ॥
तस्य वधो द्रोणाचार्येण । **द्रो०** १८७ । ४२ ॥
विराटदेशः । मत्स्यदेशशब्दं पश्यत । The capital of Virata Raja king of Matsya Desa. One hundred and five miles to the south west of Delhi and forty-one miles to the north of Jaipur.
विराधः । राक्षसः । रामेण हतः । **स०** ५० । १४ ॥
विरावी । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **आ०** ६८ । १०४ ॥ १३१ । १३ ॥
१ **विरूपः** । अङ्गिरसः पुत्रः । ऋषिः । **अनु०** १३२ । ४२ ॥
२ **विरूपः** । विकृतेन विवदमानः कामाभिमानी पुरुषः । **शां०** १९७ । ९४ ॥
३ **विरूपः** । असुरः । **स०** ९ । १८ ॥
१ **विरूपाक्षः** । दनुपुत्रः । **आ०** ६६ । २५ ॥
२ **विरूपाक्षः** । घटोत्कचस्य सारथिः । **द्रो०** १७६ । १८ ॥
३ **विरूपाक्षः** । राक्षसः । **व०** २८६ । ९ ॥ **शां०** १६९ । १५ ॥
१ **विरोचनः** । प्रह्लादस्य पुत्रः । **आ०** ६६ । १९ ॥ **स०** ५१ । ७ ॥

तस्य सुधन्वनाम्ना ब्राह्मणेन सह केशिन्याः स्वयंवरे ब्राह्मणक्षत्रिययोः श्रैष्ठ्ये विवादः । स० ९० । ६७ ॥ उ० ३५ । ५—११ ।
तत्पुत्रो महाबलिः । आ० ६६ । २० ॥
२ **विरोचनः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० २०१ । २ ॥
विरोहणः । सर्पः । आ० ५७ । ९ ॥
विवर्धनः । क्षत्रियः । स० ४ । २७ ॥
विवस्वान् । अदितेः पुत्रः । द्वादशादित्येष्वन्यतमः। आ० ६६ । १५ ॥ सूर्यशब्दं पश्यत ।
विवाजी । इल्वलासुरस्य रथहयः । व० ९७ । २२ ॥
+ **विवाहः** । तत्प्रभेदाः । आ० ९४ । १४ ॥ अनु० ७९ । १—१५ ॥ [विष्णु० ३ । १० ॥]
तदुचितवयोनिर्णयः । अनु० ७९ । १६ ॥
विवित्सुः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः। आ० ६८ । ९६ ॥ ११३ । ५ ॥ भीमसेनेन हतः । क० ४६ । १२ ॥
विविन्ध्यः । साल्वपक्षीयोऽसुरः । चारुदेष्णेन हतः । व० १६ । २६ ॥
विविंशः । क्षत्रियः । सू० वं विंशस्य पुत्रः । तत्पुत्रः खनीनेत्रः । अश्व० ४ । ५ ॥
विविंशतिः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । आ० ६८ । ९४ ॥ ११३ । ४ ॥ २०१ । १ ॥ वि० ३७ । ३ ॥ भीमसेनेन हतः । क० २ । ९ ॥
तच्छववर्णनं । स्त्री० १९ । १४ ॥
विशल्या । नदी । व० ८२ । ११४ ॥ स० ९ । २४ ॥
विशाखः । सुब्रह्मण्यः । स० ७ । १४ ॥
विशाखयूपः । क्षेत्रं । व० १७९ । १६ ॥ शां० १२ । ३ ॥
विशालकः । यक्षः । स० १० । १७ ॥
विशालराजः । क्षत्रियः । स० ६८ । २१ ॥
विशाला । नदी । शा० ३९ । ४ ॥
१ **विशालाक्षः** । गरुडस्य पुत्रः । उ० १०१ । ९ ॥
२ **विशालाक्षः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । आ० ६८ । १०१ ॥ ११३०१ । १० ॥ भीमसेनेन हतः । भी० ८८ । २६ ॥
विशुण्डिः । सर्पः । उ० १०३ । १६ ॥
विशोकः । भीमसेनस्य सारथिः । स० ३६ । ३० ॥ भी० ७७ । २४ ॥ [श्रीकृष्णात्त्रिवक्रायां जातः । भागवते विजयध्वजीयपाठे—१० । १०३ ॥] अस्याशोक इति नामान्तरं ।
तस्य भीमसेनेन सह रणाङ्गणे संवादः । क० ८० ॥
विश्रवाः । रावणादीनां पिता ऋषिः । पुलस्त्यस्य रूपान्तरं । व० २७५ । १४ ॥ २७६ । १ ॥ [तस्योत्पत्तिः । रा० ७ । २ ॥] [तस्य सकाशादिडबिलायां कुबेरोत्पत्तिः । भा० ९ । २ ॥]
१ **विश्वः** । श्रीमान्नारायणः । तस्य स्तुतिर्ब्रह्मकृता । भी० ६५-६६ ॥
२ **विश्वः** । क्षत्रियः । आ० ६८ । ३६ ॥
विश्वकर्मा । प्रभासस्य पुत्रः । आ० ६७ । २८ ॥ [अस्य त्वष्टेति नामान्तरं । अस्य भार्या प्रह्लादपुत्री विरोचना । तत्पुत्रो देवाचार्यस्त्रिशिराः विश्वरूपाचार्यः । वायु० ८४ ॥]
[तन्माता बृहस्पतिभगिनी ब्रह्मवादिनी । हरि० १ । ३ ॥ विष्णु० १ । १५ ॥]
तत्पुत्री सवितुर्भार्या संज्ञा । अश्विनोर्माता । आ० ६७ । ३५ ॥
तेनेन्द्रप्रस्थनिर्माणं । आ० २२७ । ५९ ॥
तेन सुन्दोपसुन्दवधार्थं तिलोत्तमासृष्टिः । आ० २११ । १२ ॥
तेन त्रिपुरवधार्थं रुद्राय रथनिर्माणं । क० २६ ॥
विश्वजित् । बृहस्पतेस्तृतीयः पुत्रः । अग्निविशेषः । व० २२१ । २४ ॥

विश्वपतिः । अग्निविशेषः । **व० १२३ । १७ ॥**
विश्वभुक् । बृहस्पतेश्चतुर्थः पुत्रः । अग्निविशेषः । अस्य गोपतिरिति नामान्तरं । **व० २२१ । २५ ॥**
१ विश्वरूपः । असुरः । **स० ९ । १८ ॥**
२ विश्वरूपः । त्वष्टुः पुत्रः । **उ० ९ । ४ ॥ शां० २०७ । २० ॥**
[तन्माता दैत्यानुजा (विरोचनानुजा) रचना । भा० ६ । ६ ॥ प्रह्लादपुत्री विरोचना । वायु० ८४ ॥]
[तेन देवानां पौरोहित्यकरणं । भा० ६ । ७ ॥]
तस्येन्द्रेण वधः । **उ० ९ । २२ ॥** [भा० ६ । ९ ॥]
+ विश्वरूपप्रदर्शनं । श्रीकृष्णेन धृतराष्ट्रसभायां । **उ० १३१ ॥** समराङ्गणे अर्जुनाय । **भी० ३५ ॥** उदङ्काय । **अश्व० ५५ ॥** हनुमता भीमाय । **व० १५२ ॥**
विश्वरूपा । कामधेनुदुहिता । **उ० १०२ । ९॥**
विश्वा । धर्मप्रजापतेर्भार्या । दक्षप्रजापतिकन्या । **आ० ६६ । १२ ॥** [तत्पुत्रा विश्वेदेवाः । मत्स्य० २०३ ॥]
विश्वाची । अप्सराः । **स० १० । १२ ॥**
तया सह ययाते रमणं । **आ० ७९ । ९ ॥**
विश्वामित्रः । ब्रह्मर्षिः । सो० वं० गाधेः पुत्रः । पूर्वं क्षत्रियः पश्चात्तपसा ब्राह्मण्यं प्राप्तः । **आ० १९१ । ४ ॥ स० १२ । ११ ॥ उ० ११३ । २५ ॥ शां० ४८ । ५७ ॥**
तस्योत्पत्तिः । **आ० १९१ । ४ ॥ अनु० ७ । ४७ ॥ ९१ । २१ ॥** [हरि० १ । २७ ॥ वायु० ९१ ॥ भा० ९ । १६ ॥]
तन्नामनिर्वचनं । **अनु० १४२ । ३५ ॥**
[तस्य क्षत्रियत्वावस्थायां नाम विश्वरथ इति । हरि० १ । २७ ॥ ३२ ॥ वायु० ९१ ॥]
तस्य भार्या हैमवती । **उ० ११७ । १३ ॥**
[तस्य भार्याः शालावती दृषद्वती रेणुः माधवी इत्याद्याः । हरि० १ । २७ ॥ ३२ ॥ वायु० ९१ ॥]
तस्य पुत्राः । मधुच्छन्दआदयः । **अनु० ७ । ५० ॥** [भा० ९ । १६ ॥ रा० १ । ५७ ॥]
[तस्य पुत्राः । कतिः पाणिनः याज्ञवल्क्यः साङ्कृतिः गालवः मुद्गलः देवलः अष्टकः देवरातापरनामा शुनश्शेप इत्यादयः । तत्र शुनश्शेपोऽभिमानपुत्रः । हरि० १ । २७ ॥ ३२ ॥]
तेन ब्राह्मण्यार्थं तपश्चरणं । **आ० ९२ । ३२ ॥ १०१ । ६० ॥** [रा० १ । ५६ ॥]
तस्य क्षत्रियत्वावस्थायां वसिष्ठाश्रमगमनं । **आ० १९१ । ६ ॥** [रा० १ । ५१ ॥]
[तस्य तपश्चरणकाले तद्दाराणां त्रिशङ्कुराजेन रक्षणं । हरि० १ । १२ ॥]
तस्य तपश्चरणकाले मेनकायां शकुन्तलोत्पत्तिः । **आ० ९३ ॥**
[तच्चरित्रं । रा० १ । ५१–६५ ॥ हरि० १ । २७ ॥ भा० ९ । १६ ॥ स्कान्दपु० नागरखं० १६७–१६८ ॥]
तेन सरस्वतीनद्या रुधिरीभवनशापदानं । **श० ४३ । ३९ ॥**
तस्य ब्राह्मण्यप्राप्तिः । **आ० १९१ । ६० ॥ श० ४१ । ११ ॥**
तेन गालवं प्रति गुरुदक्षिणार्थं एकतश्श्यामकर्णानां हयानां शताष्टकस्यानयनचोदना । **उ० ११४ । १४ ॥**
तेन ययातिपुत्र्या माधव्या एकतश्श्यामकर्णहयानां शतद्वयप्रतिनिधितया परिग्रहः । तस्यामष्टकनामकपुत्रोत्पादनं च । **उ० ११९ । १५–१८ ॥**
तेन धर्मविशेषकथनं । **अनु० १९० ॥**
तस्य हरिश्चन्द्रेण सह वैरं । **व० ७७ । ३७ ॥** [देवीभा० ७ । १८ ॥]
तेन श्वजाघनीचौर्यं । श्वपचेन संवादश्च । **शां० १४१ ॥**

तत्कृतः पुष्करास्तेयशपथः । अनु० १४३ । ३३ ॥

तस्य वंशः । अनु० ७ । ४८ ॥ [हरि० ११२७ ॥ रा० १ । ३२ ॥ ५१ ॥ वायु० ९१ ॥]

विश्वामित्रतीर्थं । व० ८१ । १३९ ॥

विश्वामित्रा । नदी । भी० ९ । २६ ॥

१ **विश्वावसुः** । प्राधापुत्रो देवगन्धर्वः । आ० ६६ । ४७ ॥ स० ७ । २२ ॥

तस्य ब्राह्मणशापेन कबन्धनामकराक्षसजन्मप्राप्तिः । व० २८० । ४२ ॥

तस्य याज्ञवल्क्येन सह संवादः । शां० ३२३ । २६ ॥

२ **विश्वावसुः** । जमदग्निपुत्रः । व० ११७ । ११ ॥

+ **विश्वासानर्हाः** । उ० ३७ । ५७ ॥ शां० १३९ । २५—३३ ॥ तेषु विश्वासकरणे दोषः । आ० १५३ । ७२ ॥

विश्वेदेवाः । आ० १ । ४७ ॥ १३२ । ५३ ॥ अनु० १३८ । २९—३७ ॥ २५५ । २१ ॥

[ते च धर्मप्रजापतेर्विश्वानाम्न्यां दक्षपुत्र्यां जाताः । क्रतुदक्षपुरूरवोमार्द्रवसत्यवसुकालकामादयः । मत्स्य० २०३ ॥]

+ **विश्वोपाख्यानं** । भी० ६५—६६ ॥

+ **विषपानं** । रुद्रेण । आ० १८ । २५ ॥ [भा० ८ । ७ ॥ रा० १ । ४५ ॥]

+ **विषहरविद्यादानं** । ब्रह्मणा कश्यपाय । आ० २० । १६ ॥

विषुवं । पुण्यकालः । अश्व० ११५ । २ ॥

+ **विषोत्पत्तिः** । अमृतमथनसमये । आ० १८ । १९ ॥ [भा० ८ । ७ ॥ रा० १ । ४५ ॥]

१ **विष्णुः** । अग्निविशेषः । अस्य धृतिमानिति नामान्तरं । व० २२३ । १२ ॥

२ **विष्णुः** । क्षत्रियः । कश्चन चैद्यः । कर्णेन हतः । क० ५१ । ४९ ॥

३ **विष्णुः** । द्वादशादित्येष्वन्यतमः श्रीमान्नारायणः । आ० ६६ । १६ ॥

तेन रुद्रमाहात्म्यकथनं । अनु० ४९ । ७१ ॥

तेन देवान्प्रति वृत्रासुरहनने युक्तिकथनं । उ० १० । १० ॥

तन्नामनिर्वचनं । उ० ६९ । १३ ॥ शां० ३५० । ४३ ॥

तेन भूम्युद्धरणं वराहरूपेण । व० १४४ । ३० ॥

तत्प्रीतिकरा धर्माः । अनु० १८९ । १—७ ॥

विष्णुधर्मा । गरुडस्य पुत्रः । उ० १०१ । १३ ॥

विष्णुपञ्चकं । व्रतविशेषः । अश्व० ११४ । १४ ॥

+ **विष्णुपदतीर्थं** । व० ८१ । १०३ ॥

विष्णुवर्मा । चैद्यः क्षत्रियः । कर्णेन हतः । क० ५१ । ४९ ॥

विष्वक्सेनः । विष्णुपार्षदः । स० ७ । १९ ॥

विष्वगश्वः । सू० वं० इक्ष्वाकुवंश्यस्य पृथुराजस्य पुत्रः । तत्पुत्र आर्द्रकः । व० २०५ । ३ ॥ अनु० १७७ । ६७ ॥

विहङ्गः । सर्पः । आ० ५७ । ११ ॥

+ **वीटाक्रीडा** । कन्दुकक्रीडा । कौरवपाण्डवानां । आ० १४१ । १७ ॥

वीतहव्यः । क्षत्रियः । सू० वं० शर्यातिपुत्रः । तद्भ्राता तालजङ्घः । तस्य भार्या दश । पुत्राः शतं । तपसा ब्राह्मण्यं प्राप्तः । अनु० ८ ॥

तस्य ब्राह्मण्यप्राप्त्यनन्तरं जातः पुत्रो गृत्समदः । अनु० ८ । ५९ ॥

वीतिः । अग्निविशेषः । व० २२३ । २५ ॥

वीरः । भरद्वाजनामकाग्नेर्द्वितीयः पुत्रोऽग्निविशेषः । तस्यैवाग्नीषोमाविति सोमेन सह प्रयोगः । तस्य रथप्रभुः रथध्वानः कुम्भरेता इति नामान्तराणि । व० २२२ । १३—१८ ॥

वीरकरा । नदी । **भी० ९ । २६** ॥

वीरकेतुः । क्षत्रियः । पाञ्चाल्यः । द्रोणेन हतः । **द्रो० १२२ । ४१** ॥

वीरणकः । सर्पः । **आ० ५७ । १८** ॥

वीरद्युम्नः । राजर्षिः । भूरिद्युम्नस्य पिता । तस्य तनुनामकेन विप्रेण संवादः । **शां० १२७ । १४** ॥

वीरधन्वा । क्षत्रियः । दुर्योधनपक्षीयः । त्रैगर्तः । धृष्टकेतुना हतः । **द्रो० १०७ । १४–१७** ॥

वीरधर्मा । क्षत्रियः । पाण्डवपक्षीयः । **उ० ४ । १६** ॥

वीरप्रमोक्षतीर्थं । **व० ८२ । ५१** ॥

१ **वीरबाहुः** । क्षत्रियः । चेदिराजः । सुबाहोः पिता । तस्य गृहे दमयन्त्या वासः । **व० ६६ । १५** ॥

२ **वीरबाहुः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ० ६८ । १०३ ॥ १३१ । १२** ॥ भीमेन हतः । **भी० ६४ । ३५** ॥

वीरभद्रः । रुद्रावतारः । तेन दक्षाध्वरध्वंसः । **शां० २९० । ४९–५३** ॥

[तस्योत्पत्तिः । भा० ४ । ५ ॥ वायु० ३० ॥ कालिकापु० १६ ॥]

वीरसेनः । क्षत्रियः । **अनु० १७७ । ७२** ॥

१ **वीरा** । भरद्वाजनामकाग्नेर्भार्या । **व० २२१ । १७** ॥

२ **वीरा** । नदी । **भी० ९ । २२** ॥

वीरिणी । दक्षप्रजापतिभार्या । ब्रह्मणो वामपादाङ्गुष्ठादुत्पन्ना । **आ० ६७ । ११ ॥ ६९ । ९** ॥ [वीरणप्रजापतेर्दुहिता । तस्या असिक्नीत्यादि नामान्तराणि । तस्यां षष्टिकन्योत्पत्तिः । विष्णु० १ । १५ ॥]

[तस्यां सतीदेव्या उत्पत्तिः । कालिका० ८ ॥]

१ **वृकः** । क्षत्रियः । पाञ्चाल्यः । द्रोणेन हतः । **द्रो० २१ । १६** ॥

२ **वृकः** । क्षत्रियः । **आ० २०१ । १० ॥ क० ८९ । ९** ॥

३ **वृकः** । पूर्वकालीनः क्षत्रियः । **अनु० १७७ । ७०** ॥

वृकरथः । कर्णस्य भ्राता । भीमसेनेन हतः । **द्रो० १५८ । २१** ॥

वृकस्थलं । पाण्डवप्रार्थितेषु पञ्चसु ग्रामेष्वन्यतमः । **उ० ३१ । १९ ॥ ८६ । १** ॥

वृकोदरः । भीमसेनः । **आ० १४७ । १०** ॥

+ **वृक्षः** । महीरुहः । पादपः । तस्योत्पत्तिः । **आ० ६७ । ६९** ॥

+ तदारोपणफलं । **अनु० ९३ । २२** ॥

वृक्षवासी । यक्षः । **स० १० । १९** ॥

वृत्तः । सर्पः । **आ० ३५ । १०** ॥

१ **वृत्रः** । दनायुषः पुत्रोऽसुरः । **आ० ६६ । ३३** ॥

२ **वृत्रः** । त्वष्टृप्रजापतिना इन्द्रशत्रुत्वेनाग्नेरुत्पादितः पुत्रः । **उ० ९ । ५५** ॥ [भा० ६ । ९ ॥]

तस्येन्द्रेण सह युद्धं । **व० ९९ ॥ शां० २८७ । ७ ॥ अश्व० ११ । ६** ॥

तस्येन्द्रेण वधः । **व० १०० । १५ ॥ उ० १० । ४१ ॥ शां० २८८ । ८–९** ॥ [भा० ६ । १२ ॥ रा० ७ । ८५ ॥ पद्म० २ । २४ ॥ ५ । १९ ॥ देवीभा० ६ । १–६ ॥ स्कान्दपु० केदारखं० १६–१७ ॥]

[तस्य पूर्वजन्मनि चित्रकेतुरिति नाम । तस्य कथा । भा० ६ । १४–१७ ॥]

तस्मै सनत्कुमारेण विष्णुमाहात्म्यकथनं । **शां० २८६** ॥

+ **वृत्रगीता** । **शां० २८५** ॥

वृद्धकन्या । कुणिगार्ग्यस्य ऋषेः पुत्री । गालवऋषिपुत्रस्य शृङ्गवतो भार्या । तस्याः कथा । **श० ५३** ॥

वृद्धक्षत्रः । क्षत्रियः । सिन्धुदेशाधिपः जयद्रथस्य

पिता। सायं सन्ध्यामनुतिष्ठतस्तस्य हस्ते पतितस्य अर्जुनबाणनिकृत्तस्य जयद्रथशिरसस्तेनाधः प्रक्षेपणात्तन्मूर्ध्नो विदारणं। **द्रो० १४८॥**

वृद्धगार्ग्यः। ब्रह्मर्षिः। **अनु० १८८। ७२॥**

वृषकः। गान्धारराजस्य सुबलस्य पुत्रः। शकुन्यादीनां भ्राता। **आ० २०१। ५॥** एकरथः। **उ० १६८। १॥**

तस्य इरावता सह युद्धं। **भी० ९०। ३०॥**

तस्य वधोऽर्जुनेन। **द्रो० ३०। १२॥ क० २। ४३॥**

१ वृषदर्भः। सेदुकभ्राता क्षत्रियः। **व० १९९। २॥**

२ वृषदर्भः। काशीशः कश्चित्क्षत्रियः। यः श्येनाद्भीतस्य कपोतस्य रक्षणार्थं स्वमांसमुत्कृत्य ददौ। **अनु० ६७। ४॥** [अयं सो० वं० अनुकुलोत्पन्नस्योशीनरराजपुत्रस्य शिबेः पुत्रः। भा० ९। २३॥ वृषादर्भः वृषादर्भिश्चायमेवेति भाति॥]

तत्पुत्रोऽनिलः। यं मृतं पक्त्वा सप्तर्षयो भोक्तुमयतन्त। **अनु० १४१। ८॥**

तेन सप्तर्षिहननाय कृत्योत्पादनं। **अनु० १४१। ४४॥**

१ वृषपर्वा। दनुपुत्रोऽसुरः। **आ० ६६। २४॥**

तत्पुत्री ययातिभार्या शर्मिष्ठा। **आ० ७२। ६॥** [मत्स्य० २९॥ भा० ९। १८॥]

तं प्रति शुक्राचार्यस्य कोपः। **आ० ७४। १॥**

२ वृषपर्वा। नरनारायणाश्रमस्थः कश्चन राजर्षिः। **व० १५९। २०॥ १७९। ७॥**

वृषभः। पर्वतः। ऋषभशब्दं पश्यत।

वृषभदानफलं। **अश्व० १०३। ५॥**

वृषभा। नदी। **भी० ९। ३२॥**

वृषसाह्वया। नदी। **भी० ९। ३५॥**

वृषसेनः। कर्णस्य पुत्रः। महारथः। **उ० १६७। २३॥** तस्य युद्धं। **क० ८८। ३६॥**

तत्पराजयोऽभिमन्युना। **द्रो० ३७। २५-३८॥**

तद्वधप्रतिज्ञाऽर्जुनेन। **द्रो० १४३। २१॥**

तस्य वधोऽर्जुनेन। **क० ९०। १४॥**

वृषाकपिः। भगवान्नारायणः। तन्नामनिर्वचनं। **शां० ३५२। २४॥**

वृषादर्भिः। वृषदर्भशब्दं पश्यत।

१ वेगवान्। सर्पः। **आ० ५७। १७॥**

२ वेगवान्। दनुपुत्रोऽसुरः। **आ० ६६। २४॥** साल्वपक्षं प्रविष्टस्य तस्य श्रीकृष्णपुत्रेण जाम्बवतेयेन साम्बेन वधः। **व० १६। २०॥**

वेगवाहिनी। नदी। **स० ९। २२॥**

वेणा। नदी। **व० ८३। ३३॥ ८६। ३॥ भी० ९। २०॥**

१ वेणी। कृष्णवेणीनदी।

२ वेणी। सर्पः। **आ० ५७। १३॥**

वेणीस्कन्धः। सर्पः। **आ० ५७। १३॥**

वेणुजङ्घः। ऋषिः। **स० ४। २४॥**

वेणुदारिः। कश्चन यादवः। **स० ६१। १६॥** तत्पुत्रस्य पराजयः कर्णेन। **व० २५५। १५॥** [सोश्मकदेशाधिपतिः। हरि० २। ६१॥]

वेणुमण्डलं। क्रौञ्चद्वीपस्थं वर्षं। **भी० १२। १२॥**

वेतसिका। तीर्थं। **व० ८२। ५६॥**

वेत्रकीयगृहं। एकचक्रानगरस्थः स्थलविशेषः। **आ० १७८। २५॥**

वेत्रवती। नदी। विदिशानद्याः समीपे पारियात्रादुत्पन्ना। सा वात्स्यदेशे यमुनायां मिलति। **भी० ९। १६॥** Vetravati is a river called Betwa in the kingdom of Bhopal in Malwa.

१ वेदः। बेदशब्दं पश्यत।

२ वेदः। अपौरुषेयो ग्रन्थविशेषः। ऋग्यजुस्सामाथर्वाद्यात्मकः। तद्विभागो व्यासेन। **आ० ६०। ५॥** [भा० १२। ६॥ वायु० ६०॥ विष्णु० ३। ३॥]

तदपहारो मधुकैटभाभ्यां । **शां० ३५७ । २९ ॥**
तेषां परस्परं संवादः । **अनु० १३ ॥**
वेदव्यासः । व्यासशब्दं पश्यत ।
वेदस्मृता । नदी । **भी० ९ । १७ ॥**
वेदाश्वा । नदी । **भी० ९ । २८ ॥**
वेदीतीर्थं । **व० ८१ । ९९ ॥**
वेनः । अङ्गराजस्य पुत्रः । तन्माता सुनीथा । तत्पुत्रः पृथुचक्रवर्ती । तस्य कथा । **द्रो० ६९॥ शां० २८ । १३७ ॥ ५८ । १०२ ॥** [हरि० १ । २ ॥ विष्णु० १ । २३ ॥ भा० ४ । १३ ॥]
+ **वेश्याः** । वारस्त्रियः । ताभिः ऋश्यशृङ्गसमीपगमनं । **व० १११ । ३१ ॥**
वैकर्तनः । कर्णः । **आ० १२० । ५३ ॥**
वैकुण्ठः । भगवान्नारायणः । तन्नामनिर्वचनं । **शां० ३५२ । १५ ॥**
[**वैकुण्ठलोकवर्णनं** । भा० ३ । १५ ॥]
वैजयन्तः । क्षीरसमुद्रमध्यस्थः चतुर्मुखब्रह्मण आवासभूतः पर्वतः । **शां० ३६० । ९ ॥**
वैतरणी । नदी । **स० ९ । २४ ॥ व० ८१ । ८४ ॥ ८३ । ६ ॥ उ० १०९ । १४ ॥ भी० ९ । ३४ ॥** Betrani is a river near Cuttack in the Province of Orissa.
वैदर्भी । सगरराजस्य पत्नी केशिनी । तत्पुत्राः षष्टिसहस्राणि । **व० १०५ । १० ॥**
अयं शब्दः लोपामुद्रा–रुक्मिणी–दमयन्ती–प्रभृतीनां साधारणः ।
वैदूर्यशिखरः । पर्वतः । **व० ८७ । ६ ॥**
वैदेहाः । देशः । **भी० ९ । ५७ ॥**
वैन्यः । पृथुचक्रवर्ती । **स० ८ । २० ॥** तस्याश्वमेधः । **व० १८८ । ५ ॥** शेषं पृथुशब्दे पश्यत ।
वैयाघ्रपद्यः । युधिष्ठिरः । **वि० ३६ । ११ ॥**
+ **वैराग्यं** । गुणः । तस्य मुक्तिसाधनत्वं । **शां० १८७ । १७ ॥**
+ तस्य ज्ञानकारणत्वं । **अनु० २४४ ॥**
वैराटी । उत्तरा । **आ० १ । २३९ ॥**
वैवस्वतः । विवस्वन्नामकसूर्यस्य पुत्रः । श्राद्धदेवनामा मनुः । तन्माता त्वष्टृप्रजापतिपुत्री संज्ञादेवी । तस्य चरित्रं मत्स्योपाख्यानसहितं । **व० १९० । ५३ ॥**
[तस्योत्पत्तिः । भा० ८ । १३ ॥]
तस्य वंशः । **आ० ६९ । १६ ॥** [भा० ९ । १–१३ ॥ हरि० १ । १० ॥ ब्रह्म० ७ ॥ वायु० ८५–८९ ॥]
+ **वैवाहिकपर्व** । **आ० २०८–२१६ ॥ वि० ७४–७८ ॥**
१ **वैशंपायनः** । वैवस्वतमन्वन्तरीयाष्टाविंशमहायुगीयद्वैपायनव्यासशिष्यः । **शां० ३३५ । २७ ॥**
२ [**वैशंपायनः** । महर्षिः । वैवस्वतमन्वन्तरीयप्रथममहायुगीयस्वयंभूनामकव्यासशिष्यः । याज्ञवल्क्यस्य मातुलो गुरुश्च । भा० १२ । ६ ॥]
तेन जनमेजयाय महाभारतकथनं । **आ० १२५ ॥ ६० । २१ ॥**
तेन ब्राह्मणवधो बालवधश्च । **अनु० ९ । ३९ ॥**
वैश्यः । तृतीयो वर्णः । तद्धर्माः । **शां० १८७ । ६ ॥**
वैश्यापुत्रः । धृतराष्ट्रपुत्रो युयुत्सुः ।
वैश्रवणः । कुबेरशब्दं पश्यत ।
+ **वैश्वदेवहोमः** । **अनु० १५४ । ९ ॥**
+ **वैष्णवधर्मप्रशंसनं** । **अनु० ३६ । २९–६२ ॥ अश्व० ९६–११८ ॥**
+ **वैष्णवलक्षणं** । **अश्व० १०४ ॥**
वैष्णवास्त्रं । तत्प्रयोगो भगदत्तेन । **द्रो० २९ । १७ ॥**
वैहारः । पर्वतः । मगधदेशस्थः । **स० २१ । २ ॥**
व्यश्वः । राजर्षिः । **स० ८ । १२ ॥**

+ **व्याघ्रः** । द्वीपी । तज्जातीयानामुत्पत्तिः । **आ० ६७ । ६५ ॥**

१ **व्याघ्रकेतुः** । क्षत्रियः । पाण्डवपक्षीयः पाञ्चाल्यः । कर्णेन हतः । **क० ५१ । ४६–४७ ॥**

२ **व्याघ्रकेतुः** । दुर्योधनपक्षीयो राजकुमारः । सात्यकिना हतः । **द्रो० १०७ । ३१ ॥**

+ **व्याघ्रगोमायुकथा । शां० १११ ॥**

१ **व्याघ्रदत्तः** । क्षत्रियः । मागधपुत्रः । सात्यकिना हतः । **द्रो० १०७ । ३२ ॥**

२ **व्याघ्रदत्तः** । कश्चन पाञ्चाल्यः । रथोदारः । उ० १७१ । १९ ॥ द्रोणेन हतः । **द्रो० १६ । ४९ ॥**

व्याघ्रपदः । ऋषिः । वसिष्ठाद्व्याभ्यामुत्पन्नः । **अनु० ५३ । ३० ॥**

व्याघ्रपादः । ऋषिः । तत्पुत्रौ उपमन्युः धौम्यश्च । **अनु० ४५ । २९ ॥ ९६ ॥**

+ **व्याधकपोतोपाख्यानं । शां० १४३—१४८ ॥**

+ **व्याधिः** । तस्य शारीरमानसभेदेन द्वैविध्यं । **अश्व० १२ । १ ॥**

तदुत्पत्तिः । **शां० २६४ । ३५ ॥**

व्यासः । वेदविभागकर्ता । पराशरसुतः । कृष्णद्वैपायनः । तन्माता वासवी सत्यवती । **आ० ६० । १४ ॥** [वेदविभागकर्तृत्वादन्येपि व्यासशब्दवाच्याः । ते च एकैकस्मिन्महायुगे एकैक इत्यनेके स्वयंभूप्रभृतयः सप्तविंशतिरतीताः । वर्तमाने महायुगे तु कृष्णद्वैपायनः । आगामिनि महायुगे द्रौणिर्व्यासो भविष्यति । देवीभा० १ । ४ ॥ विष्णु० ३ । ४ ॥]

तस्योत्पत्तिः । **आ० ६० । २ ॥ ६४ । १२६ ॥ ११४ । ३४ ॥ शां० ३५९ । ६ ॥** [भा० १२ । ६ ॥ देवीभा० २ । १–२ ॥]

[तस्यावतारकालः । भा० १ । ४ ॥]

तस्य वेदाध्ययनं । **आ० ६० । ३ ॥**

तस्योपनयनं । **आ० ६४** । अधिकपाठे ७६ ॥

तेन वेदविभागः । **आ० ६० । ५ ॥** [भा० १२ । ६ ॥ विष्णुः ३ । ३–४ ॥ वायु० ६० ॥]

तेन महाभारतनिर्माणं । **आ० १ । ६८ ॥**

तेन भारतानां कीर्तिप्रकथनप्रतिज्ञा । **भी० २ । १३ ॥**

तेन यज्ञकरणं । **आ० ५५ । ७ ॥**

तस्य स्तुतिः । **आ० १ । ३२ ॥ द्रो० २०२ । ४७ ॥ शां० ३५६ । ११ ॥ ३५९ । ३ ॥**

तत्प्रशंसा ब्रह्मकृता । **आ० १ । ९६ ॥**

तत्प्रशंसा वैशंपायनकृता । **शां० ३५९ । ४ ॥**

तत्सकाशे ब्रह्मण आगमनं । **आ० १ । ८१ ॥**

तेन भारतलेखनाय गणेशस्मरणं तदागमनं च । **आ० १ । १११–११२ ॥**

तेन महाभारते ग्रन्थग्रन्थिकरणं । **आ० १ । ११६ ॥**

तदागमनं जनमेजयस्य सर्पसत्रे । **आ० ६० । १ ॥**

तेन मधुपर्के गोः समनुज्ञानं । **आ० ६० । १४ ॥**

तेन विचित्रवीर्यभार्ययोः अम्बिकाम्बालिकयोः धृतराष्ट्रपाण्ड्वोरुत्पादनं । **आ० ११५ ॥**

तेन हास्तिनपुरात्सत्यवत्यास्तपोवनप्रापणं । **आ० १३७ । १२ ॥**

तदागमनं पाण्डवसमीपे शालिहोत्राश्रमे । **आ० १६८ । ३२ ॥**

तद्दर्शनं पाण्डवानामेकचक्रामार्गे । **आ० १७० । ७ ॥**

तेन पाण्डवान्प्रति तेषां द्रौपदीलाभस्य भावित्वकथनं । **आ० १८४ । १५ ॥**

तद्दर्शनं पाण्डवैर्द्रुपदपुरमार्गे । **आ० २०० । २ ॥**

तेन धृतराष्ट्रं प्रति पाण्डवैः सह शमविधानं । **व० ८ ॥**

तेन युधिष्ठिराय प्रतिस्मृतिविद्योपदेशः । **व० ३६ । ३० ॥**

तदागमनं काम्यकवने पाण्डवसमीपे दानप्रशंसनं च । **व० २६० ॥**

तेन संजयं प्रति धृतराष्ट्रप्रश्नस्योत्तरदानाभ्यनुज्ञानं । उ० ६६ । १० ॥
तेन संजयाय कुरुपाण्डवयुद्धविषये सर्वज्ञत्वप्रदानं । भी० २ । ९ ॥
तेनाभिमन्युवधमनुशोचतो युधिष्ठिरस्याश्वासनं । द्रो० ५२ । १० ॥
तेन युधिष्ठिरायाकम्पनोपाख्यानकथनं । द्रो० ५२-५४ ॥
तेन युधिष्ठिराय षोडशराजकीयोपाख्यानकथनं । द्रो० ५५-७१ ॥
तेन समराङ्गणे अश्वत्थामानं प्रति तत्प्रयुक्तनारायणास्त्रस्य वैफल्ये श्रीकृष्णार्जुनयोर्नारायणनरस्वरूपत्वस्य कारणत्वकथनं । द्रो० २०२ । ४७ ॥
तेन समराङ्गणेऽर्जुनाय शतरुद्रीयकथनं । द्रो० २०३ । ९-२० ॥
तेन दुर्योधनहननार्थं स्वयं गच्छतो युधिष्ठिरस्य प्रतिनिवर्तनं । द्रो० १८४ । ५७ ॥
तेन वधोद्यतस्य सात्यकेः सकाशात्सञ्जयस्य मोचनं । श० २९ । २० ॥
तेन पुत्रशोकाभितप्तस्य धृतराष्ट्रस्य तत्वोपदेशाच्छोकापनोदनं । स्त्री० ८ ॥
तेन युधिष्ठिरं शप्तुकामाया गान्धार्याः कोपापनोदनं । स्त्री० १३ ॥
तेन युधिष्ठिरं प्रति शङ्खलिखितोपाख्यानकथनपूर्वकं क्षात्रधर्मस्वीकरणचोदना । शां० २३ ॥
तेन पुत्रार्थं तपश्चरणं । शां० ३३१ । १२-१३ ॥
तस्माद्घृताच्यां शुकनामकपुत्रोत्पादनं । शां० ३३२ । ४-१० ॥
तेन शुकाय सृष्ट्यादिप्रकारकथनं । शां० २३८-२६१ ॥
तेन शुकानुशासनं । शां० ३२९ ॥
तस्य वासुदेवेन संवादोऽध्यात्मविषये । अनु० १५ ॥
तस्य वचनं हिंसां विनापि ब्रह्महत्या भवतीति विषये । अनु० ६३ ॥
तेन कीटाय राज्यदानं । अनु० १८० ॥
तस्य मैत्रेयेण सह दानस्योत्तमत्वे संवादः । अनु० १८२-१८४ ॥
तेन युधिष्ठिरं प्रति बन्धुजनहननपापापनोदायाश्वमेधकरणविधानं । अश्व० ३ । १-१० ॥
तेन दुर्योधनादीनां मृतानां पुनर्धृतराष्ट्रादिभ्यः प्रदर्शनं । आश्र० ३५ ॥
तेन परीक्षिच्छमीकशृङ्गिणां पुरामृतानां पुनर्जनमेजयाय प्रदर्शनं । आश्र० ३७ । ७-८ ॥
तेन पाण्डवानां भूमिं त्यक्त्वा स्वलोकगमनाय सूचनं । मौ० ९ । ३५-३६ ॥

व्यासवनं । क्षेत्रं । व० ८१ । ९३ ॥

व्यासस्थली । क्षेत्रं । व० ८१ । ९६ ॥

व्युषिताश्वः । क्षत्रियः । सो० वं० पूरुवंशोद्भवः तद्भार्या काक्षीवती भद्रा ।
तत्पुत्राः साल्वमद्रप्रभृतयः सप्त । आ० १२७ ॥

व्यूकाः । देशः । भी० ९ । ६१ ॥

व्यूढोराः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । आ० १३१ । १४ ॥

व्यूढोरुः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० ६८ । १०५ ॥

+ **व्रीहिद्रौणिकपर्व** । व० २६०-२६२ ॥

श.

शंयुः । बृहस्पतेस्तारायां जातेषु षट्सु पुत्रेषु प्रथमः । स आज्याहुतिभागग्निविशेषः । तद्भार्या सत्या । तत्पुत्रौ भरतो भरद्वाजश्चाग्निविशेषौ । व० २२१ । १० ॥

शकटः । कंसभृत्योऽसुरः । श्रीकृष्णेन हतः । स० ५२ । १७ ॥ [भा० १० । ७ ॥ हरि० २ । ६ ॥ विष्णु० ५ । ६ ॥]

+ **शकटव्यूहः** । कौरवाणां । द्रोणाचार्यनिर्मितः । अस्य चक्रव्यूह इति पद्मव्यूह इति च नामान्तरे । द्रो० ३३ । १४ ॥ ८७ । २२ ॥ पद्मव्यूहशब्दं पश्यत ।

शकाः । देशः । **स० ७८** । ९९ ॥ **भी०** ९ । ४५ ॥

१ **शकुनिः** । क्षत्रियः । सुबलस्य पुत्रः । गान्धार्या भ्राता । दुर्योधनादीनां मातुलः । एकरथः । **उ० १६७** । १ ॥

तस्योत्पत्तिः । **आ० ६४** । १५४ ॥

तस्य द्वापरांशत्वं । **आ० ६८** । ७८ ॥

तस्य पुत्र उलूकः । सहदेवेन हतः । **श० २७** । ३१ ॥

तस्य भ्रातरः । वृषकः बृहद्बलः । **आ० २०१** । ५ ॥ अचलः । **द्रो० ३०** । ८ ॥ शरभः सुभगः विभुः भानुदत्तः । **द्रो० १५८** । २३–२४ ॥ गजः गवाक्षः चर्मवान् आर्जवः शुकः । **भी० ९०** । ३० ॥

तस्य स्वसारः । गान्धारीप्रभृतयः । गान्धारीशब्दे-द्रष्टव्याः ।

तस्य युद्धं । **द्रो० १४** । २३ ॥

तस्य नकुलसहदेवाभ्यां पराजयः । **द्रो० ९६** । २४॥

तस्य सुतसोमेन सह युद्धं । **क० १६** । १८–४२ ॥

तस्य भीमसेनेन पराजयः । **क० ८१** । ६८ ॥

तस्य सहदेवेन वधः । **श० २७** । ६० ॥

तच्छववर्णनं । **स्त्री० २४** । २३ ॥

२ **शकुनिः** । सर्पः । **आ० ५७** । १६ ॥

३ **शकुनिः** । स्कन्दग्रहः । **व० २३०** । २६ ॥

+ **शकुनिकथा** । ज्ञातिभिर्विरोधस्यानर्थहेतुतायां दृष्टान्तत्वेन विदुरेण कथिता पक्षिकथा । **उ० ६४** ॥

शकुन्तः । विश्वामित्रस्य पुत्रः । **अनु० ७** । ५० ॥

शकुन्तला । कण्वमहर्षेः पोषितदुहिता । दुष्यन्तस्य द्वितीया भार्या । तत्पुत्रो भरतः । **आ० ६३** । ३१ ॥ ८८ । १८ ॥

तस्या उत्पत्तिः । **आ० ९२** । २७ ॥

तस्या जनकः पिता विश्वामित्रः । माता मेनका अप्सराः । **आ० ६३** । ३१ ॥ ९३ । १५ ॥

तन्नामनिर्वचनं । **आ० ९३** । २६ ॥

तस्याः दुष्यन्तेन सह विवाहविषये विवादः । **आ० ९२** ॥

तस्या दुष्यन्तेन सह गान्धर्वविवाहः । **आ० ९४** । ३४ ॥

तस्याः कण्वेन सह तत्कृतगान्धर्वविवाहविषये संवादः । **आ० ९४** । ५०–६६ ॥

तस्याः भरतनामकपुत्रोत्पत्तिः । **आ० ९५** । ९ ॥

तस्याः दुष्यन्तगृहगमने कण्वेन सह विवादः । **आ० ९६** । २६–४१ ॥

तस्या भरतेन कण्वशिष्यैश्च सह हास्तिनपुरगमनं । **आ० ९७** । १८ ॥

+ **शकुन्तलोपाख्यानं** । **आ० ८९–१००** ॥

शक्तिः । ऋषिः । वसिष्ठपुत्रः । तन्माताऽरुन्धती । तद्भार्या अदृश्यन्ती । तत्पुत्रः पराशरः । **आ० १९२** । ११ ॥

तस्य कल्माषपादेन भक्षणं । **आ० १९२** । ४९ ॥

शक्रः । द्वादशादित्येष्वन्यतमः । **आ० ६६** । १५ ॥ इन्द्रशब्दं पश्यत ।

शक्रदेवः । क्षत्रियः । कालिङ्गराजस्य भानुमतः पुत्रः । भीमसेनेन हतः । **भी० ५४** । २४ ॥

+ **शक्रबकसंवादः** । **व० १९६** ॥

१ **शङ्कुकर्णः** । सर्पः । **आ० ५७** । १५ ॥

२ **शङ्कुकर्णः** । क्षत्रियः । सो० वं० जनमेजयस्य पुत्रः । **आ० ६३** । ८७ ॥

शङ्कुकर्णेश्वरः । **व० ८०** । ७१ ॥

१ **शङ्खः** । क्षत्रियः । विराटराजस्य पुत्रः । तन्माता सुरथा । रथोदारः । **उ० १७१** । १५ ॥ **आ० २०१** । ८ ॥ **स० ७** । ११ ॥ तस्य सगर्भ्यो भ्राता श्वेतः । **वि० २१** । १८ ॥

तस्य युद्धं । **वि० ३४** । २४ ॥ **भी० ४९** । २६ ॥

तस्य वधो द्रोणाचार्येण । **भी० ८२** । २३ ॥

२ **शङ्खः** । सर्पः । **आ० ३५ । ८ ॥ उ० १०३ । १२ ॥**

३ **शङ्खः** । असुरः । **स० ९ । १७ ॥**

४ **शङ्खः** । लिखितस्य भ्राता ऋषिः । **शां० २३ । १८ ॥**

शङ्खतीर्थं । **श० ३८ । १९ ॥**

शङ्खपिण्डः । सर्पः । **आ० ३५ । १३ ॥**

शङ्खमुखः । सर्पः । **आ० ३५ । ११ ॥**

शङ्खमेखलः । ऋषिः । **आ० ८ । २४ ॥**

शङ्खशिराः । सर्पः । **आ० ३५ । १२ ॥**

शङ्खिनीतीर्थं । **व० ८१ । ५१ ॥**

शची । इन्द्रस्य भार्या । पुलोमनाम्नोऽसुरस्य पुत्री । जयन्तस्य माता । इन्द्राणी । **स० ७ । ४ ॥ ११ । ४२ ॥**

तस्याः सूर्येण संवादः । **अनु० १४ । ५-६ ॥**

शतकुम्भा । नदी । **व० ८२ । १० ॥ भी० ९ । १९ ॥**

शतचन्द्रः । क्षत्रियः । सुबलस्य गान्धारराजस्य पुत्रः । भीमसेनेन हतः । **द्रो० १५८ । २३ ॥**

शतज्योतिः । सुभ्राजस्य पुत्रः । **आ० १ । ५७ ॥**

शतद्युम्नः । राजर्षिः । तस्य मुद्गलाय ऋषये गृहदानेनोत्तमलोकप्राप्तिः । **शां० २४० । ३२ ॥ अनु० २०० । २१ ॥**

शतद्रुः । पुत्रमरणेन जीविते निर्विण्णस्य आत्मानं त्यक्तुकामस्य वसिष्ठस्य स्वस्मिन्पतनादात्मानं शतधा विभज्य स्थिता हैमवती नाम नदी । **आ० १९३ । ९-१० ॥ स० ९ । २३ ॥ भी० ९ । १५ ॥** The river Sutlej: it is also called Ghaggar or the Ghara.

शतधन्वा । कलिङ्गराजकन्यास्वयंवरार्थमागतः कश्चन क्षत्रियः । **शां० ४ । ७ ॥**

शतपर्वा । शुक्राचार्यभार्या । **उ० ११७ । १३ ॥**

शतबला । नदी । **भी० ९ । २० ॥**

शतमुखः । असुरः । तस्य रुद्राद्वरप्राप्तिः । **अनु० ४५ । ६८ ॥**

शतयूपः । केकयवंश्यः । वानप्रस्थाश्रमो राजर्षिः । **आश्र० २० । १२ ॥**

+ **शतरुद्रीयं** । व्यासेनार्जुनं प्रति कथिता रुद्रस्तुतिः । **द्रो० २०३ । २९ ॥**

शतशीर्षा । वासुकेर्भार्या । **उ० ११७ । १७ ॥**

शतशृङ्गः । पर्वतः । **आ० १२४ । ५१ ॥**

तस्य कुन्त्या अङ्के स्थितस्य भीमसेनस्य अधःपतनेन संचूर्णनं । **आ० १२९ । ६२ ॥**

शतशौचं । तीर्थं । **व० ८१ । २१ ॥**

शतसाहस्रकं । तीर्थं । **व० ८२ । ७३ ॥**

१ **शतानन्दः** । सप्तर्षिष्वन्यतमस्य गौतमस्य पुत्रः । तन्माता ब्रह्मणो मानसपुत्री अहल्या । अयं विदेहानां पुरोहितः । **अनु० ६५ । ८ ॥**

२ [**शतानन्दः** । अन्यस्य गौतमनाम्न ऋषेः पुत्रः । तन्माता विन्ध्याश्वराजपुत्री अहल्या । तद्भ्राता चिरकारी । तत्पुत्रः कृपाचार्यस्य मूलपुरुषः सत्यधृतिः । भा० ९ । २१ ॥]

१ **शतानीकः** । क्षत्रियः । सो० वं० पाण्डवप्रपौत्रस्य जनमेजयस्य पुत्रः । तत्पुत्रोऽश्वमेधदत्तः । **आ० ६३ । ८७ ॥**

२ **शतानीकः** । मत्स्यराजस्य विराटस्य भ्राता । **वि० ३३ । १९ ॥** भीष्माचार्येण हतः । **भी० ११८ । २७ ॥** द्रोणाचार्येण हतः । **द्रो० २१ । २८ ॥ १५९ । ४० ॥**

तस्य शल्येन सह युद्धं । **द्रो० १६८ । २९ ॥**

३ **शतानीकः** । क्षत्रियः । सो० वं० नकुलस्य पुत्रः । तन्माता द्रौपदी । **आ० ६३ । ७४ ॥ ६४ । १६५ ॥**

तस्य तन्नामकरणे कारणं । **आ० २४७ । ८० ॥**

तस्य वधः अष्टादशरात्रौ द्रौणिना । **सौ०** ८ । ६४ ॥

४ **शतानीकः** । सो० वं० कश्चन राजर्षिः । **आ०** २४७ । ८० ॥ *

शतायुः । क्षत्रियः । सो० वं० पुरूरवसः पुत्रः । **आ०** ६९ । २८ ॥

+ **शत्रुः** । तल्लक्षणं । **शां०** ८० ॥

तच्छब्दनिर्वचनं । **क०** ३६ । ३५ ॥

स च त्रयोदशविधः । **शां०** १६१ । ३ ॥

शत्रुघ्नः । क्षत्रियः । सू० वं० दशरथस्य पुत्रः । तन्माता सुमित्रा । तद्भ्राता लक्ष्मणः । **स०** ५० । २७ ॥ **व०** २७५ । ८ ॥

१ **शत्रुञ्जयः** । क्षत्रियः । द्रुपदस्य पुत्रः । **द्रो०** ३२ । ६१ ॥ अश्वत्थाम्ना हतः । **द्रो०** १५७ । १८१–१८२ ॥

२ **शत्रुञ्जयः** । सूतः । कर्णस्य भ्राता । अर्जुनेन हतः । **द्रो०** ३२ । ६१ ॥

३ **शत्रुञ्जयः** । क्षत्रियः । कौरवपक्षीयः । अभिमन्युना पराजितः । **द्रो०** ४८ । १५ ॥

४ **शत्रुञ्जयः** । क्षत्रियः । जयद्रथभ्राता । **व०** २६६ । ११ ॥

५ **शत्रुञ्जयः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **भी०** ५१ । ८ ॥ ७९ । ५७ ॥ भीमसेनेन हतः । **द्रो०** १३७ । ३० ॥

शत्रुन्तपः । कर्णस्यानुजः । अर्जुनेनोत्तरगोग्रहणे हतः । **वि०** ५८ । १८ ॥

शत्रुसहः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । भीमेन हतः । **द्रो०** १३७ । ३० ॥

शनिः । **शनैश्चरः** ।

शन्तनुः । क्षत्रियः । सो० वं० प्रतीपस्य पुत्रः । तन्माता सुनन्दी । तद्भ्रातरौ देवापिः बाह्लीकश्च । **आ०** ६३ । ४७ ॥ १०१ । ५० ॥ तन्नामनिर्वचनं । **आ०** ६३ । ४९ ॥

+ **शपथः** । **अनु०** १४२ । ५६–७५ ॥ १४३ । १६–४१ ॥

शबराः । देशः । **भी०** ५० । ५३ ॥ **द्रो०** ११९ । ५३ ॥

शबलः । सर्पः । **आ०** ३५ । ७ ॥

शबलाश्वः । क्षत्रियः । सो० वं० अविक्षितः पुत्रः । **आ०** १०१ । ४० ॥

१ **शमः** । धर्मप्रजापतेः पुत्रः । तद्भार्या प्राप्तिः । तद्भ्रातरौ कामो हर्षश्च । **आ०** ६७ । ३२ ॥

२ **शमः** । अहर्नामकवसोः पुत्रः । तद्भ्रातरः ज्योतिः शान्तः मुनिश्च । **आ०** ६७ । २३ ॥

३ + **शमः** । गुणः तस्य श्रैष्ठ्यं । **उ०** २७ । २३ ॥ ७३ ॥

शमठः । गयाशिरनामकपर्वतस्थो ब्राह्मणः । **व०** ९३ । १९ ॥

शमीकः । ऋषिः । शृङ्गिणः पिता । **आ०** ४१ । २१ ॥ [भा० १ । १८ ॥]

तस्य समाधिस्थस्य स्कन्धे परीक्षिद्राजेन मृतसर्पप्रक्षेपः । **आ०** ४१ । ९ ॥

तस्य शिष्यो गौरमुखः । **आ०** ४२ । १४ ॥

तस्य शृङ्गिणा विवादः परीक्षिच्छापदानस्यायुक्ततायां । **आ०** ४२ । १–१२ ॥

+ **शमी** । वृक्षः । विराटनगरसमीपे श्मशानस्थे तस्मिन्वृक्षे पाण्डवैरायुधनिक्षेपः । **वि०** ७ । १७ ॥

शमीतीर्थं । तीर्थं । **व०** ८० । ७२–७३ ॥

शम्पाकः । शम्याकशब्दं पश्यत ।

शम्बरः । दनुपुत्रोऽसुरः । **आ०** ६६ । २२ ॥

तस्य इन्द्रेण सह ब्राह्मणमाहात्म्यविषये संवादः । **अनु०** ७१ ॥

[तस्य वधः श्रीकृष्णपुत्रेण प्रद्युम्नेन । भा० १० । ५५ ॥ हरि० २ । १०७ ॥]

शम्बुकः । दाशरथिरामेण हतः शूद्रतापसः । **शां०** १५२ । ६७ ॥ [रा० ७ । ७६ ॥]

शम्भलग्रामः । सम्भलग्रामशब्दं पश्यत ।

१ **शम्भुः** । रुद्रशब्दं पश्यत ।

२ **शम्भुः** । अग्निविशेषः । **व०** २२३ । ५ ॥
शम्भ्वठा । सुबलराजस्य पुत्री । गान्धार्याः स्वसा । धृतराष्ट्रस्य भार्या । **आ०** ११९ । २४ ॥
शम्याकः । (**शम्पाकः** ।) ब्राह्मणः । **शां०** १७५ । २ ॥
+ **शम्याकगीता** । दारिद्र्यधनिकत्वयोः क्रमेणार्थानर्थसाधनत्वे । **शां०** १७५ ॥
+ **शय्यादानफलं** । **अश्व०** १०३ । १९ ॥
शरणः । सर्पः । **आ०** ५७ । ६ ॥
+ **शरणागतरक्षणफलं** । **अनु०** ६७ ॥
+ **शरतल्पं** । भीष्मस्य प्रायोपवेशनार्थमर्जुनेन निर्मितं बाणमयं तल्पं । **आ०** २ । २५२ ॥ **भी०** १२० । १५ ॥ **द्रो०** ३ । १ ॥
शरद्वान् । ऋषिः । **आ०** ६४ । १४९ ॥ [विन्ध्याश्वनामकपाञ्चालपुत्रस्याहल्याभर्तुर्गौतमस्य वंशे उत्पन्नस्य सत्यधृतेः पुत्रः । भा० ९ । २१ ॥]
तत्पुत्रौ कृपी कृपाचार्यश्च । **आ०** ६४ । १४९ ॥
तस्य तपस्यतो जालवतीनामकाप्सरोदर्शनात्स्कन्नाच्छरस्तम्बे पतिताद्रेतसः कृपस्य कृप्याश्चोत्पत्तिः । **आ०** १४० । २-२० ॥
१ **शरभः** । दनुपुत्रोऽसुरः । **आ०** ६६ । २६ ॥
२ **शरभः** । सर्पः । **आ०** ५७ । ११ ॥
३ **शरभः** । क्षत्रियः । शिशुपालस्य पुत्रः । तेनाश्वमेधाश्वरक्षणार्थमागतस्यार्जुनस्य पूजनं । **अश्व०** ८४ । ३ ॥
४ **शरभः** । क्षत्रियः । गान्धारराजस्य सुबलस्य पुत्रः । भीमसेनेन हतः । **द्रो०** १५८ । २३ ॥
५ **शरभः** । राजर्षिः । **स०** ८ । १४ ॥
शरभङ्गः । गौतमकुलोत्पन्नः ब्रह्मर्षिः । **व०** २७८ । ४७ ॥
शरभङ्गाश्रमः । **व०** ८३ । ४२ ॥ दण्डकारण्ये गोदावरीतीरे । **व०** २७८ । ४६ ॥
+ **शरमयवेश्मनिर्माणं** । हयाप्यायनार्थमर्जुनेन । **द्रो०** ९९ । ६३ ॥

शरावती । नदी । **भी०** ९ । २० ॥ The river Sabarmati in Guzerat. Ahmedabad stands on this river. 2. Sarawati appears to be the corruption of the river Saraswati in Fyzabad (Oudh.)
शरासनः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ०** १३१ । ४ ॥ भीमसेनेन हतः । **द्रो०** १३६ । २० ॥
+ **शरीरस्य पाञ्चभौतिकत्वं** । **शां०** १८२ । ४ ॥
शर्मिष्ठा । असुरराजस्य वृषपर्वणः पुत्री । ययातेर्द्वितीया भार्या । तत्पुत्राः द्रुह्युः अनुः पूरुश्च । **आ०** ६३ । ७ ॥ ६९ । ३८ ॥ ७७ । २१ ॥
तया देवयान्याः कूपे प्रक्षेपः । **आ०** ७२ । १३ ॥
तया पुत्रोत्पादनार्थं ययातिं प्रति प्रार्थना । **आ०** ७६ । ३६ ॥
तस्याः पुत्रोत्पत्तिः । **आ०** ७६ । ४३ ॥
[तस्याः कथा । भा० ९ । १८ ॥ मत्स्य० २७-३२ ॥]
१ **शर्यातिः** । क्षत्रियः । सू० वं० वैवस्वतमनोः पुत्रः । तस्य कन्या सुकन्या । **व०** १२३—१२६॥
२ **शर्यातिः** । क्षत्रियः । सो० वं० प्राचीन्वतः पुत्रः । तन्माता आश्मकी । तद्भार्या त्रिशङ्कोर्दुहिता । तत्पुत्रोऽहंयातिः । **आ०** ६३ । १२ ॥
१ **शलः** । क्षत्रियः । सू० वं० परीक्षित्पुत्रः । तद्भ्रातरौ दलो बलश्चेति । **व०** १९५ । ३८ ॥
तस्य मृगयार्थं वनगमनं । तत्र वामदेवऋष्याश्रमगमनं च । **व०** १९५ । ३८—४२ ॥
२ **शलः** । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । **आ०** १३१ । ४ ॥ **क०** ४६ । ८ ॥
३ **शलः** । सर्पः । **आ०** ५७ । ५ ॥
४ **शलः** । क्षत्रियः । सो०वं० कुरुपुत्रजह्नुवंशीयस्य बाह्लीकराजपुत्रस्य सोमदत्तस्य पुत्रः । तद्भ्रातरौ भूरिः भूरिश्रवाश्चेति । **आ०** २०१ । १५ ॥

द्रौपदेयैर्हतः । द्रो० १०८ । १-११ ॥
[भा० ९ । २२ ॥]
तत्पुत्रस्य वधः धृष्टद्युम्नेन । भी० ६१ ॥
तच्छववर्णनं । स्त्री० २४ । ९ ॥
शलकरः । सर्पः । आ० ५७ । ९ ॥
१ **शलभः** । दनुपुत्रोऽसुरः । आ० ६६ । २६ ॥
२ **शलभः** । पाण्डवपक्षीयः । कश्चन चैद्यः क्षत्रियः । कर्णेन हतः । क० ५१ । ५० ॥
शल्यः । मद्रराजः । आर्तायनिः । मद्रदेशाधिपतेः ऋतायनस्य पुत्रः । तत्स्वसा पाण्डोर्भार्या माद्री । अतिरथः । उ० १६५ । २६ ॥ भी० ६२ । १४ ॥
तस्य संह्लादांशत्वं । आ० ६८ । ६ ॥
तत्पुत्रौ रुक्माङ्गदो रुक्मरथश्च । आ० २०१ । १३-१४ ॥
तस्य पराजयो भीमसेनेन । आ० २०५ । ३४ ॥ द्रो० १५ ॥
तस्य युद्धे साहाय्यकरणार्थमागमनं । उ० ८ । १ ॥
तद्युद्धवर्णनं । द्रो० १५ ॥
तस्य सैनापत्येऽभिषेकः । श० ६ । १४ ॥
तेन कर्णस्य तेजोहरणार्थं तदुपालम्भः । क० ३१ । ३३ ॥
तद्गर्हणं कर्णेन । क० ३७ ॥
तेन दुर्योधनप्रार्थनया कर्णसारथ्याभ्युपगमः । क० २३ ॥
तेन कर्णस्य युद्धप्रोत्साहनं । क० ८३ । ३८-४८॥
तत्पराक्रमवर्णनं । श० १२ ॥
तस्य भीमसेनेन सह गदायुद्धं । द्रो० १५॥ श० ११ ॥
तस्य वधो युधिष्ठिरेण । श० १६ । ५० ॥
तद्वधकथा संक्षेपेण । श० १ । १० ॥
तदनुजवधो युधिष्ठिरेण । श० १६ । ६० ॥
+ **शवानां** युद्धे मृतानां वर्णनं गान्धार्या । स्त्री० १६—२२ ॥

शशबिन्दुः । राजर्षिः । स० ८ । २७ ॥ शा० २८ । १०५ ॥ [वृष्णिवंश्यस्य चित्ररथस्य पुत्रः । भा० ९ । २३ ॥]
तस्य शतसहस्रं भार्याः । एकैकस्यां भार्यायां सहस्रं सहस्रं पुत्राः । द्रो० ६५ । २ ॥
तस्य कथा । द्रो० ६५ ॥ शां० २८ । १५—१०० ॥ २०७ । ११ ॥
[तत्पुत्री बिन्दुमती मान्धातुर्भार्या । भा० ९ । ६ ॥ वायु० ८८ ॥]
शशयानतीर्थं । व० ८० । ११४ ॥
शशलोमा । राजर्षिः । आश्र० २१ । १४ ॥
शशादः । क्षत्रियः । सू० वं० इक्ष्वाकुपुत्रस्य विकुक्षेर्नामान्तरं । तत्पुत्रः ककुत्स्थः । व० २०५ । १ ॥
[तस्य कथा । भा० ९ । ६ ॥]
शशिकाः । (**शशकाः**) देशः । भी० ९ । ४६ ॥
शाकद्वीपः । भी० ११ । ८ ॥
शाकलः । मद्रदेशस्य राजधानी । स० ३५ । १४ ॥ क० ३७ । ३५ ॥ चन्द्रभागेरावत्योर्मध्ये विद्यमानो देशः ॥ The capital of Madra Desa.
शाकलद्वीपः । अयं इन्द्रप्रस्थस्योत्तरे विद्यमानो देशः । नतु द्वीपः । तस्य राजा प्रतिविन्ध्यः । तेन सहार्जुनस्य राजसूयदिग्विजये युद्धं । स० २७ । १४ ॥
शाकल्यः । शिवभक्त ऋषिः । अनु० ४५ । ८४ ॥
+ **शाकुनिककथा** । ज्ञातिविरोधस्यानर्थहेतुतायां दृष्टान्तत्वेन विदुरेण धृतराष्ट्राय कथिता । उ० ६४ । १-१६ ॥
शाक्तेयः । पराशरः । आ० १९८ । १ ॥
शाखः । स्कन्दस्य मूर्त्यन्तरं । श० ४५ । ३७ ॥
शाखम्भरी । देव्याः स्थानं । व० ८२ । १२ ॥
शाण्डिली । शाण्डिल्यऋषेः कन्या । ऋषभकूट-

पर्वतस्था । उ० ११३ । १ ॥ इयमेव स्वयंप्रभा । भी० ८ । ९ ॥ [रा० ४ । ५१ ॥]

तस्या अपध्यानेन गरुडस्य पक्षभ्रंशः । तस्याः प्रसादात्पुनस्तस्य पक्षप्ररोहणं च । उ० ११३ । ५ ॥ २० ॥ [स्कान्दपु० नागरखं० ८१—८२ ॥]

तस्याः सुमनानाम्या राजकन्यया पतिव्रतामाहात्म्यविषये संवादः । अनु० १८५ ॥

१ **शाण्डिल्यः** । मरीचिपुत्रस्य कांश्यपस्य वंशे उत्पन्नः ऋषिः । तद्वंशे कस्मिंश्चित्काले वैश्वानरनामाग्निरुत्पन्न इत्यग्नेः शाण्डिल्यगोत्रत्वं । स० ४ । २३ ॥ शां० ४६ । ७ ॥

२ **शाण्डिल्यः** । अग्नेर्जात ऋषिः । अनु० ९३ । २६ ॥

शान्तः । अहर्नामकवसोः पुत्रः । आ० ६७।२३॥

शान्तनवः । भीष्मः । आ० १०८ । ३ ॥

शान्तनुः । शन्तनुशब्दं पश्यत ।

तस्योत्पत्तिः । आ० १०३ । २०–२१ ॥

तन्नामनिर्वचनं । आ० १०३ । २२ ॥

तस्य पूर्वजन्मनि महाभिषङ्नामकसूर्यवंशीयराजत्वं । आ० १०३ । २१ ॥

तेन कृपाचार्यस्य कृप्याश्च पोषणं । आ० १४० । १३—१८ ॥

तस्य गङ्गया विवाहः । आ० १०४ ॥ [देवीभा० २ । ३ ॥]

तस्य दाशराजकन्यया सत्यवंत्या विवाहः । आ० १०८ । १ ॥

तस्य गङ्गायां जातः पुत्रो भीष्मः । आ० ६३ । ५० ॥

तस्य सत्यवत्यां जातौ पुत्रौ चित्राङ्गदो विचित्रवीर्यश्च । आ० ६३ । ५२ ॥ १०८ । ३ ॥

[तच्छ्राद्धकरणकाले भीष्मेण दर्भेष्वेव पिण्डनिक्षेपः । हरि० १ । १६ ॥]

[तस्य कथा । भा० ९ । २२ ॥ तस्य परिवेत्तृत्वात्तद्राज्ये अनावृष्टिः पश्चात्तच्छान्तिश्चेत्यादिकथा । विष्णु० ४ । २० ॥]

शान्ता । अङ्गराजस्य रोमपादस्य पुत्री । ऋश्यशृङ्गऋषेर्भार्या । व० ११४ । ११ ॥

[सा दशरथस्य पुत्री लोमपादाय दत्ता । भा० ९ । २३ ॥]

[सा लोमपादस्यैव पुत्री । तस्यैव दशरथ इति नामान्तरं । हरि० १ । ३१ ॥]

शान्तिः । अङ्गिरसः पुत्रः । अनु० १३२ । ४२ ॥

शारदण्डायनिः । क्षत्रियः । केकयः । तद्भार्या श्रुतसेना । तत्पुत्रा दुर्जयप्रभृतयः । आ० १२६ । ३७ ॥

शारद्वतः । कृपाचार्यः । आ० १५२ । ३० ॥

१ **शारद्वती** । द्रोणाचार्यभार्या कृपी ।

२ **शारद्वती** । अप्सराः । आ० १३२ । ४६ ॥

शार्ङ्गरवः । ऋषिः । जनमेजयकृते सर्पसत्रे ऋत्विग्ब्रह्मा । आ० ५३ । ६ ॥

शार्दूली । क्रोधवशायाः पुत्री । सिंहव्याघ्राणां माता । आ० ६७ । ६१–६५ ॥

शालग्रामः । क्षेत्रं । व० ८२ । १२४ ॥ A Place near the source of the river Gandaki.

शालिपिण्डः । सर्पः । आ० ३५ । १४ ॥

शालिशिराः । देवगन्धर्वः । आ० ६६ । ४४ ॥

शालिशूर्पं । तीर्थं । व० ८१ । १०७ ॥

शालिहोत्रः । कपिलऋषेः पुत्रः अश्वशास्त्रप्रणेता । १६८ । ५ ॥ व० ६९ । ३० ॥

शालिहोत्रसरः । तत्र पाण्डवानां गमनं । आ० १६८ । २ ॥

शालूकिनी । तीर्थं । व० ८१ । १३ ॥

१ **शाल्मलिः** । क्षत्रियः । सो० वं० अविक्षितः पुत्रः । आ० १०१ । ४० ॥

२ **शाल्मलिः** । द्वीपः । भी० १२ । ६ ॥

३ **शाल्मलिः** । वृक्षः । शां० १५३ । ४ ॥

तस्य कथा। **शां० १५३—१५५** ॥

शाल्वः। साल्वशब्दं पश्यत।

शिंशुमारः। (शिशुमारः)। भगवतो नारायणस्यावतारः। **अश्व० ११५। ५६** ॥

[भा० ५। २३ ॥ विष्णु० २। ९ ॥]

शिखण्डी। पाञ्चालराजस्य द्रुपदस्य प्रथमः पुत्रः। स प्रथमं स्त्री भूत्वा अनन्तरं पुंस्त्वं प्राप्तः। **आ० ६४। १६७॥ ११०। २९॥** रथमुख्यः। **उ० १७१। १** ॥

तस्य स्त्रीपूर्वत्वं। **उ० १७२। २०॥ १८८। ५** ॥

तस्य द्रोणाद्धनुर्विद्याभ्यासः। **उ० १८९। २** ॥

तस्य दशार्णाधिपतेर्हिरण्यवर्मणः पुत्र्या विवाहः। **उ० १८९। ८** ॥

तस्य पुंस्त्वप्राप्तिः। **उ० १९२। १०** ॥

तत्पुत्रौ क्षत्रदेवः ऋक्षदेवश्च। **द्रो० २३७। २५** ॥

तस्य युद्धं। **भी० १०८** ॥

तस्य कृतवर्मणा पराजयः। **क० १७। २१-४०**॥

तस्य वधः शिबिरेऽश्वत्थाम्ना। **सौ० ८। ७२** ॥

शिखावर्तः। यक्षः। **स० १०। १८** ॥

शिखावान्। ऋषिः। **स० ४। २०** ॥

शिनिः। क्षत्रियः। सो० वं० यदुकुलान्तर्गतवृष्णिकुलोत्पन्नः। तत्पुत्रः युयुधाननाम्नः सात्यकेः पिता सत्यकः। तस्य सोमदत्तेन सह युद्धं। **द्रो० १४४। ११** ॥

[तत्पिता अनमित्रः। भा० ९। २४ ॥]

शिनिप्रवीरः। क्षत्रियः। सात्यकिः। **श० १९। २६** ॥

१ **शिबिः**। हिरण्यकशिपोः पुत्रः। असुरः। **आ० ६६। १८** ॥

२ **शिबिः**। क्षत्रियः। भोजपुरनामकनगराधिपस्य सो० वं० अनुकुलोत्पन्नस्य उशीनरस्य पुत्रः। ययातेर्दौहित्रः। तन्माता माधवी। **उ० ११८। २०॥ स० ८। १०॥ व० २०१। २॥ वि० ५३। १४॥ शां० २८। ३९** ॥

तस्य कथा। **व० १३२॥ १९७॥ द्रो० ५८**॥

तस्य ययातिना संवादः। **आ० ८७। ८** ॥

तत्पुत्रो गोपतिः। **शां० ४८। ८५** ॥

तत्पुत्राः। वृषदर्भः सुवीरः मद्रः केकयः बृहद्गर्भः इत्यादयः। तेन स्वपुत्रं बृहद्गर्भनामानं हत्वा ब्राह्मणरूपाय ब्रह्मणे निवेदनं। **व० २०१। २०** ॥

[तत्पुत्राः वृषादर्भः सुवीरः मद्रः केकयश्च। भा० ९। २३ ॥]

तत्कृतः। पुष्करास्तेयशपथः। **अनु० १४३। २६** ॥

३ **शिबिः**। क्षत्रियः। पाण्डवपक्षीयः। द्रोणेन हतः। **द्रो० १५६। १९** ॥

शिरीषकः। सर्पः। **उ० १०३। १४** ॥

शिरीषी। ऋषिः। विश्वामित्रऋषेः पुत्रः। **अनु० ७। ५९** ॥

शिलवृत्तिः। ऋषिः। तस्य सिद्धेः संवादः। गङ्गामाहात्म्यविषये। **अनु० ६५। १९** ॥

१ **शिवः**। रुद्रः। महादेवः। रुद्रशब्दं पश्यत।

२ **शिवः**। ब्राह्मणः। वितस्त्यस्य पुत्रः। तत्पुत्रः श्रवाः। **अनु० ८। ६२** ॥

+ **शिवसहस्रनामस्तोत्रं। अनु० ४८। ३१-१५३** ॥ [लिङ्गपु० ६५ ॥ ९८ ॥ शिवपु० कोटिरुद्रसं० ३५ ॥]

१ **शिवा**। अङ्गिरसऋषेर्भार्या। **व० २२७। १** ॥

२ **शिवा**। अनिलनामकवसोर्भार्या। **आ० ६७। २५** ॥

३ **शिवा**। नदी। **भी० ९। २५** ॥

शिवाः। तन्नामकाः वेदपारगा ब्राह्मणाः दक्षिणस्यां दिशि स्थिताः। **उ० १०९। १८** ॥

शिशुपालः। क्षत्रियः। सो० वं० यदुपुत्रः

क्रोष्टा । तद्वंशीयो ज्यामघः । तद्वंशोत्पन्नस्य दमघोषस्य पुत्रः । तन्माता श्रीकृष्णस्य पितृष्वसा श्रुतश्रवा । **व० १५ । २॥ स० ६६ । २३॥**
[अयं पाण्डवानां मातृष्वस्रीयः । भा० ७ । १ ॥ ९ । २४ ॥]
तस्य सुनीथ इति नामान्तरं । **स० ३९ ।** ५४ ॥ **४२ । १ ॥**
तस्योत्पत्तिः । **स० ६६ । १ ॥**
तद्धननाय भीमसेनेन प्रयतनं । **स० ६५ ।** ९ –१४ ॥
तेन भीष्माचार्योपालम्भः । **स० ६४ ॥**
तस्य हिरण्यकशिप्वंशत्वं । **आ० ६८ । ५ ॥ स० ७० । ४६ ॥**
तेन श्रीकृष्णोपालम्भः । **स० ३९ । ५१ ॥ ४०॥**
तद्वधः श्रीकृष्णेन । **स० ७० । ५० ॥** [भा० १० । ७४ ॥]
तस्य पुत्रः सुकेतुः । द्रोणाचार्येण हतः । **क० ३ । ३२ ॥**
तस्यान्यः पुत्रः धृष्टकेतुः । द्रोणाचार्येण हतः । **द्रो० १२५ । ३९ ॥**
तस्य ततोप्यन्यः पुत्रः शरभः । **अश्व० ८४ । ३ ॥**
तत्पुत्री नकुलभार्या रेणुमती । **आ० ६३ । ७८ ॥**
तेन बभ्रुभार्यापहारः । **स० ६८ । १८ ॥**
+ **शिशुपालवधपर्व । स० ६३—७२ ॥**
+ **शिशुरूपी नारायणः** । मार्कण्डेयेन तस्य दर्शनं । **व० १९१ । ९१ ॥** [भा० १२ । ९ ॥]
शिशुरोमा । सर्पः । **आ० ५७ । १० ॥**
शीघ्रा । नदी । **भी० ९ । २९ ॥**
शीततोयवहा । नदी । **व० ८८ । २५ ॥**
शीतपूतना । स्कन्दमातृगणेष्वन्यतमा । **व० २३० । २८ ॥**
शीतवनं । क्षेत्रं । **व० ८१ । ५९ ॥**
+ **शीलं** । सत्स्वभावः । तस्य धर्मादिकारणत्वं । **शां० १२४ ॥**

१ **शुकः** । क्षत्रियः । गान्धारराजस्य शकुनेरनुजः । सुबलराजस्य पुत्रः । इरावता हतः । **भी० ९० ।** ३०—४९ ॥
२ **शुकः** । कृष्णद्वैपायनपुत्रः । शुकीरूपधारिण्यां घृताच्यां जातः । **आ० ६४ । १३१ ॥ स० ४ । १७ ॥**
तदुत्पत्तिकथा । **शां० ३३२ ॥** [देवीभा० १ । १४ ॥
तेन गन्धर्वादीनां भारतकथाकथनं । **आ० १ ।१२४॥**
तस्य व्यासेन सह जगत्सृष्ट्यादिविषये संवादः । **शा० २३८ ॥**
तं प्रति व्यासेन धर्मानुशासनं । **शां० ३२९ ॥**
तेन विद्याभ्यासार्थं जनकराजसमीपगमनं । **शां० ३३३ ॥**
तेन कैलासशिखरारोहणं । **शां० ३३९ । ६५ ॥**
तस्य नारदेनोपदेशः । **शां० ३३७—३३९ ॥**
[तस्य भार्या पितॄणां कन्या पीवरी । तत्पुत्री अणुहस्य भार्या कृत्वी यस्याः पुत्रो ब्रह्मदत्तः । भा० ९।२१॥ मत्स्य० १५ ॥ हरि० १ । १९–२० ॥]
[तस्य भार्या पितॄणां कन्या पीवरी । तत्पुत्राश्चत्वारः । कृष्णः गौरप्रभः भूरिः देवश्रुतः इति । तत्कन्या कीर्तिः अनुहस्य भार्या । इति देवीभा० १ । १९ ॥]
३ **शुकः** । रावणमन्त्री राक्षसः । **व० २८४ । ५२ ॥**
४ **शुकः** । पक्षी । तेन सहेन्द्रस्य संवादः । **अनु० ११ ॥**
शुकी । ताम्रायाः पुत्री । तत्पुत्राः शुकपक्षिणः । **आ० ६७ । ५९ ॥**
१ **शुक्तिमती** । शुक्तिमत्पर्वतादुत्पन्ना नदी । **आ० ६४ । ४८ ॥ भी० ९ । ३५ ॥**
The river Suvarnarekha in Orissa. 2. The river Vetravati in Malwa.
२ **शुक्तिमती** । शुक्तिमती नदीतीरस्था चेदिदेशस्य राजधानी । धृष्टकेतोर्नगरी । **व० २२ । ५०॥**

तस्यां कोलाहलनाम्नः पर्वतादुपरिचरवसुभार्याया गिरिकाया उत्पत्तिः। आ० ६४। ५१-५३॥
शुक्तिमान्। पर्वतः। स० ३१। ५॥ भी० ९। ११॥ The western portion of the Vindhya Range near Ujjain.
१ **शुक्रः**। भृगोः पुत्रः। तन्माता पुलोमा। तस्य भ्राता च्यवनः। आ० ६७। ४२॥ स० ११। २९॥ तत्पुत्री देवयानी। आ० ७०। १॥
तस्य कथा। आ० ६९—७७। शां० २९५॥
तद्भार्या शतपर्वा। उ० ११७। १३॥
[तद्भार्या प्रियव्रतपुत्री ऊर्जस्वती। तस्याः पुत्री देवयानी। भा० ५। १॥]
[तद्भार्या पुरन्दरस्य कन्या जयन्ती। तस्याः पुत्री देवयानी। मत्स्य० ४७॥]
तत्पुत्री देवी। सा वरुणस्य भार्या। आ० ६७। ५२॥
[तन्मातुर्विष्णुना हननं। वायु० ९७। देवीभा० ४। ११॥ मत्स्य० ४७॥]
[तत्पुत्रौ शण्डामर्कौ। भा० ७। ५॥]
तेन कुबेराद्धनापहारः। शां० २९५। ९॥
तेन रुद्रशिश्नाद्बहिर्निर्गमनं। शां० २९५। ३२॥
तन्नामनिर्वचनं। शां० २९५। ३२॥
तत्कृतः पुष्करास्तेयशपथः। अनु० १४३। २४॥
तस्य पुष्पधूपदीपादिदानविषये महाबलिना संवादः। अ० १५९॥
२ **शुक्रः**। शर्यातेः पुत्रः। तेन पाण्डवेभ्यो धनुर्विद्योपदेशः। आ० १३३। ५१॥
३ **शुक्रः**। क्षत्रियः। पाण्डवपक्षीयः पाञ्चाल्यः। कर्णेन हतः। क० ५१। ४६—४७॥
१ **शुचिः**। प्रायश्चित्ताग्निः। व० २२३। २४॥ २६॥
२ **शुचिः**। विश्वामित्रऋषिपुत्रः। अनु० ७। ५४॥
३ **शुचिः**। चेदिराजस्य सुबाहोः सार्थवाहः। व० ६१। १२७॥
शुचिका। अप्सराः। आ० १२३। ४४॥
शुचिश्रवाः। श्रीमान्नारायणः। तन्नामनिर्वचनं। शा० ३५२। २६॥
शुचिस्मिता। अप्सराः। स० १०। ११॥
शुद्धास्पदं। तीर्थं। व० ८१। ७७॥
शुनकः। ऋषिः। च्यवनपुत्रस्य प्रमतेः पुत्रः। तन्माता घृताची। तद्भार्या मेनकायाः पुत्री स्थूलकेशेन पोषिता प्रमद्वरा। तत्पुत्रः शौनकस्य पिता शुनकः। आ० ८। स० ४। २३॥ अनु० ८। ६५॥
२ **शुनकः**। क्षत्रियः। सो० वं० आयोर्वंशोत्पन्नस्य गृत्समदस्य पुत्रः। आ० ९८॥ ३८॥
+ **शुनः कथा**। शां० ११६—११७॥
शुनश्शेपः। भृगुकुलोत्पन्नस्य ऋचीकऋषेर्मध्यमः पुत्रः। यो हरिश्चन्द्रयज्ञे पशुभूतो विश्वामित्रेण मोचितः। अनु० ६। ६॥
[तस्य कथा। भा० ९। ७॥ हरि० १। २७॥ रा० १। ६१॥ देवीभा० ७। १६॥ ऋचीकस्यैव अजीगर्त इति नामेति भाति।
शुनस्सखः। त्रिदण्डसंन्यासरूपवानिन्द्रः। अनु० १४२। ४५॥
शुभा। गान्धारराजस्य सुबलस्य पुत्री। आ० ११९। १०॥
शुभाङ्गदः। द्रौपदीस्वयंवरार्थमागतः कश्चन क्षत्रियः। आ० २०१। २२॥
शुभाङ्गी। सो० वं० कुरुराजस्य भार्या। तत्पुत्रो विदूरथः। आ० ६३। ४२॥
शूद्रः। चतुर्थवर्णः। तस्य लक्षणं। शां० १८७। ७॥
तस्य कुलपतेश्च कथा। अनु० ३१॥
तस्याध्ययनं नास्ति। अनु० ३१। ४—५॥ अश्व० ११८। १३॥

तं प्रत्युपदेशस्यानर्थहेतुत्वं । अनु० ३१ ॥
तस्य धर्माः । अनु० १४६ । १ ॥ अश्व० ११८ । १५ ॥
तस्य यतिशुश्रूषाधिकारः । अनु० १४७ ॥
शूरः । क्षत्रियः । यदुकुलोत्पन्नस्य देवमीढस्य पुत्रः । तद्भार्या मारिषा । तत्पुत्रा वसुदेवादयः । आ० ६८ । १२९ ॥ १२० । १ ॥
तस्य पुत्र्यः कुन्तीप्रभृतयः । कुन्तीशब्दे द्रष्टव्याः । [भा० ९ । २४ ॥ हरि० १ । ३४ ॥]
शूरसेनः । क्षत्रियः । पाण्डवपक्षीयः पाञ्चाल्यः । कर्णेन हतः । क० ४३ । १५ ॥
शूरसेनाः । देशः । तस्य राजधानी मथुरा । भी० ९ । ३९ ॥ ५२ ॥ The kingdom of which Mathura was the capital.
शूरसेनी । सो० वं० पूरोः पुत्रस्य प्रवीरस्य भार्या । तत्पुत्रो मनस्युः । आ० ८८ । ५ ॥
शूर्पणखा । (**शूर्पनखी** ।) खरराक्षसस्य स्वसा राक्षसी । राकायाः पुत्री । व० २७६ । ८ ॥
तस्या नासिकाछेदो लक्ष्मणेन । व० २७८ ॥
शूर्पारकः । देशः । जामदग्न्यावासभूतः । शां० ४८ । ६८ ॥ स० ३२ । ६७ ॥ व० ८३ । ४३ ॥ Shurpalya near Jamkhandi in the District of Bijapur. (Bombay.)
+ **शूलारोपणं** । माण्डव्यस्य । आ० ११६ । १४ ॥
+ **शृगालः** । सृगालशब्दं पश्यत ।
तस्याग्निवक्रत्वं । व० २२६ । १८ ॥
शृङ्गबेरः । सर्पः । आ० ५७ । १३ ॥
शृङ्गबेरपुरं । भागीरथ्या उत्तरतीरस्थं गुहनामकस्य निषाधाधिपस्य पुरं । व० ८३ । ६५ ॥ Sringaur on the river Ganges, eighteen miles north west of Allahabad.
१ **शृङ्गवान्** । पर्वतः । स० २९ । ६३ ॥ भी० ६ । ५ ॥
२ **शृङ्गवान्** । गालवस्य ऋषेः पुत्रः । तद्भार्या वृद्धकन्या । श० ५३ । १५ ॥
शृङ्गी । आङ्गिरसकुलोत्पन्नस्य शमीकऋषेः गवि जातः पुत्रः । आ० ४० । २५ ॥ ५० । २ ॥
तेन परीक्षिद्राजाय शापदानं । आ० ४१ । १४ ॥ [भा० १ । १८ ॥]
तस्य स्वपित्रा शमीकेन सह राज्ञे शापदानस्य युक्तायुक्ततायां विवादः । आ० ४२ । १-११ ॥
+ **शृङ्गाटकव्यूहः** । पाण्डवानां । भी० ८७ । १७ ॥
शेषः । कद्रूपुत्रो नागः । आ० ३५ । ५ ॥ ६६ । ४१ ॥
तेन तपश्चरणं ब्रह्मणो वरलाभः पृथिवीधारणं च । आ० ३६ । ५-२२ ॥
शैखावत्यः । ऋषिः । भीष्मात्साल्वाच्च प्रतिनिवृत्तया अम्बया तस्याश्रमे तपश्चरणं । उ० १७५ । ३९-४६ ॥
१ **शैब्यः** । वृष्णिवंश्यः क्षत्रियः । युधिष्ठिरसभायां । स० ४ । ३१ ॥
२ **शैब्यः** । गोवासनः क्षत्रियः । द्रो० ९५ । ३९ ॥
३ **शैब्यः** । श्रीकृष्णस्य रथाश्वचतुष्टयेऽन्यतमः । व० २० । १३ ॥ अश्व० ११८ । ५६ ॥
४ **शैब्यः** । कोटिकाश्यः । व० २६८ । २ ॥
५ **शैब्यः** । वृषादर्भिः । अनु० १४१ । १२ ॥
६ **शैब्यः** । श्रीकृष्णेन निर्जितः कश्चन क्षत्रियः । व० १२ । ३१ ॥
१ **शैब्या** । नदी । भी० ९ । २४ ॥
२ **शैब्या** । प्रतीपभार्या सुनन्दी । तत्पुत्रा देवापिप्रभृतयः । आ० ६३ । ४७ ॥
३ **शैब्या** । श्रीकृष्णभार्या मित्रविन्दा । मौ० ८ । ७४ ॥
४ **शैब्या** । सूर्यवंश्यस्य सगरराजस्य पत्नी सुमतिः । तत्पुत्रोऽसमञ्जाः । व० १०५ । १० ॥

५ **शैव्या**। द्युमत्सेनराजस्य भार्या। सत्यवतो माता। **व० २९९**। २॥

शैलाभः। विश्वेषु देवेष्वन्यतमः। **अनु० १३८**। ३२॥

शैलालयः। क्षत्रियः। भगदत्तस्य पितामहः। **आश्र० २१**। १०॥

शैलूषः। गन्धर्वः। **स० १०**। २७॥

शैलोदा। नदी। **स० २९**। ४२॥

शैवलाः। देशः। **भी० ९**। ५४॥

शोणः। नदः। **व० ८३**। ८॥ **स० ९**। २५॥

शोणा। नदी। **भी० ९**। २९॥ The river Sone; it was the western boundary of Magadha.

शोणाश्वः। द्रोणाचार्यः। **वि० ५६**। ६॥ **द्रो० १२५**। २॥

शोणितोदः। यक्षः। **स० १०**। १८॥

+ **शौचं**। गुणः। तन्निरूपणं। **अनु० १७०**॥

शौनकः। भृगुवंश्यः। नैमिशारण्यवासी कुलपतिः भारतादीतिहासपुराणानां सौतिमुखाच्छ्रोता। **आ० १**। ५॥ ४। १॥ **शां० ३४८**। ९.१॥

तद्वंशकथनं। **आ० ५**। ६–११॥

१ **शौनकः**। इन्द्रोतापरनामा विप्रः। तेन पूरोः पुत्रस्य जनमेजयस्य ब्रह्महत्याया अश्वमेधयाजनेनापनोदनं। **शां० १४९–१५१**॥

२ **शौनकः**। युधिष्ठिरेण सह वने उषितवान्कश्चन ब्राह्मणः। **व० २**। १४॥ २६। २३॥ ८३। १२१॥

+ **श्मशानवृक्षः**। तस्मिन्पाण्डवानामायुधनिक्षेपः। **वि० ७**॥

श्यामः। पर्वतः। **भी० ११**। १९॥

श्यामायनः। विश्वामित्रऋषेः पुत्रः। **अनु० ७**। ५५॥

+ **श्येनकपोतीयं**। (**श्येनकपोतोपाख्यानं**)। **व० १३२**। २१॥ २००॥ **अनु० ६७**॥

श्येनचित्रः। क्षत्रियः। **अनु० १७७**। ७०॥

१ **श्येनजित्**। क्षत्रियः। इक्ष्वाकुकुलोत्पन्नस्य परीक्षित्पुत्रस्य दलराजस्य पुत्रः। **व० १९५**। ६३॥

२ **श्येनजित्**। पाण्डवपक्षीयः क्षत्रियः। **उ० १४१**। २७॥

+ **श्येनव्यूहः**। पाण्डवानां। **भी० ६९**। ५॥

श्येनी। ताम्रायाः पुत्री। विनतापुत्रस्यारुणस्य भार्या। तत्पुत्रौ संपातिर्जटायुश्च। **आ० ६७**। ५७॥

श्रद्धा। स्वायंभुवमन्वन्तरीयदक्षप्रजापतेः पुत्री। धर्मप्रजापतेर्भार्या। **आ० ६७**। १४॥

श्रद्धा। सूर्यस्य दुहिता। **शां० २७०**। ८॥

श्रवाः। शिवनामकब्राह्मणस्य पुत्रः। तत्पुत्रस्तमः। **अनु० ८**। ६३॥

+ **श्राद्धं**। पैतृकं कर्म। तत्र त्रीणि पवित्राणि। **आ० ८७**। २९॥

तत्र वर्ज्यानि धान्यानि। **अनु० १३८**॥

तत्रानर्हा ब्राह्मणाः। **अनु० ६१**॥ १३७॥

तद्दिने मैथुननिषेधः। **अनु० १८८**। २४॥

+ **श्राद्धपर्व**। **स्त्री० २६–२७**॥

+ **श्राद्धप्रकरणं**। **अनु० १३४–१३९**॥ १८८॥ २३८॥ [हरि० १। १६–२४॥] गरुडपु० २१८–२२०॥ मार्कण्डे० २८–३०॥]

श्रावस्तः। (**शावस्तः**)। क्षत्रियः। सू० वं० युवनाश्वस्य पुत्रः। श्रावस्तीनामकपुर्या निर्माता। तत्पुत्रो बृहदश्वः। **व० २०५**। ४॥ [भा० ९। ६॥]

श्रीः। महालक्ष्मीः। श्रीमतो नारायणस्य भार्या। तस्याः क्षीरार्णवादुत्पत्तिः। **आ० १८**। ४९॥ [भा० ८। ८॥]

तया रुक्मिणीं प्रति स्वावासस्थानकथनं । **अनु०** ३२ ॥

तस्याः भृगुऋषेः ख्यातिनामकभार्यायामुत्पत्तिः । **आ०** ६७ । ५१ ॥ [भा० ४ । १ ॥]

तस्याः शक्रेण संवादः । **शां०** २२२ ॥

श्रीकुञ्जतीर्थं । **व०** ८१ । १०८ ॥

श्रीतीर्थं । **व०** ८१ । ४६ ॥

श्रीपर्वतः । **व०** ८३ । १९ ॥ [तस्य श्रीशैल इति प्रसिद्धं नाम । कृष्णाजिल्लायां कृष्णानदीतीरे वर्तते । तदुपरि मल्लिकार्जुननाम्नः शिवस्य स्थानमस्ति ।]

श्रीमान् । दत्तात्रेयपुत्रस्य निमिऋषेः पुत्रः । **अनु०** १३८ । ५ ॥

श्रीवहः । सर्पः । **आ०** ३५ । १३ ॥

श्रुतः । पाञ्चालराजस्य द्रुपदस्य पुत्रः । रात्रियुद्धे अश्वत्थाम्ना हतः । **द्रो०** १५७ । १८२ ॥

१ **श्रुतकर्मा** । क्षत्रियः । सो० वं० अर्जुनस्य पुत्रः । तन्माता द्रौपदी । अस्य श्रुतकीर्तिरिति नामान्तरं । **आ०** २४७ । ७५ ॥

तन्नामनिर्वचनं । **आ०** २४७ । ७९ ॥

२ **श्रुतकर्मा** । क्षत्रियः । सो० वं० सहदेवस्य पुत्रः । तन्माता द्रौपदी । तस्य श्रुतसेन इति नामान्तरं । **भी०** ४५ । ६६ ॥ **द्रो०** २३ । ३२ ॥

तस्य सुदक्षिणनामकेन काम्भोजराजेन युद्धं । **भी०** ४५ । ६६ ॥

तस्य वधः शिबिरे अश्वत्थाम्ना । **सौ०** ८ । ६६ ॥

श्रुतकीर्तिः । क्षत्रियः । सो० वं० अर्जुनपुत्रः । तन्माता द्रौपदी । तस्य श्रुतकर्मेति नामान्तरं । **आ०** ६३ । ७४ ॥ ६४ । १६५ ॥ २४७ । ७५ ॥ **द्रो०** २३ । ३३ ॥

तस्य शल्येन पराजयः । **क०** १३ ॥

श्रुतञ्जयः । क्षत्रियः । त्रैगर्तः । अर्जुनेन हतः । **क०** १८ । ११ ॥

श्रुतध्वजः । मत्स्यराजस्य विराटस्य भ्राता । **द्रो०** १५९ । ४० ॥

१ **श्रुतर्वा** । कश्चन क्षत्रियः । तत्सकाशं प्रति धनार्जनार्थमगस्त्यस्य गमनं । **व०** ९६ । १ ॥

२ **श्रुतर्वा** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । भीमसेनेन हतः । **श०** २५ । २९ ॥

श्रुतवर्मा । क्षत्रियः । धार्तराष्ट्रनाममध्यपठितत्वादयमपि धृतराष्ट्रपुत्र इति भाति । **क०** ४ । १८ ॥

श्रुतश्रवा । चेदिराजस्य दमघोषस्य भार्या । वसुदेवस्य भगिनी । श्रीकृष्णस्य पितृष्वसा । तत्पुत्रः शिशुपालः । **व०** १५ । २ ॥

१ **श्रुतश्रवाः** । क्षत्रियः । **स०** ८ । ९ ॥

२ **श्रुतश्रवाः** । ऋषिः । पाण्डवप्रपौत्रजनमेजयस्य पुरोधसः सोमश्रवसः सर्प्यां जातः पुत्रः । **आ०** ३ । १३ ॥ ५३ । ९ ॥

१ **श्रुतसेनः** । तक्षकपुत्रः सर्पः । **आ०** ३ । १४१ ॥

तद्भ्राता अश्वसेनः । **आ०** २५३ । ५ ॥ **क०** ९७ । १२ ॥

२ **श्रुतसेनः** । क्षत्रियः । सो० वं० सहदेवस्य पुत्रः । तन्माता द्रौपदी । **आ०** ६३ । ७४ ॥ ६४ । १६६ ॥

तन्नामनिर्वचनं । **आ०** २४७ । ८१ ॥

३ **श्रुतसेनः** । पाण्डवपौत्रस्य परीक्षितः पुत्रः । जनमेजयस्य भ्राता । **आ०** ३ । १ ॥

श्रुतसेना । शारदण्डायनिभार्या । **आ०** १२६ । ३७ ॥

श्रुतानीकः । क्षत्रियः । विराटस्य भ्राता । **द्रो०** १५९ । ४० ॥

श्रुतान्तः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । भीमसेनेन हतः । **श०** २५ । ९ ॥

१ **श्रुतायुः** । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । भीमसेनेन हतः । **क०** ४६ । ७—११ ॥

२ **श्रुतायुः** । द्रौपदीस्वयंवरार्थमागतः कश्चन क्षत्रियः । **आ० २०१** । २१ ॥ **स० ४** । ३४ ॥

३ **श्रुतायुः** । क्षत्रियः । कालिङ्गः । तद्भ्राता अश्रुतायुः । **क० ७६** । १४ ॥ तस्य भीमेन सह युद्धं । **भी० ५४** ॥ अर्जुनेन हतः । **द्रो० ९३** । २४ ॥

तत्पुत्रौ दीर्घायुः नियुतायुश्च । तयोर्वधः । **द्रो० ९३** । २७–२९ ॥

श्रुतायुधः । क्षत्रियः । कालिङ्गः । **स० ४** । ३२ ॥ **भी० १६** । ६ ॥

सः वरुणात्पर्णाशानद्यां जातः । श्रीकृष्णं प्रति स्वेन प्रयुक्तया गदया प्रतिनिवृत्तया हतः । **द्रो० ९२** । ५८–६० ॥

श्रुतावती । कस्यचन भरद्वाजनामकस्य ब्राह्मणस्य पुत्री । तया केनचिद्ब्राह्मणेन दत्तानां बदराणां पाचनार्थं स्वपादयोरपि दाहनं । **श० ४९** । १–३२ ॥

श्रुताह्वः । क्षत्रियः । पाण्डवपक्षीयः । अश्वत्थाम्ना हतः । **द्रो० १५७** । १८२ ॥

श्रेणिमन्तः । क्षत्रियाः । **स० ७८** । ९२ ॥

श्रेणिमान् । क्षत्रियः । **आ० ६८** । ५१ ॥ **२०१** । ११ ॥ **स० ३२** । ५ ॥ **उ० १५१** । ६३ ॥ अतिरथः । **उ० १७१** । २७ ॥ **द्रो० २३** । ४२ ॥

श्रौतश्रवः । शिशुपालः । **व० १५** । २ ॥

+**श्वपचविश्वामित्रसंवादः** । **शां० १४१** ॥

१ **श्वसनः** । अमृतरक्षको देवः । तेन साकं गरुडस्य युद्धं । **आ० ३२** । १९ ॥

२ **श्वसनः** । सर्पः । **आ० ५७** । १७ ॥

+ **श्वा** । शुनकः । तस्य पुनः श्वानो भविष्यसीति शापदानकथा । **शां० ११६–११७** ॥

तेन सह पाण्डवानां स्वर्गं प्रति गमनं । **महा० १** । २६ ॥

श्वानलोमापहृत्तीर्थं । **व० ८१** । ६१ ॥

श्वासा । श्वसनस्य माता । **आ० ६७** । १९ ॥

१ **श्वेतः** । मत्स्यराजस्य विराटस्य पुत्रः । तस्य प्रथमभार्यायां सुरथायां जातः । **वि० २१** । १८ ॥ उत्तरकुमारस्य भ्राता । **भी० ४७** । ४४ ॥

तस्य सगर्भ्यो भ्राता शङ्खः । **वि० २१** । १८ ॥

तस्य वधो भीष्माचार्येण । **भी० ४८** । ११ ॥

२ **श्वेतः** । पर्वतः । **व० २२७** । ११ ॥ **भी० ६** । ४ ॥ ५३ ॥

तत्र राजसूयदिग्विजयेऽर्जुनस्य गमनं । **स० २८** । २९ ॥

३ **श्वेतः** । प्राक्कालीनः कश्चन क्षत्रियः । इन्द्रस्य विमाने । **वि० ५३** । १३ ॥

४ **श्वेतः** । क्रोधवशापुत्र्याः श्वेतायाः पुत्रो दिग्गजः । **आ० ६७** । ६६ ॥

श्वेतकिः । सततं यज्ञनिरतः कश्चन क्षत्रियः । यस्य यज्ञेषु हविषामदनेनाग्नेरजीरणरोगः समभवत् । **आ० २४९** । १७–६९ ॥

श्वेतकेतुः । गौतमकुलोत्पन्नस्योद्दालकस्य पुत्रः । तस्य आरुणिरिति नामान्तरं । तस्य भ्राता नचिकेताः । तस्य स्वसा कहोडऋषेर्भार्या सुजाता । तेन स्त्रीपुरुषमर्यादाकरणं । **आ० १२८** । १२–४९ ॥

तेन जनमेजयस्य सर्पसत्रे सादस्यकरणं । **आ० ५३** । ७ ॥

तस्य देवलनामकविप्रपुत्र्या सुवर्चलया सह ज्ञानिनः पुरुषार्थसिद्धिविषये संवादः । तया सह तस्य विवाहश्च । **शां० २२४** ॥

सोऽष्टावक्रस्य मातुलः । **व० १३४** । १२ ॥

तस्याष्टावक्रेण सह जनकराजयज्ञाय गमनं । **व० १३५** । २१–२३ ॥

श्वेतद्वीपः । श्रीमन्नारायणस्य धामसु श्वेतद्वीपानन्तासनवैकुण्ठाख्येषु त्रिष्वन्यतमं । तद्वर्णनं । **शां० ३४३** । ८ ॥

तद्गतभगवन्महिमानुवर्णनं । शां० ३४६–३५३ ॥
तत्र नारदस्य गमनं । तत्कृतं श्वेतद्वीपवर्णनादिकं च । शां० ३४३–३५३ ॥

श्वेतवाहनः । अर्जुनः । तन्नामनिर्वचनं । वि० ४३ । २१ ॥ २८ ॥

श्वेता । क्रोधवशापुत्री । तत्पुत्रः श्वेतो नाम दिग्गजः । आ० ६७ । ६१ ॥

श्वेताश्वः । अर्जुनः ।

श्वैत्यः । शैब्यनृपतिपुत्रस्य सृञ्जयस्य नामान्तरं । द्रो० ५५ । ५७ ॥

ष.

\+ **षडङ्गानि** । स० ५ । ६ ॥

षडाननः । स्कन्दः । व० २३३ । १० ॥

\+ **षष्ठदिवसयुद्धारम्भः** । भी० ७५ ॥ तत्समाप्तिः । भी० ७९ ॥

षष्ठीप्रियः । स्कन्दः । व० २३३ । ६ ॥

षाड्गुण्यं । सन्धिप्रभृतिगुणषट्कं । स० ५ । ११ ॥

\+ **षोडशदिवसयुद्धारम्भः** । क० ८ ॥ तत्समाप्तिः । क० २१ ॥

\+ **षोडशराजकीयं** । अभिमन्युवधश्रवणदुःखिताय युधिष्ठिराय व्यासेन कथिता षोडशानां राज्ञां कथा । तेच—मरुत्तः ॥ १ ॥ सुहोत्रः ॥ २ ॥ अङ्गराजः ॥ ३ ॥ शिबिः ॥ ४ ॥ दाशरथिरामः ॥ ५ ॥ भगीरथः ॥ ६ ॥ दिलीपः ॥ ७ ॥ मान्धाता ॥ ८ ॥ ययातिः ॥ ९ ॥ नाभागोऽम्बरीषः ॥ १० ॥ शशबिन्दुः ॥ ११ ॥ गयः ॥ १२ ॥ रन्तिदेवः ॥ १३ ॥ दौष्यन्तिर्भरतः ॥ १४ ॥ वैन्यः पृथुः ॥ १५ ॥ परशुरामः ॥ १६ ॥ द्रो० ५५–७० ॥ इयमेव कथा श्रीकृष्णेनापि कथिता । शां० २८ ॥ तत्र परशुरामस्थाने सगरस्य कथोक्ता । इयानेवोभयोर्विशेषः ।

स.

संतोषः । हर्षः । तस्य परमसुखत्वं । व० २ । ४६ ॥

संन्यासः । यत्याश्रमः । तस्य परमपुरुषार्थसाधनत्वं । अश्व० ४७ ॥

संन्यासी । यतिशब्दं पश्यत ।

संयातिः । क्षत्रियः । सो० वं० नहुषस्य पुत्रः । आ० ६९ । ३३ ॥

संवरणः । क्षत्रियः । सो० वं० पूरुकुलोत्पन्नस्याजमीढपुत्रस्य ऋक्षस्य पुत्रः । तद्भार्या सूर्यपुत्री तपती । तत्पुत्रः कुरुः । आ० ६३ । ४० ॥ १०१ । २१ ॥ १८७ । १२ ॥ १८९ । ५६ ॥
तस्य विवाहः । आ० १८९ । ३३ ॥

संवर्तः । ऋषिः । अङ्गिरसः पुत्रः । आ० ६७ । ५ ॥ स० ७ । १९ ॥ ११ । २२ ॥ अनु० १३२ । ४३ ॥
तद्भ्रातरौ उचथ्यो बृहस्पतिश्च । आ० ६७ । ५ ॥
तेन बृहस्पत्युपद्रवमसहमानेनारण्यप्रवेशः । अश्व० ५ । ६ ॥
तेन मरुत्तराजस्य याजनं । अश्व० ९ । ४ ॥
तेनात्मानं हन्तुमागतस्येन्द्रस्य वज्रस्तम्भनं । अश्व० १० । १७ ॥

संवर्तकः । कालाग्निः । भी० ७ । २८ ॥

संवर्ततीर्थं । व० ८३ । ३२ ॥

\+ **संवर्तमरुत्तीयं** । अश्व० ४—१० ॥

संवेद्यं । तीर्थं । व० ८३ । १ ॥

\+ **संशप्तकवधपर्व** । द्रो० १७—३३ ॥

संशप्तकाः । ये शपथपूर्वकं युध्यन्ते ते राजानः । तेच प्रकृते त्रिगर्तराजपुत्राः सुशर्मादयः । नवकोट्यस्तदनुयायिनश्च । आ० २ । २६२ ॥
तेषामर्जुनेन सह युद्धं । द्रो० १७—२७ ॥ क० १८ ॥ ४८ ॥ ५५ ॥
तेषां वधोऽर्जुनेन । द्रो० २७ ॥ क० ५५ ॥

संश्रुत्यः । विश्वामित्रऋषेः पुत्रः । अनु० ७ । ५५ ॥

संसारः । संसृतिः । तस्य कान्तारत्वेन वर्णनं । स्त्री० ५ । २ ॥

तस्य नदीत्वेन वर्णनं। **शां० २५६। १२—१५॥**
[तस्य पारोक्ष्येण वर्णनं पुरञ्जनोपाख्यानव्याजेन। भा० ४। २५–२९॥]
संह्रादः। (संह्लादः)। हिरण्यकशिपुपुत्रः। **आ० ६६। १८॥**
सक्तुप्रस्थः। उञ्छवृत्तिर्ब्राह्मणः। तस्योपाख्यानं। **अश्व० ९२॥**
सख्यं। सौहार्दं। तत्समयोरेव भवतीति। **आ० १४१। ६—७३॥**
सगरः। क्षत्रियः। सू० वं०। तत्पत्न्यौ द्वे। तत्रैका वैदर्भी। तत्पुत्राः षष्टिः सहस्राणि सागराः। अन्या शैब्या। तत्पुत्रोऽसमञ्जाः। **व० १०५। ८॥** यमसभायां। **स० ८। १९॥** इन्द्रविमाने। **वि० ५३। १५॥**
तस्योपाख्यानं। **शां० २८। १३०॥** [भा० ९। ८॥ हरि० १। १४–१५॥ ब्रह्म० ८॥ वायु० ८८॥ रा० १। ३८॥ विष्णु० ४। ३॥]
[तस्य द्वे भार्ये। कश्यपदुहिता सुमतिः। विदर्भराजंदुहिता केशिनी चेति। विष्णु० ४। ४॥]
तेनाश्वमेधकरणं। **व० १०६। ११॥**
तस्यारिष्टनेमिना संवादः। **शां० २९४॥**
सचिवः। मन्त्री। **शां० ८२। ६४॥**
+ सचिवगुणाः। मन्त्रिशब्दं पश्यत।
+ संकरजातिप्रभेदाः। अनु० ८३–८४॥
संकर्षणः। बलरामः। तन्नामनिर्वचनं। **स० २३। २१॥** बलरामशब्दं पश्यत।
सङ्गवः। (समङ्गः)। दुर्योधनस्य वल्लवः। **व० २४०। २॥**
सङ्ग्रामजित्। युधिष्ठिरसभायां। **स० ४। २७॥**
१ **सञ्जयः।** विदुलापुत्रः। सौवीरः क्षत्रियः। **उ० १३३। ३०॥ १३४। ७॥**
२ **सञ्जयः।** गवल्गणनामकसूतस्य पुत्रः। धृतराष्ट्रस्य सूतो मन्त्री च। **आ० ६४। १३९॥**

तेन धृतराष्ट्राय हितोपदेशः। **स० १०३॥**
तस्य उपप्लाव्यगमनं। **उ० २३। १॥**
तेन धृतराष्ट्रसमीपे पाण्डवोक्तवचनकथनं। **उ० ४७–४८॥**
तस्य व्यासानुग्रहेण भारतयुद्धे सार्वज्ञप्राप्तिः। **भी० २। ९॥**
तस्य युद्धं। **श० २४। ५०॥**
तस्य वधं प्रति सात्यकेरुद्यमो व्यासेन मोचनं च। **श० २९। १९—२१॥**
तस्य पूर्वं व्यासदत्तदिव्यज्ञानस्य तिरोधानं। **सौ० ९। ६२॥**
तेन धृतराष्ट्रस्य दावाग्निप्रवेशादनन्तरं हिमवत्पार्श्वगमनं। **आश्र० ३९। ३३॥**
३ **सञ्जयः।** क्षत्रियः। सो० वं०। धृतराष्ट्रस्य पुत्रः। **श० २५। ४॥**
४ **सञ्जयः।** क्षत्रियः। सौवीरराजस्य वृद्धक्षत्रस्य पुत्रः। जयद्रथस्य भ्राता। **व० २६६। ११॥**
+ सञ्जययानपर्व। उ० २०—३२॥
+ सञ्जीवनमणिः। तेन उलूप्या अर्जुनोज्जीवनं। **अश्व० ८१। १२॥**
सण्डाः। देशः। **भी० ९। ४३॥**
सतीनराः। देशः। **स० ७८। ९८॥**
+ सत्यं। यथार्थवचनं। तत्प्रशंसा। **आ० ९९। ३०—३६॥ शां० १६० ॥ अनु० ११०॥**
तस्य लक्षणं। **शां० १०९॥**
१ **सत्यः।** श्रीमान्नारायणः। तन्नामनिर्वचनं। **उ० ६९। १२॥**
२ **सत्यः।** कलिङ्गस्य चक्ररक्षकः। भीमेन हतः। **भी० ५४। ७६॥**
३ **सत्यः।** उञ्छवृत्तिर्ब्राह्मणः। तद्भार्या पुष्करमालिनी। **शां० २७८। ६॥**
सत्यकः। क्षत्रियः। सो० वं० यदुकुलोत्पन्नस्यानमित्रपौत्रस्य शिनेः पुत्रः। तत्पुत्रः सात्यकि-

नामा युयुधानः । **आ० २३९ । ११** ॥ युधिष्ठिरसभायां । **स० ४ । ३६** ॥

सत्यकर्मा । क्षत्रियः । त्रैगर्तराजपुत्रः । अर्जुनेन हतः । **श० २६ । ३७** ॥

सत्यजित् । क्षत्रियः । द्रुपदराजस्य पुत्रः । **आ० १४८ । ५०** ॥ अतिरथः । **उ० १७१ । २४** ॥ **द्रो० १७ । ४५** ॥ द्रोणाचार्येण हतः । **द्रो० २१ । २१** ॥

१ **सत्यदेवः** । कलिङ्गस्य चक्ररक्षकः । भीमसेनेन हतः । **भी० ५४ । ७६** ॥

२ **सत्यदेवः** । क्षत्रियः । त्रैगर्तराजपुत्रः । अर्जुनेन हतः । **क० १८ । २१-२२** ॥

१ **सत्यधृतिः** । द्रौपदीस्वयंवरार्थमागतः कश्चन क्षत्रियः । **आ० २०१ । १०** ॥

२ **सत्यधृतिः** । पाण्डवपक्षीयः कश्चन क्षत्रियः । रथोदारः । **उ० १७१ । १८** ॥ तस्य वधः । **क० ३ । ३१** ॥ तस्य सुचित्तपुत्रत्वात्सौचित्तिरिति नामान्तरं । **उ० १९६ । २८** ॥

सत्यभामा । श्रीकृष्णमहिषी । सत्राजितः पुत्री । तया श्रीकृष्णं प्रति तद्वासकारणप्रश्नः । **आ० २३८ । १०** ॥

तया सह श्रीकृष्णस्येन्द्रलोकगमनं । **स० ५६ । ४०** ॥ [भा० १० । ५९ ॥ हरि० २ । ६४ ॥ विष्णु० ५ । ३० ॥]

तस्याः पाण्डवदिदृक्षया श्रीकृष्णेन सह काम्यकवनगमनं । **व० १८५ । ७** ॥

तया द्रौपदीं प्रति पतिवशीकरणोपायप्रश्नः । **व० २३४ । ४** ॥

[तस्या विवाहः । भा० १० । ५६ ॥ हरि० १ । ३८ ॥ विष्णु० ४ । १३ ॥]

[तस्याः क्रोधगृहप्रवेशः । हरि० २ । ६५ ॥]

तस्याः स्वलोकगमनार्थं तपोवनप्रवेशः । **मौ० ८ । ७५** ॥

सत्यरथः । क्षत्रियः । त्रैगर्तराजपुत्रः । रथोदारः । **उ० १६६ । ११** ॥

१ **सत्यवती** । गाधिराजस्य पुत्री । ऋचीकऋषेः पत्नी । तत्पुत्रो जमदग्निः । तद्भ्राता विश्वामित्रः । **व० ११६ । ३९** ॥ **शां० ४८ । १६** ॥ **अनु० ७ । ७** ॥ [रा० १ । ३४ ॥ भा० ९ । १५ ॥]

तस्या विवाहः । **अनु० ७ । २०** ॥

तस्याः पुत्रोत्पत्तिः । **अनु० ७ । ४६** ॥

२ **सत्यवती** । सू० वं० त्रिशङ्कोर्भार्या । केकयवंशोत्पन्ना । तत्पुत्रो हरिश्चन्द्रः । **स० १२ । १२** ॥

३ **सत्यवती** । अगस्त्यऋषिभार्या लोपामुद्रा । **व० ९४ । २९** ॥

४ **सत्यवती** । उपरिचरवसोः पुत्री । तद्वीर्यान्मत्स्या उदरे उत्पन्ना । **आ० ६० । २** ॥ **६४** ॥ अधिकपाठे-४९ ॥

तस्याः गन्धवती काली मत्स्यगन्धा योजनगन्धा इति नामान्तराणि । व्यासस्य चित्राङ्गदविचित्रवीर्ययोश्च माता ।

सा पूर्वजन्मनि अच्छोदा नाम बर्हिषत्पितॄणां कन्या । शापाद्भूमावुत्पन्ना । **आ० ६४ । ९२** ॥

तस्यां कन्यात्वे एव पराशराद्व्यासोत्पत्तिः । **आ० ६४ । १२८** ॥

तस्याः शान्तनुराजेन विवाहः । **आ० १०८ । १** ॥

तस्यां चित्राङ्गदविचित्रवीर्ययोरुत्पत्तिः । **आ० १०८ । ३** ॥

तया भीष्मं प्रति स्वस्मिन्पराशराद्व्यासोत्पत्तिकथनं । **आ० ११४ । १६** ॥

तस्याः सस्नुषाया व्यासेन सह तपोवनगमनं । **आ० १३७ । १२** ॥

सत्यवाक् । देवगन्धर्वः । **आ० ६६ । ४३** ॥

१ **सत्यवान्** । दुर्योधनस्य सेनापतिः । महारथः । **उ० १६७ । ३०** ॥

२ **सत्यवान्** । क्षत्रियः । साल्वदेशाधिपस्य द्युमत्सेनस्य पुत्रः । तस्य विवाहः । **व० २९६** ॥

तद्भार्या सावित्री। व० २९५। ११॥ तस्य चित्राश्व इति नामान्तरं। व० २९५। १३॥
तस्य काष्ठाद्यानयनार्थं वनं गतस्य मारणाय यमागमनं। सावित्रीप्रार्थनया तेन तदुज्जीवनं च। व० २९८॥
तस्य राज्यप्राप्तिः। व० ३००। ११॥
तस्य पित्रा सह संवादः। शां० २७३॥
सत्यव्रतः। क्षत्रियः। दुर्योधनपक्षीयस्त्रैगर्तः। भी० ६२। १७॥
सत्यव्रता। गान्धार्याः स्वसा। धृतराष्ट्रस्य भार्या। आ० ११९। २३॥
सत्यसन्धः। क्षत्रियः। सो० वं० धृतराष्ट्रस्य पुत्रः। आ० ६८। १००॥ १३१। ९॥
सत्यसेनः। कर्णपुत्रः। नकुलेन हतः। क० ४३। १८॥ श० ९। ४१॥
सत्यसेना। गान्धार्याः स्वसा। धृतराष्ट्रस्य भार्या। आ० ११९। २३॥
सत्येयुः। क्षत्रियः। सो० वं० पूरोः पुत्रस्य रौद्राश्वस्य पुत्रः। तन्माता मिश्रकेशी। आ० ८८। १०॥
सत्येषुः। त्रैगर्तराजपुत्रः। अर्जुनेन हतः। श० २६। ३९॥
+ **सत्त्वं**। गुणः। तत्कार्यं। अश्व० ३९॥ शां० ३१८॥
सत्वः। क्षत्रियः। सो० वं० धृतराष्ट्रपुत्रः। आ० १३१। ४॥
सदः। सो० वं० धृतराष्ट्रस्य पुत्रः। आ० १३१। ४॥
सदश्वः। यमसभावासी क्षत्रियः। स० ८। १२॥
सदश्वोर्मिः। यमसभावासी क्षत्रियः। स० ८। ११॥
सदाकान्ता। नदी। भी० ९। २५॥
+ **सदाचारनिरूपणं**। शां० १९१॥
सदानिरामया। नदी। भी० ९। ३३॥
सदानीरा। नदी। स० २०। २७॥ भी० ९। २४॥ The river Karatoya in Oudh which flows through the districts of Rungpur and Dinajpur.
सनत्कुमारः। ब्रह्मणो मानसः पुत्रः। स० ११। २३॥
तस्य केनचिन्मुनिना सह संवादः। शां० २२७॥
तेन वृत्रासुराय विष्णुमाहात्म्यकथनं। शां० २८६॥
तस्य नारदेन सह संवादः। अनु० ३८॥
तस्य जगत्सृष्टिविषये रुद्रेण संवादः। अनु० १६५—१६९॥
सनत्सुजातः। ब्रह्मणो मानसः पुत्रः। तेन धृतराष्ट्रं प्रति धर्मोपदेशः। उ० ४१-४६॥
+ **सनत्सुजातपर्व**। उ० ४१—४६॥
+ **सनत्सुजातीयं**। उ० ४१-४६॥
सनातनः। ऋषिः। युधिष्ठिरसभायां। स० ४। २२॥
१ **सन्ध्या**। नदी। स० ९। २७॥
२ **सन्ध्या**। पुलस्त्यऋषेर्भार्या। उ० ११७। ११॥
३ **सन्ध्या**। सन्ध्यावन्दनं।
सन्नतेयुः। क्षत्रियः। सो० वं० पूरोः पुत्रस्य रौद्राश्वस्य मिश्रकेश्यां जातः पुत्रः। आ० ८८। १०॥
सप्तगङ्गं। तीर्थं। व० ८२। २९॥
सप्तगोदावरं। राजमहेन्द्रसमीपस्थं क्षेत्रं। व० ८३। ४४॥
सप्तचारुः। तीर्थं। व० ८०। ९९॥
+ **सप्तदशदिवसयुद्धारम्भः**। क० २२॥ तत्समाप्तिः। क० ९८॥
सप्तपालः। ऋषिः। युधिष्ठिरसभायां। स० ४। २०॥

+ **सप्तमदिवसयुद्धारम्भः** । **भी० ८० ॥**
तत्समाप्तिः । **भी० ८६ ॥**

सप्तरावः । गरुडपुत्रः । **उ० १०१ । ११ ॥**

सप्तर्षयः । तेच कश्यपः अत्रिः भरद्वाजः विश्वामित्रः गौतमः जमदग्निः वसिष्ठः इति । **शा० ४९ । ५२ ॥ अनु० १४१॥** मरीचिः अत्रिः अङ्गिराः पुलस्त्यः पुलहः क्रतुः वसिष्ठः । तेषां चित्रशिखण्डिन इति नामान्तरं । **शां० ३४३ । ३० ॥**

तेषां वृषादर्भिणा संवादः । **अनु० १४१ ॥**

तेषां परिव्राड्रूपेणागतस्येन्द्रस्य दर्शनं । **अनु० १४२ ॥**

तत्पत्नीनामग्निना कामनं । **व० २२६ । ३३ ॥**

सप्तर्षिकुण्डं । तीर्थं । **व० ८१ । ७२ ॥**

सप्तसारस्वतं । तीर्थं । **व० ८१ । ११५ ॥**

तस्य सप्ताङ्गानि । सुप्रभा काञ्चनाक्षी विशाला मनोरमा ओघवती सुरेणुः विमलोदका इति । **शा० ३९ ॥**

सभानिर्माणं । युधिष्ठिरस्य । **स० १ । २५ ॥**

सभाप्रवेशः । युधिष्ठिरस्य । **स० ४ । ७ ॥**

सभावर्णनं । युधिष्ठिरस्य । **स० ४ ॥**
,, ... इन्द्रस्य । **स० ७ ॥**
,, ... यमस्य । **स० ८ ॥**
,, ... वरुणस्य । **स० ९ ॥**
,, ... कुबेरस्य । **स० १० ॥**
,, ... ब्रह्मणः । **स० ११ ॥**

+ **सभासदां लक्षणं** । **शां० ८३ । २ ॥**

समः । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । **आ० ६८ । ९६ ॥ १३१ । २ ॥ भी० ६४ । २९ ॥ क० ४६ । ७ ॥**

समङ्गः । कश्चन ऋषिः । ऋज्वङ्गं प्राप्तस्याष्टावक्रस्य नामेति प्रामाणिकाः । तस्य नारदेन संवादः । **शां० २९२ ॥**

समङ्गा । नदी । **वं० १३६ । ३९ ॥**

तत्र स्नानेनाष्टावक्रस्य समाङ्गप्राप्तिः । **व० १३६ । ३९ ॥**

समङ्गाः । देशः । **भी० ९ । ६० ॥**

समन्तपञ्चकं । परशुरामनिर्मितं क्षेत्रं । **आ० १ । १८ ॥ शा० ३८ । ४४ ॥** तस्य कालान्तरे कुरुक्षेत्रमिति नामान्तरं ।

तदुत्पत्तिकथा । **आ० २ । १ ॥**

तत्र परशुरामेण ह्रदपञ्चकनिर्माणं । **व० ११८ । ९ ॥**

तत्र वृद्धक्षत्रेण तपःकरणं । **द्रो० १४८ । १०—११ ॥**

समन्तराः । देशः । **भी० ९ । ५० ॥**

+ **समयपालनपर्व** । **वि० १५ ॥**

समयोरेव स्नेहः । **आ० १४१ । ६७–७३ ॥**

समरथः । क्षत्रियः । मत्स्यराजस्य विराटस्य भ्राता । **द्रो० १५९ । ४१ ॥**

समसौरभः । ऋषिः । जनमेजयस्य सर्पसत्रे सदस्यः । **आ० ५३ । ९ ॥**

समीकः । द्रौपदीस्वयंवरार्थमागतः कश्चन क्षत्रियः । **आ० २०१ । १९ ॥ स० ७ । १६ ॥**

समीची । अप्सराः । शापेन ग्राहत्वं प्राप्ता । अर्जुनेन शापान्मोचिता । **आ० २३६ । २० ॥ स० १० । १३ ॥**

समुद्रः । उदधिः । अब्धिः । **आ० १८ । ९ ॥ व० १०९ । १८ ॥ १०४ । १ ॥** तद्भार्या जाह्नवी । **उ० ११७ । १० ॥** सच सप्तविधः । लवणसमुद्रः इक्षुसमुद्रः सुरासमुद्रः सर्पिस्समुद्रः क्षीरसमुद्रः दधिसमुद्रः शुद्धोदकसमुद्रः इति ।

तद्वर्णनं । **आ० २१ ॥**

+ **समुद्रपानं** । अगस्त्यऋषिणा । **व० १०४ । ३ ॥** उचथ्येन । **अनु० २५९ । २३ ॥**

+ **समुद्रपूरणं** । **व० १०९ । १८ ॥**

+ **समुद्रमथनं** । **आ० १८ । १३ ॥** [भा० ८ । ७–९ ॥ रा० १ । ४५ ॥ स्कान्दपु० केदारखं० ९–१३ ॥]

नः । पाण्डवपक्षीयः क्षत्रियः । आ०
१ । ५४ ॥ २०१ । ११ ॥ स० ३१ ।
॥ उ० ४ । २२ ॥
न्द्रसेनः । द्रो० २३ । ६१ ॥ अश्वत्थाम्ना
। द्रो० १५७ । १८३ ॥
...वपक्षीयस्य चित्रसेनस्य वधः । क० ३ ।
॥
। सर्पः । आ० ५७ । १८ ॥
नः । (सम्पाती) । वैनतेयस्यारुणस्य
पक्षी । तद्भ्राता जटायुः । आ० ६७ ।
॥ व० २८० । १ ॥ २८३ । ४९ ॥
पुपार्श्वः । रा० ४ । ५९ ॥]
। रा० ४ । ५६–६३ ॥]
। मागधी । सो० वं० कुरुराजपुत्रस्य
थस्य भार्या । आ० ६३ । ४३ ॥
ग्रामः । (शम्भलग्रामः) । कल्कि-
विष्णोरवतारस्थलं । व० १९३ । ९४ ॥
+ नवपर्व । आ० ६६–१५३ ॥
यः । बह्वृचो ब्राह्मणः । आश्र० ११ ।
॥
न । अस्त्रं । तत्प्रयोगोऽर्जुनेन कुरुसैन्ये ।
६७ । १३ ॥
१ मा । स्कन्दग्रहः । व० २३० । ३४ ॥
२ मा । देवशुनी । आ० ३ । १ ॥ स०
। ४० ॥
नमेजयं प्रति शापदानं । आ० ३ । ९ ॥
। अयोध्यासमीपस्था नदी । स० ९ ।
॥ २० । २८ ॥ भी० ९ । १९ ॥ The
r Gogra. The town of Ajodhya
ituated on this river.
स्वती । नदी । स० ९ । २३ ॥ व०
। ३ ॥ भी० ९ । १४ ॥ The river
raswati. It rises in the hills of
nur. It disappears at Vinasanatirtha
ter taking a westerly course from
aneshwar.

तस्या विश्वामित्रेण रुधिरमयजलीभवनशापदानं ।
शा० ४३ । ३८ ॥
तस्याः स्थलभेदान्नामभेदः । सुप्रभा काञ्चनाक्षी
विशाला मनोरमा ओघवती सुरेणुः विमलोदका
इति । शा० ३९ ॥
२ सरस्वती । नदी । सो० वं० अन्त्यनारभार्या ।
तत्पुत्रः त्रसुः । आ० ६३ । २६ ॥
३ सरस्वती । सात्यकेर्भार्या । मौ० ८ । ७२ ॥
+ सरस्वतीतार्क्ष्यसंवादः । व० १८९ ॥
सरस्वतीसागरसंगमः । तीर्थं । व० ८० ।
६३ ॥
सरस्वत्यरुणासंगमः । तीर्थं । व० ८१ ।
१५१ ॥ तन्महिमा । शा० ४४ । ४१ ॥
+ सरित्सागरसंवादः । शां० ११३ ॥
सरिद्वीपः । गरुडस्य पुत्रः । उ० १०१ । ११ ॥
सर्पः । एकादशरुद्रेष्वन्यतमः । आ० ६७ । २ ॥
+ सर्पकालयोः संवादः । अनु० १ । ७० ॥
सर्पदर्वी । तीर्थं । व० ८१ । १४ ॥
+ सर्पमृत्युसंवादः । अनु० १ । ५० ॥
+ सर्पलुब्धकसंवादः । अनु० १ । ३५ ॥
सर्पसत्रं । पाण्डवपौत्रेण जनमेजयेन सर्पनाशार्थं
कृतो यागः ।
तत्र सदस्या ऋत्विजश्च । आ० ५३ । ४–१० ॥
तत्र व्यासागमनं । आ० ६० । १ ॥
तत्राग्नौ पतितानां नागानां नामानि । आ० ५७ ॥
तत्राग्नौ पतितुं सेन्द्रस्य तक्षकस्यागमनं । आ०
५६ । ९ ॥
तत्रास्तीकस्य गमनं । आ० ५४ । २६ ॥
तस्य विरामः । आ० ५८ । ९ ॥
सर्पाः । कद्रूपुत्राः । नागाः । आ० ५७ । १ ॥
तेषामुत्पत्तिः । आ० १६ । १३ ॥
तेषां मातृशापः । आ० १५ । १ ॥ २० ।
८ ॥ अनु० २३ । २ ॥
तेषां जनमेजयस्य सर्पसत्रे, अग्नौ पतनं । आ०
५२ ॥

तेषां नामानि । आ० ३५ ॥ ५७ ॥ स० ९ । ९–१४ ॥
तेषां द्विजिह्वत्वप्राप्तिः । आ० ३४ । २७ ॥
तज्जन्यभीतिपरिहारोपायः । आ० ५८ । २३–२४ ॥
तैः सर्पसत्रनिवारणविषये मन्त्रकरणं । आ० ३८ ॥
सर्पान्तः । गरुडस्य पुत्रः । उ० १०१ । १२ ॥
सर्पिमाली । ऋषिः । स० ४ । १६ ॥
सर्वकर्मा । क्षत्रियः । सौदासस्य पुत्रः । पराशरेण रक्षितः । शां० ४८ । ८४ ॥
सर्वकामदुघा । कामधेनुदुहिता । उ० १०२ । १० ॥
+ **सर्वतोभद्रः** । कौरवाणां व्यूहः । भी० ९९ । १ ॥
सर्वदमनः । शकुन्तलापुत्रस्य भरतस्य नाम । आ० ९५ । ३२ ॥
सर्वसारङ्गः । सर्पः । आ० ५७ । १८ ॥
१ **सविता** । द्वादशादित्येष्वन्यतमः । आ० ६६ । १५ ॥
२ **सविता** । सूर्यः । आ० १ । ५५ ॥ सूर्यशब्दं पश्यत ।
सव्यसाची । अर्जुनः । तच्छब्दनिर्वचनं । वि० ४३ । २१ ॥ ३२ ॥
सहः । क्षत्रियः । सो० वं० धृतराष्ट्रपुत्रः । आ० १३१ । २ ॥ २०१ । १ ॥ भीमसेनेन हतः । क० ४६ । १६ ॥
सहजन्या । अप्सराः । आ० १२२ । ४६ ॥ स० १० । १२ ॥
१ **सहदेवः** । क्षत्रियः । सो० वं० पाण्डुराजस्य पुत्रः । तन्माता माद्री । आ० ६३ । ६६ ॥ तस्योत्पत्तिः । आ० १३३ । १८ ॥ एकरथः । उ० १६९ । ५ ॥
तेन द्रौपदीस्वयंवरे दुश्शासनपराजयः । आ० २०५ । ४३ ॥ क० १४ ॥
तस्य भार्या द्रौपदी । तत्पुत्रः श्रुतसेनः । आ० ६४ । १६४ ॥
तस्यान्या भार्या मद्रेशस्य शल्यस्य पुत्री विजया । तत्पुत्रः सुहोत्रः । आ० ९३ । ७९ ॥
[तस्यान्या भार्या भानोः पुत्री भानुमती । हरि० २ । ९० ॥]
तेन राजसूयदिग्विजयार्थं दक्षिणदिशं गतेन शूरसेनमाहिष्मत्यादिदेशविजयः । विभीषणं प्रति करादानार्थं घटोत्कचप्रेषणं च । स० ३२ ॥
तेन भीष्माज्ञया श्रीकृष्णस्याग्रपूजाकरणं । स० ३९ । ४८ ॥
तेन शकुनिवधप्रतिज्ञानं । स० ९९ । ३८–४२ ॥
तस्य विराटनगरप्रवेशः । वि० १३ । २ ॥
तस्य विराटनगरे नाम तन्त्रीपाल इति । वि० ४ । १५ ॥ तत्र प्रच्छन्नं नाम जयद्बल इति । वि० ७ । ६६ ॥
तस्य पराजयः कर्णेन । द्रो० १६८ । १४ ॥
तेन शकुनिवधः । श० २७ । ६० ॥
तस्य महाप्रस्थाने पतनं । महा० २ । ८ ॥
२ सहदेवः । क्षत्रियः । मगधदेशाधिपस्य जरासन्धस्य पुत्रः । तस्य राज्याभिषेकः । स० २५ । ६७ ॥ तस्याश्वाः कर्बुरवर्णाः । द्रो० २३ । ४९ ॥
स द्रोणाचार्येण हतः । द्रो० १२५ । ४२ ॥
सहस्रचित्यः । राजर्षिः । केकयराजस्य शतयूपस्य पितामहः । आश्र० २१ । ६ ॥
सहस्रज्योतिः । विवस्वतः पुत्रः । आ० १ । ५७ ॥
+ **सहस्रनाम** । विष्णोः । अनु० २५४ ॥ शिवस्य । अनु० ४८ ॥
सहस्रपात् । ऋषिः । खगमनामकऋषिं तार्णसर्पेण भीषयित्वा तच्छापेन डुण्डुभसर्पतां प्राप्तः । आ० १० । ७ ॥
सहस्रवाक् । क्षत्रियः । सो० वं० धृतराष्ट्रस्य पुत्रः । आ० ६८ । १०० ॥

सह्यः । कुलपर्वतः । **भी० ९ । ११ ॥**

सांयमनिः । क्षत्रियः । सो० वं० बाह्लीकपुत्रः सोमदत्तः । **भी० ६१ । ११ ॥**

+ साक्षिधर्माः । **उ० ३५ । ३३ ॥ आ० ७ । ३ ॥ स० ९० । ७६ ॥**

+ सागरसरित्संवादः । **शां० ११३ ॥**

